(कौसू ३,४) इत्यादि प्रपद्य पूर्वमासनं[1] वीक्ष्य अहे दैधिषव्य इत्यारभ्य द्यावापृथिव्योः समीक्षणान्तं संहिताविधिवद् भवति ॥२०॥

इति वैतानकल्पे प्रथमा कण्डिका ॥ १ ॥

[२]

यत्र विजानाति— ब्रह्मन्नपः प्रणेष्यामीति तत्र प्रणय यज्ञं देवता वर्धय त्वम् । नाकस्य पृष्ठे स्वर्गे लोके यजमानो अस्तु सप्तऋर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि, ओं भूर्भुवः स्वर्जनदोंऽ प्रणय इति यथास्वरम्[2] अनुजानाति । एवं सर्वत्रानुज्ञापदम् आद्यन्तयोः ॥१॥[3]

यत्र विजानाति° °अनुजानाति — यस्मिन् काले अध्वर्युरनुज्ञां ब्रह्मन्नपः प्रणेष्यामि इति ब्रह्माणं पृच्छति तस्मिन् काले प्रणय यज्ञम् इत्यादि ओं भूर्भुवः स्वर्जनदो३म् इत्येवमन्तं मन्त्रमुपांशूक्त्वा प्रणयति, तथाऽऽमन्त्रणस्वरम् अनुजानाति, अनुज्ञां ददाति । उपांशुत्वं च प्राङ्मुख उपांशु करोति (कौसू १,१०) इति । योगविभागश्च भगवता[4] भाष्यकृता व्याख्यातः[5] । प्राङ्मुखं करोति ।

एवं° °आद्यन्तयोः — सर्वेष्वनुज्ञावचनेष्वामन्त्रणपदानुरूपम्[6] अनुज्ञपादं लोण्मध्यमपुरुषेणोह्यम्, तच्चाद्यन्तयोः प्रयोक्तव्यम् । यथा हविःप्रोक्षणामन्त्रणे हविः[7] प्रोक्षयेति [8]हविःशब्द आदौ[8] प्रोक्षयेत्यन्ते ॥१॥

प्रणीतासु प्रणीयमानासु वाचं यच्छत्या हविष्कृत उद्वादनात्[9] ।२।[10]

प्रणीताप्रणयनादि [11]हविष्कृत उद्वादनान्तं[11] यावद्वाचमुपरमयति[12] । पुनर्वाग्यमाविधाने वक्ष्यमाणं प्रायश्चित्तं विधातव्यम् ॥२॥

यदि वदेद् वैष्णवीं जपेत् ॥३॥[13]

---

१. पूर्णमासदं मूको. २. °स्वरमिति भा[1] A. ३. तु. आपश्रौ ३,१८,१; १९,१; काश्रौ २,२,८; भाश्रौ ३,१६,१. ४. भगवती मूको. ५. व्याख्याता मूको. ६. °मन्त्रणामदा° भा[1]. ७. नास्ति मूको. ८-८. शब्दादौ मूको. ९. उद्वासदनात् भा[1] A. १०. तु. गोब्रा २,१,१; आपश्रौ १,१६,७. ११-११. °ष्कृताद्वासना° मूको. १२. °मुपरमिति मूको. १३. तु. आपश्रौ ३, १८,८.

दैवान्मनुष्याद् वा अनिमित्ताद्वा यदि वदेद् वैष्णवीम् ऋचं जपेत् ॥३॥

आग्नीध्रोऽन्वाहार्याधिश्रयणाद् वेदिं परिसमुह्योत्करदेशे निदधाति । स्तम्बयजुषो द्वितीयपुरीषे प्रहृतेऽवस्तम्नाति च अररो दिवं मा पप्तः (मा १,२६) इति ॥४॥[1]

आग्नीध्रो° °निदधाति — अत्र [2]कुढहः न नरः ?[2] । आग्नीध्रोऽन्वाहार्याधिश्रयणाद् अनन्तरं वेदिं परिसमुह्य[3] [4]मार्जयित्वोत्करदेशे प्रहर त्रिः[4] । उत्तरसूत्रे चकारकरणादेव प्रैषः प्रोक्षणीरासादयेध्मं[5] बर्हिरुपसादय, स्रुचः संमृड्ढि, पत्नीं संनह्याज्येनोदेहि (काश्रौ २,६,२६; आपश्रौ २,३,११) इति यथा प्रददाति[6] । यथाप्रेषितमन्यः पराधिकारात्, स्वयं वाऽविरोधात् (काश्रौ २,६,२७-२८) । केचित् प्रैषार्थं कुर्वन्ति । आग्नीध्रः प्रैषं ददाति । अथ करोति स्तम्बयजुषि क्रियमाणे । उत्करदेशः उत्तरतो तृतीयेऽयुग्मे ।

स्तम्बय° °पप्त — स्तम्बयजुषो द्वितीयपुरीषेऽध्वर्युणोत्करे प्रहृते[7] अवस्तभ्नाति आक्रमयति उत्करम् अररो दिवं मा पप्तः इति । चशब्दाद् आग्नीध्र एव ॥४॥

बृहस्पते परिगृहाण (कौसू १३७,११) इति वेदिं परिगृह्यमाणाम् अनुमन्त्रयते ॥५॥[8]

बृहस्पते परिगृहाण इति वेदिं परिगृह्यमाणामितिवचनाद् उत्तरपरिग्रहेऽप्यनुमन्त्रणं भवति ॥५॥

आशासाना सौमनसम् (अ १४,१,४२) इति पत्नीं संनह्यमानाम् ॥६॥[9]

पत्नीं योक्त्रेण बध्यमानाम् अनुमन्त्रयते[10] ॥६॥

घृतं[11] ते अग्ने (अ ७,८७[८२],६) इत्याज्ये निरुप्यमाणेऽग्निम् । परि स्तृणीहि (अ ७,१०४ [९९]) इति[11] वेदिं परिस्तृणन्तम्[12] ॥७॥

---

१. तु. काश्रौ २,६,२६२८; आपश्रौ २,३,११. २-२. कुकुढहः ननर A. ३. पुरिसमु° मूको. ४-४. मार्जयित्वोत्तरदेशे उत्तरं निः मूको. ५. °ध्माव° A. ६. प्रधाति मूको. ७. प्रहते A. ८. काश्रौ २,३,१०; आपश्रौ ३,१९,३. ९. तु. काश्रौ २,७,१; आपश्रौ २,५,२. १०. °न्त्र्येत A. ११. नास्ति भा[1] A. [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घृतं° °ग्निम् — आज्ये निरुप्यमाणेऽग्निम् आहवनीयम् अनुमन्त्रयते । परिस्त°° °परिस्तृणन्तम् — परिस्तृणन्तम् अध्वर्युम् अनुमन्त्रयते ॥७॥

यस्यां वृक्षाः (अ १२,१,२७) इति परिधीन् निधीयमानान् ॥८॥[1]

परिधीन् आहवनीयस्य परिधीन् स्थाप्यमानान् अनुमन्त्रयते ॥८॥

ऋषीणां प्रस्तरोऽसि (अ १६,२,६) इति प्रस्तरम् ॥९॥[2]

प्रस्तरं निधीयमानम् अनुमन्त्रयते[3] ॥९॥

आसादितेषु हविःषूक्तान् पुरस्ताद्धोमान् जुहोति । अभिचारेष्वाभिचारिकान् संस्थितहोमांश्च ॥१०॥[4]

आसादितेषु° °जुहोति — अध्वर्युणाऽऽसादितेषु हविःषु अग्नावग्निः (अ ४, ३९,९-१०; ५,२९,१; २, ३५, ५) इत्यादीनुक्तान्[5] दर्शपौर्णमासयोश्चतुरः पुरस्ताद्धोमान् स्रुवेणाऽऽहवनीये जुहोति । आहवनीयो ह्याहुतीनां प्रतिष्ठा इति श्रुतेः ।

अभिचारे° °होमांश्च — अभिचारेषु शान्त्यादिषु संहिताविध्यभिचारोक्तान् अग्ने यत्ते तपः (अ २,१९-२३) इति पुरस्ताद्धोमान्[6] । निरमुं नुद (अ ६,७५-७७)[7] इति संस्थितहोमान्[7] इत्येतान् जुहोति ॥१०॥

अग्नेर्मन्वे (अ ४,२३) इति सामिधेनीरनुमन्त्रयते ॥११॥

प्र वो वाजाः (ऋ ३,२७,१) इत्याद्याः सामिधेन्यो होत्राऽनूच्यमानास्ता अनुमन्त्रयते ॥११॥

प्रजापते न त्वदेतान्यन्यः (अ ७, ८०, ३) इति प्राजापत्यम् आघारम् ॥१२॥

आघारहोमम् अनुमन्त्रयते परिभाषितत्वात् ॥१२॥

अग्नीत् परिधींश्चाग्निं च त्रिस्त्रिः संमृड्ढि इति प्रेषित आग्नीध्रः

1. तु. काश्रौ २,८,१; आपश्रौ २,९,५. 2. काश्रौ २,८,१०; आपश्रौ २,१२. 3. नास्ति भा[1]. 4. तु. काश्रौ २,८,१९; आपश्रौ २,१०,४. 5. तु. कौसू ३,१६-१७. 6. तु. कौसू ४७,८;१०. 7. अग्ने यत्ते तपः मूको.

स्फ्यम् अग्निं च संमार्गम् अन्तरा कृत्वा परिधीन् मध्यमदक्षिणोत्तरान् त्रिस्त्रिः समार्ष्टि[1] अग्ने वाजजित् वाजं त्वा सरिष्यन्तं वाजजितं संमार्ज्मि[2] (मा २,७) इति ॥क॥

अग्नीत् परिधीन् इत्यादिनाऽध्वर्युप्रेषित[3] आग्नीध्रः स्फ्यस्य[4] आहवनीयस्य चाऽन्तरेण संमार्गं कृत्वा परिधीन् मध्यमादीन् त्रिस्त्रिः संमार्ष्टि अग्ने वाजजित् इति । [5]प्रागुत्तरेण, तथाऽग्ने[5] परिभाषितत्वात् । त्रिस्त्रिर्वचनात् संक्रमा भूत् ॥क॥

संमार्गेणावाञ्चम् अग्निम् उपवाजयति वाजं त्वाऽग्ने जेष्यन्तं सनिष्यन्तं संमार्ज्मि वाजं जय इति ॥ख॥ ॥१३॥[6]

[7]संमार्गं इध्मसंनहनम्, तेन अग्निम् आहवनीयम् अवाञ्चं प्रतीचीनं त्रिरुपवाजयति । पुनः संमार्गग्रहणं तन्निवृत्त्यर्थम्[7] ॥ख॥१३॥

इन्द्रेमम् (६,५,२) इत्यैन्द्रम् आघारम् ॥१४॥

ऐन्द्रम् आघारहोमम् अनुमन्त्रयते ॥१४॥

प्रवरे प्रव्रियमाणे वाचयेद् देवाः पितरः (अ ६,१२३,३-५) इति तिस्रः ॥१५॥[9]

[10]अध्वर्युणा प्रवरे प्रव्रियमाणे यजमानं[10] वाचयेत् तिस्र ऋचः ॥१५॥

ग्रीष्मो हेमन्तः (अ ६,५३,२) इति प्रयाजान् ॥१६॥

प्रयाजहोमान् अनुमन्त्रयते [11]प्रतिप्रयाजम् ॥१६॥

अहं जजान (अ ६,६१,३) इत्याज्यभागौ ॥१७॥

अहं जजान इत्याज्यभागहोमौ†[11] अनुमन्त्रयते । प्रत्याज्यभागम् इति भाष्यकारः । प्र मित्रयोर्वरुणयोः (गोब्रा २,३,१३) निदर्शनात् ॥१७॥

इति वैतानकल्पे द्वितीया कण्डिका ॥

1. संमार्ज्य G. 2-2. नास्ति भा[1] A. 3. °र्युप्रेत्य मूको. 4. नास्ति मूको. 5-5. °गुत्तरा एततामग्ने मूको. 6. तु. वैता ४,२; काश्रौ ३, १,१२-१३; आपश्रौ २,१२,१०; १३,१. 7-7. नास्ति भा[1]. 8-8. नास्ति A. 9. तु. आपश्रौ ४, ९, ६. 10-10. अध्वर्युप्रवयजमानो मूको. 11-11. नास्ति भा[1]. † °गहोमान् A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[३]

येनेन्द्राय (अ १,९,३) इत्याग्नेयम् ॥१॥

आग्नेयं[1] पुरोडाशप्रधानहोमम् अनुमन्त्रयते ॥१॥

मा वनिं मा वाचम् (अ ५,७,६) इत्यैन्द्राग्नम् ॥२॥

ऐन्द्राग्नं पुरोडाशहोमम् अनुमन्त्रयते ॥२॥

सांनाय्यस्यैन्द्रं माहेन्द्रं [2]वा इन्द्रेमम्[2] (अ ६,५,२), त्वमिन्द्रस्त्वं महेन्द्रः (अ १७,१,१८) इति ॥३॥[3]

सांनाय्यहविष ऐन्द्रहोमम् इन्द्रेमम् इत्यनुमन्त्रयते। माहेन्द्रं त्वमिन्द्रस्त्वं महेन्द्रः इति। अत्र सोमयाजिन [4]ऐन्द्रम्, असोमयाजिनो[4] माहेन्द्रम् इत्येके व्यवस्थितविकल्पं मन्यन्ते ॥३॥

पौर्णमास्याम् आग्नेयाग्नीषोमीयावन्तरोपांशुयाजम्[5] अग्नीषोमीयम् अस्मै क्षत्रम् (अ ६,५४,२) इति ॥क॥

पौर्णमास्याम् आग्नेयाग्नीषोमीयपुरोडाशहोमयोरन्तरा मध्ये अग्नीषोमीयम् पुरोडाशं चाऽग्नीषोमीयम् उपांशुयाजहोमम् अनुमन्त्रयते अस्मै क्षत्रम् इति। पौर्णमास्याम् एवोपांशुयाजो भवति अनेनैव। आग्नेयम् अमावास्यावत्। पौर्णमास्याम् तावुपांशु[7] पौर्णमास्यां [8]यजन् विधानसामर्थ्यात्। तावग्नुतामग्नीषोमावाज्यस्यैव। तावुपांशु पौर्णमास्या आहुतयो हूयन्ते। (मीसूशा २,२,३) इति[8] लिङ्गदर्शनाच्च। चतुर्दश पौर्णमास्या आहुतयो हूयन्ते। त्रयोदशामावास्यायामिति (मीसूशा १०,८,४६) ॥क॥

॥४॥

नाऽमावास्यायाम् अविधानात् ॥ख॥

---

1. नास्ति मूको. 2-2. नास्ति भा[1] A. 3. तु. काश्रौ ४,२,१०; शाश्रौ १,३,१६; १७; ८,१२; १३; आपश्रौ १,२,६; ७. 4-4. ऐन्द्रं सोमया° मूको. 5. तु. काश्रौ ४,२,४५; ४६; आपश्रौ २४,२,३२; ३३. 6. °मीया- यजं तदुपांशु° भा[1] A वा पू. 7. नावुपांशु आनसं, सुबोधिनी. 8-8. यज-

अमावास्यायाम् उपांशुयाजहोमाऽनुमन्त्रणं न[1] भवति। कस्माद् उपांशुयाजस्याऽविधानात्। उपांशुयाजमन्तरा यजत्यजामित्वाय (तैसं २,६,६,४) इति तु गुणवादः[1]। न च गुणवादाद् विधिक्लृप्तिः। पौर्णमास्यां विधिप्रत्यक्षत्वात्[2] पौर्णमासीम् उपक्रम्य होमवादः पाक्षिकी हि नित्यमनाय(?) पक्षे जामितादोषपरिहाराय योऽमावास्यायाम् उपांशुयाजविधिः अन्यवादाद् उत्रेतुं शक्यते पाक्षिकत्वात्। अमावास्यायां [4]जामितायाः पाक्षिकी[4] हि नित्यश्रावास्पक्षे(?) जामिता[5]। पौर्णमास्यां पाक्षिकी। तस्यां च पाक्षिक्यां पाक्षिकी न न्याय्या। तस्माद्य अमावास्यायाम् उपांशुयाज इति केशव उक्तम्। महता प्रबन्धेन भगवता भाष्यकारेण व्याख्यातम् ॥४॥

आ देवानाम् (अ १९,५०,३) इति सौविष्टकृतम् ॥५॥[6]

स्विष्टकृद्धोमम् अनुमन्त्रयते ॥५॥

इष्टे स्विष्टकृति वाचं यच्छत्याऽनुयाजानां प्रसवात् ॥६॥[7]

स्विष्टकृतोऽनन्तरम् अनुयाजप्रसवान्तं वाचंयमो भवति। पुनर्वाग्यमविधानं प्रायश्चित्तसमुच्चयार्थम्। तेन ब्रह्मवेदनिर्मितम् ॐ भूर्भुवःस्वर्जनदोम् (वैता १,३) इति भवति। अनाम्नातप्रायश्चित्तं च त्वं नो अग्ने (अ ३,२०,५), स त्वं नः (अ २०,४६,३) इति ॥६॥ प्रसवात् = आज्ञात (पर्यन्त)

प्राशित्रं यवमात्रम् अधस्ताद् उपरिष्टाद् वाऽभिघारितम् अग्रेणाऽध्वर्युः परिहरति ॥७॥[8]

अध्वर्युकर्तृकेऽपि प्राशित्रे मात्रादिगुणविधानं नियमार्थम् ॥७॥

तत्सूर्यस्य त्वा [9]चक्षुषा प्रतीक्षे[9] (गोब्रा २,१,२; कौसू ९१,२) इति प्रतीक्षते ॥८॥[10]

---

1. नास्ति मूको. 2. तु. मीसू १०,८,४७. 3. विधिप्रत्वात् मूको. 4-4. जमितायाः पक्षि° मूको. 5. जमिता मूको. 6. तु. काश्रौ ३,३, २५-२८; आपश्रौ २,२१,३; ६. 7. तु. गोब्रा २,१,१; आपश्रौ ३, ४, ५ [तु. ३,२०,८]. 8. तु. गोब्रा २,१,३; आपश्रौ ३,२,९; माश्रौ १,३, ३,२२. 9-9. नास्ति भा[1] A. 10. तु. काश्रौ २,२,१५; आपश्रौ ३, १९,६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राशित्रस् अध्वर्युणा हृतं प्रतीक्षते ॥८॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा प्रतिगृह्णामि (मा २,११; कौसू २,२) इति प्रतिगृह्णाति ॥९॥[1]

प्राशित्रहरणस्थं प्रतिगृह्णाति ॥९॥

तद्[2] व्युह्य तृणानि प्राग्दण्डं स्थण्डिले निदधाति पृथिव्यास्त्वा नाभौ सादयामि (मा २,११) इति ॥१०॥[3] (तु. का.श्रौ. २।२।१४-१५)

[संनिधेर्दक्षिणे वेद्यं संनिधि व्यवहं]? प्राचीनदण्डं प्राशित्रहरणं स्थण्डिले भूमौ निदधाति पृथिव्यास्त्वा इति ॥१०॥

अग्नेष्ट्वाऽऽस्येन, आत्माऽस्यात्मन्नात्मानं मे मा हिंसीः स्वाहा इत्यनामिकाऽङ्गुष्ठाभ्यां दन्तैरनुपस्पृशन् प्राश्नाति ॥११॥[4]

अग्नेष्ट्वा इत्यृचा आत्माऽस्यात्मन् इति यजुषा च प्राशित्रं दन्तैरनुपस्पृश्य प्राश्नाति ॥११॥

प्राशितम्[5] अनुमन्त्रयते — योऽग्निर्नृमणा नाम[6] ब्राह्मणेषु प्रविष्टस्तस्मिन् एतत् सुहुतमस्तु प्राशित्रं तन्मा मा हिंसीत् परमे व्योमन् इति ॥१२॥[7]

[8]प्राशितं प्राशित्रम्[8] अनुमन्त्रयते ॥१२॥

[9]मातल्याद्भिः† मार्जयित्वा प्राणान् संस्पृशते[9] ॥१३॥[10]

वाङ्म आसन् नसोः प्राणश्चक्षुरक्ष्णोः[11] श्रोत्रं कर्णयोर्बाह्वोर्बलमूर्वोरोजो जङ्घयोर्जवः पादयोः प्रतिष्ठा। अरिष्टानि मे सर्वाङ्गानि सन्तु तनूस्तन्वा मे सह इति नाभिम् ॥१४॥[12]

---

१. तु. गोब्रा २,१,२; काश्रौ २,२,१४; आपश्रौ ३,१९,७. २. नास्ति भा[1] A. ३. तु. गोब्रा १,१,२; काश्रौ २, २, १५; आपश्रौ ३, १९, ७. ४. तु. गोब्रा २,१, ३; कौसू ६५,१४; आश्रौ १, १३, १; काश्रौ २, २, १६. ५. प्राशित्रम् भा[2] A. ६. नामा पू. ७. तु. कौसू ६५,१५. ८-८. प्राशितं प्राशितं भा[2]; प्राशिते प्राशितं A. ९-९. नास्ति भा[2] A. † अद्भिः गोब्रा; पात्राण्यद्भिः C. १०. तु. गोब्रा २,१,३. ११. °रक्ष्योः वा. १२. तु. अ १९,६०,१-२; तैसं ५,५,९,२; माश्रौ ५,२,१५,२०; पागृ १,३,२५.

मातल्याऽद्भिः मार्जयित्वा प्राणान् संस्पृशते[1]। वाङ्म आसन् इति चारणवैद्यानां पठ्यते। प्राणान् यथालिङ्गं संस्पृशते। तनूस्तन्वा मे सह इति नाभिं संस्पृशते ॥१३-१४॥

इडैवास्मान् (अ ७,२८[२७],१) इतीडाम् उपहूयमानाम् अनुमन्त्रयते ॥१५॥[2]

इडोपहूतेति होत्रोपहूयमानाम् ॥१५॥

आग्नीध्रः षडवत्तं प्राश्नाति पृथिव्याः [3]त्वा दात्रा प्राश्नाम्यन्तरिक्षस्य त्वा दिवस्त्वा[3] इति ॥१६॥[4]

उपहूते द्यावापृथिवी (तैसं २,६,७,५) इत्युच्यमानेऽध्वर्युः[5] षडवत्ताख्यम् अवदानम् आग्नीध्राय प्रयच्छति। स तत्प्राश्नाति पृथिव्यास्त्वा इति। [6]त्वात्वसंबन्धात् सामान्याऽनुषङ्गः[6] ॥१६॥

उप त्वा देवः (अ ७, ११५[११०], ३) इतीडाभागं प्रतिगृह्य इन्द्र गीर्भिः इति प्राश्नन्ति[7] ॥१७॥[8]

पूर्वेणार्धर्चेनानुमन्त्रणाद् [9]एव यजमाने[9] यज्ञस्य संपत्तिर्भवति उपदेशशब्दं[10] विनापि। गृहीत्वोत्तरेण प्राश्नन्ति। बहुवचनाद् ब्रह्माऽऽग्नीध्रो यजमानः ॥१७॥

अपो दिव्याः इति तिसृभिः (अ ७,९४[८९],१-३) [11]पवित्रवति मार्जयन्ते[11] ॥१८॥[12]

पवित्रवति होतृचमसे मार्जनार्थम् ॥१८॥ प्रस्तरे मार्जनमिति सायणः।

यजमानोऽन्वाहार्यम् अन्तर्वेद्याम् ॥१९॥ प्रजापतेर्भागोऽस्यूर्ज-

---

१. संस्पृशे मूको. २. तु. काश्रौ ३, ४, ८-१०; आपश्रौ ३,२,८. ३-३. नास्ति भा[2] A. ४. तु. काश्रौ ३,४,१६; १७; आपश्रौ ३,३५; ८; माश्रौ १,३,२,१६. ५. °च्यतेऽध्व° मूको. ६-६. त्वा त्वे संबन्धासामानुषङ्गः मूको. ७. नास्ति भा[1] A. ८. तु. काश्रौ ३,४,१९-२०; आपश्रौ ३,२,११. ९-९. एवा यजमानान् मूको. १०. अप शब्दाद् मूको. ११-११. नास्ति भा[2] A.. १२. तु. काश्रौ ३,४,२१; आपश्रौ ३,३,३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वान् पयस्वान् अक्षितोऽस्यक्षित्यै त्वा मा मे क्षेष्ठाः, अमुत्राऽमुष्मिल्लोक इह च[1], प्राणापानौ मे पाहि, समानव्यानौ मे पाहि, उदानरूपे मे पाहि, ऊर्ग् असि ऊर्जं मे धेहि, कुर्वतो मे मा क्षेष्ठाः, ददतो मे मोपदसः, प्रजापतिरहं[2] त्वया समक्षम्[3] ऋध्यासम् (गोब्रा २,१,७) इत्यभिमन्त्र्य ऋत्विग्भ्यो ददाति दक्षिणाम् ॥२०॥[4]

प्रतिगृह्य क इदम् इत्युक्तम् ॥२१॥[5]

क इदं कस्मा अदात् (अ ३,२९,७-८), कामस्तदग्रे (अ १९,५२), यदन्नम् (अ ६, ७१), पुनर्मैत्विन्द्रियम् (अ ७,६९[६७],१) इति दक्षिणाग्रहणे सर्व-दक्षिणानां[6] प्रतिगृह्णाणेति प्रतिग्रहसंबन्धत्वम्। तेन आग्नीध्रादीनाम् अपि प्रतिग्रहमन्त्रा भवन्ति ॥२१॥

संप्रेषित आग्नीध्रः ॥२२॥[7]

अध्वर्युणा समिधम् आधाय [8]अग्निम् अग्नीत् संमृड्ढि[8] इति प्रेषितः ॥२२॥

इति वैतानकल्पे तृतीया कण्डिका ॥

[४]

एधोऽसि (अ ७,९४[८९],४) इति समिद्वत्या समिधम् आधाय सकृत्सकृत् परिधीन् संमार्ष्टि अग्ने वाजजिद् वाजं त्वा ससृवांसं वाजजितं संमार्ज्मि (मा २, १४) इति ॥१॥[9]

संप्रेषित आग्नीध्रः एधोऽसि इति समिच्छब्दवत्याऽनुयाजसमिधम् आहवनीय आधाय परिधीन् संमार्ष्टि। सकृत्सकृदिति नियमार्थम् ॥१॥

अग्निं च प्राश्वं वाजं त्वाग्ने जिगीवांसं संमार्ज्मि वाजम् अजैः इति ।२।[1]

1. वा पू. 2. प्रजापतिमहं वा पू. G. 3. समृक्षम्° वा भा[1] A; साक्षात् माश्रौ. 4 तु. माश्रौ १,४,२,१२; काश्रौ ३,४,२७; २८; आपश्रौ ३,३,१४; ४,३. 5. तु. कौसू ४५,१७. 6. °क्षिणा त्वं मूको. 7 तु. काश्रौ ३,५,१; आपश्रौ ३,४,५. 8-8. अग्नीत्समृ° A; अग्नीमग्नीत्संमृ° भा[1]. 9 तु. गोब्रा २,१,४; वैता २,१३; काश्रौ ३,५,१;४; आपश्रौ ३,४,५-७.

[1]कर्षणात् तं[1] प्राश्वं प्राचीनम् ॥२॥

मनोज्योतिर्जुषताम् आज्यम् अरिष्टं यज्ञं सम् इमं तनोतु बृहस्पतिः प्रतिगृह्णातु नो विश्वे देवास इह मादयन्ताम् इत्यनुयाजान् ॥३॥[2]

अनुयाजहोमान् अनुमन्त्रयते ॥३॥

ये देवा दिवि ष्ठ (अ १,३०,३) इत्यनुवषट्कारम्[3] ॥४॥

अनुवषट्कारहोमम्[4] अनुमन्त्रयते ॥४॥

नुदस्व काम (अ ९,२,४) इति स्रुचौ विप्रणुद्यमाने अनुमन्त्रयते ॥५॥[5]

विप्रणुद्यमाने … … … ॥५॥

सं बर्हिरक्तम् (अ ७,१०३ [९८]) इति प्रस्तरं प्राहियमाणम् ॥६॥[6]

प्रस्तरं जुह्वासादनबर्हिः आहवनीये प्रक्षिप्यमाणम् अनुमन्त्रयते ॥६॥

संस्रावभागाः (कौसू ६,९) इति संस्रावम् ॥७॥[7]

संस्रावहोमम्[8] अनुमन्त्रयते ॥७॥

न घ्रंस्तताप (अ ७,१९[१८],२), सं वर्चसा (अ ६, ५३, ३), देवानां पत्नीः (अ ९,७,६), सुगार्हपत्य (अ १२, २,४५[10]) इति पत्नीसंयाजान् ॥८॥[9]

पत्नीसंयाजहोमान् अनुमन्त्रयते यथादेवतम् ॥८॥

दक्षिणाग्निहोमान् ॥क॥

अनुमन्त्रयते। परिभाषया अनुमन्त्रणविधिः[10] ॥क॥

1-1. कर्षणात्वं मूको. 2 तु. मा २,१२; तैसं १,५,३,२; काश्रौ ३,५,५ प्रभृ.; आपश्रौ ३,५,१. 3. अवषट्° वा पू. 4. अवषट्कारं होम° A; अवषट्कारहोम° भा[1]. 5 तु. काश्रौ ३,५,१७; आपश्रौ ३,५,४. 6 तु. काश्रौ ३,६,६;७. 7 तु. काश्रौ ३,६,१७; आपश्रौ ३,७,१४. 8. होमम° मूको. 9 तु. काश्रौ ३, ७, ७; आपश्रौ ३, ८, ६. 10. मन्त्रविधिः मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयम् उदूखले मुसले[1]† (अ १०,९,२६) इति ।।ख।। ।।९।।

तृतीयं दक्षिणाग्निहोमम् उदूखले मुसले इत्यनेनैव, वैशेषिकत्वात्[3] ॥ख॥९॥

आग्नीध्रः संमार्गम् अग्नौ प्रहरति यो अग्नौ (अ ७,९२[८७],१), इति ।।१०।।[4]

आहवनीये प्रक्षिपति ॥१०॥

वि ते मुञ्चामि (अ ७,८३[७८],१), अहं वि ष्यामि (अ १४,१,५७) प्र त्वा मुञ्चामि (अ १४,१,१९) इति पत्नीं योक्त्रेण विमुच्यमानाम् अनुमन्त्रयते ।।११।।

विमुच्यमानां विप्रयुज्यमानाम् ॥११॥

वेदः स्वस्तिः (अ ७, २९[२८]) इति वेदं विचृतति[6] ।।१२।।

विमुञ्चति ॥१२॥

समिष्टयजुषः[8] यानावहः (अ ७,[१०२]९७,३-८) इति षड्भिः संस्थितहोमान् जुहोति । मनसस्पते (अ ७,[१०२]९७,८) इत्यासाम् उत्तमा[9] ।।१३।।

समिष्ट° °जुहोति — समिष्टयजुषोऽनन्तरं [11]संस्थितहोमान् व्याख्यातान् होमान्[11] जुहोति । यजुषा संस्थित्य हूयन्त इति संस्थितहोमाः । [तेनावलत्योत्तरार्द्धं स्वपीष्टि भवन्ति। एतत्पूर्वाद्दासप्राप्तवपि] ? पुरस्ताद्धोमस्य व्याख्यानादेव । षड्ग्रहणं कर्मभेदार्थम् । तेन त्रेषं ? तस्यैवावृत्तिः । उच्छिष्टकर्मत्वाच्च आद्ययोर्व्युदासः ।

मनसस्पते° °उत्तमा इति सूत्राऽऽनह आवापदेशविघ्यर्थः । तेनावापपक्षे मनस्पते इति आसाम् उत्तमा । प्रणीताश्च यो भवति । आशानामिति सर्वा अनूय

१-१. यनि. शोधः C.; तृतीय उ° वा G. † नास्ति A. २. तु. काश्रौ ३,७, १४-१५; आपश्रौ ३,६,१२; १०,१-२. ३. वैशिक° मूको. ४. तु. आपश्रौ ३,४,८. ५. तु. काश्रौ ३,८,२; आपश्रौ ३,१०,६. ६. विचृतति भा[1] ब. ७. तु. काश्रौ ३,८,२. ८. नास्ति A G. ९. °त्तमाच्च मा[1] A. १०. तु. काश्रौ ३,८,४; आपश्रौ ३,१३,२. ११-११. °होमान्व्याख्यातान्जुहो° मूको.

पृथक्करणात् । [पुरस्ताद्धोमय च प्राक्षतथ्यां श्रावयः] ? । तस्या मन्त्रपाठक्रमोभयविधानादिति भगवान् भाष्यकारः ॥१३॥

प्रणीता विमुच्यमानाः सन्तुषीः (अ ६,२३) इत्यनुमन्त्रयते ।।१४।।

विमुच्यमाना वेद्यां विसृज्यमानाः[2] ॥१४॥

येषां प्रयाजाः (अ १,३०,४) इति यजमानम्[3] आशास्ते ।।१५।।

येषां प्रयाजाः इति यजमानम् आशिषा संयोजयति ॥१५॥

यदन्नम् (अ ६,७१) इति भागं प्राश्य देव सवितरेतत्ते प्राह, तत् प्र च सुव प्र च यज । बृहस्पतिर्ब्रह्मा स यज्ञं पाहि, स यज्ञपतिं पाहि स मां पाहि, स मां कर्मण्यं पाहि इत्याह ।।१६।।

ब्रह्मा भागं प्राश्नन् देव सवितः इत्याह ब्रवीति ॥१६॥

यजमान उदपात्रेऽञ्जलावासिक्ते सं वर्चसा (अ ६,५३,३) इति मुखं विमार्ष्टि ।।१७।।

'अध्वर्युणा उदपात्रे' अञ्जलौ आसिक्ते तेनोदकेन मुखं प्रक्षालयति ॥१७॥

अन्तरेणाऽपराग्नी दक्षिणेनाऽग्निं विष्णुक्रमादीक्षणान्तम् ।।१८।।

गार्हपत्यदक्षिणाग्न्योरन्तरेण यजमानः त्रीन् विष्णुक्रमान् क्रमते, आहवनीयं दक्षिणेन ईक्षणान्तं संहिताविधिवच्चोक्तं भवति ॥१८॥

अग्ने गृहपते (कौसू ७०,९) इति गार्हपत्यम् उपतिष्ठते ।।१९।।

[10]यजमानः कल्पजेन[10] गार्हपत्यस्य उपस्थानं करोतीत्यर्थः ॥१९॥

यस्योरुषु (अ ७,२६,३) इत्याहवनीयम् अभिव्रज्य प्राणापानौ (अ २,१६,ओजोऽसि (अ २,१७) इत्युक्तम् ।।२०।।[11]

१. तु. काश्रौ ३,८,६; आपश्रौ ३,१३,५. २. विमृज्य° मूको. ३. वैतु. C °मानः. ४. तु. गोब्रा २,१,४; काश्रौ २,२,१६; आपश्रौ ३,२०,८; ४,१६,९; माश्रौ ५, २,१५, २२; २३. ५. तु. काश्रौ ३, ८, ८; ९; आपश्रौ ३, १०,८. ६-६. °र्युप्राणुद° A. ७. तु. काश्रौ ३,८,१०;१४; १७; आपश्रौ ४,१४,६-८; ११; १५, २. ८. तु. कौसू ६, १४-१६. ९. तु. काश्रौ ३, ८, १९; आपश्रौ ४, १६, २. १०-१०. °मानकल्पजाना मूको. ११. तु. कौसू ५४, १२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्यो° °अभिव्रज्य— आहवनीयाभिमुखं गच्छतीत्यर्थः ।

प्राणापानौ° °क्रम्— मन्त्रोक्तं कर्म कर्तव्यम् ॥२०॥

अयं नो अग्निः (कौसू ८९,१३) इति द्वाभ्याम् उपस्थाय सं यज्ञपतिराशिषा (मा ६,१०) इति भागं प्राश्नाति ॥२१॥[1]

अयं° °उपस्थाय— कल्पजाभ्याम् आहवनीये उपस्थानं करोतीत्यर्थः ।

सं यज्ञ° °प्राश्नाति—यजुषा यजमानो भागभक्षणं करोतीत्यर्थः ॥२१॥

व्रतानि व्रतपतये (कौसू ४२,१७) इति व्रतविसर्जनीम् आदधाति ॥२२॥[2]

व्रतविसर्जनीयां समिधं जुहोति ॥२२॥

एतस्माद् याजमानाद् ऋतेऽपीसिद्धिः[3] । तदपि श्लोकौ वदतः— प्रवर्ग्यो याजमानानि पत्नीमन्त्राश्च[4] तत्त्रयम् ।

अङ्गं च यज्ञे भवत्यृते चैभ्योऽपीसिद्ध्यति ॥१॥

प्रवर्ग्याच्छौर्यमाप्नोति याजमानेन चाशिषः ।

पत्नीमन्त्रैः प्रजामायुस्तस्मात्तेनैव सिद्ध्यति ॥२॥ इति ॥२३॥

एतस्माद्° °सिद्धिः— [5]याजमानपदार्थरहितेन[5] यज्ञसमृद्धिर्नभवतीत्यर्थः ।

तदपि श्लोकौ° °सिद्ध्यति, इति—ब्राह्मणपठितौ[6] श्लोकावभिवदतः । °तत्रापि प्रथमः° [7]प्रवर्ग्यादीनाम् अङ्गानां मखेऽङ्गताम्[8], द्वितीयः शौर्यादिफलप्रदत्वेनाङ्गतां स्तौति । व्रतविसर्जनी तु भवत्येव व्रतोपायनसंबन्धात् ॥२३॥

दर्शपौर्णमासौ त्रिंशतं वर्षाणि ॥क॥

[9]दर्शपौर्णमासयोरेतावद् विधिविशेषः[9] । त्रिंशद् वर्षाणि यावद्दर्शपौर्णमासौ भवतः ॥क॥

१. तु. काश्रौ ३, ८,२६; आपश्रौ ४, १३, ९. २. तु. काश्रौ ३, ८, २५; आपश्रौ ४,१६,११. ३. °ऽपिसिद्धिः पू वा G C; °ऽपिसिद्धः व. ४. °न्त्रश्च वा. ५. यजमान्° मूको. ६. द्विरुर्म ब्रा° मूको. ७-७. तथा भि प्र °मूको. ८-८. °दीनामंगतानत्तां मकेगतां मूको. ९-९. °योस्तववि° मूको.

पञ्चदश दाक्षायणयज्ञः ॥ख॥ ॥२४॥[1]

दाक्षायणयज्ञः पञ्चदश वर्षाणि यावद् भवति । दर्शपौर्णमासावेव [2]दाक्षायणयज्ञो न कर्मान्तरं[2] प्रकरणत्वात् अतिगुणाधिकारात् ॥ख॥ २४॥

पौर्णमास्यां पौर्णमासम् अपरेद्युश्च ॥क॥

दाक्षायणे पौर्णमास्यां पौर्णमासं कर्म भवति । अपरेद्युश्च परेद्यवि वर्तते अपरेद्युरिति वचनात् । तेन पौर्णमासीप्रतिपदोरिदं कर्म ॥क॥

एवम् अमावास्यायाम् ॥ख॥ ॥२५॥[3]

कर्म भवति । अपरेद्युश्च [4]परेद्यवि वर्तते[4] । न पिंडपितृयज्ञोऽनङ्गत्वात् संवत्सराधिकारिणः ॥ख॥२५॥

संवत्सरं वा ॥२६॥[5]

दाक्षायणयज्ञाधिकारः ॥२६॥

साकंप्रस्थाय्यादीनि च ।.क॥

वेति निवृत्तमिति भगवान् वाचस्पतिः । साकंप्रस्थाय्यादीनि च दर्शपौर्णमासवचनात् संवत्सरं यावद् भवन्ति । कालविधिपरं सूत्रम् । [6]वैनेतिकर्तव्यताश्च प्राप्ता अवगन्तव्याः[6] ॥क॥

एताभ्याम् इष्टयो व्याख्याता व्याख्याताः[7] ॥ख॥ ॥२७॥

इत्यथर्ववेदे वैतानसूत्रे प्रथमोऽध्यायः समाप्तः ।

एताभ्यां दर्शपौर्णमासाभ्यां वैकृतीष्टयो व्याख्याताः । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ख॥२७॥

इति कौशिकीये वैतानकल्पे सोमादित्यस्याक्षेपानु-
विधौ प्रथमेऽध्याये चतुर्थी कण्डिका ॥
॥ प्रथमोऽध्यायः समाप्तः ॥

---

१. तु. काश्रौ ४,२, ४७; ४८; आपश्रौ ३, १४, १२; १७, ४; १०; ११. २-२. °णयज्ञातक° मूको. ३. तु. आपश्रौ ३, १७, ५. ४-४. परेद्यावर्तते मूको. ५. तु. काश्रौ ४,४, २६. ६-६. °ताश्च प्राह्याव° मूको. ७. नास्ति भा[1] A G.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ द्वितीयोऽध्यायः

[५]

अथाग्न्याधेयम् ॥१॥

अथशब्दोऽधिकारे[1]। अग्न्याधेयमिति कर्मणो नामधेयम् । एतन्नामकं कर्माऽधिकृतं वेदितव्यम् ॥१॥

तत्र [2]वर्णव्यवस्थया कालव्यवस्थाम्[2] आह—

वसन्ते ब्राह्मणस्य ॥क॥

ब्राह्मणस्याधिकारिणो वसन्ततौवग्न्याधेयम् ॥क॥

ग्रीष्मे राजन्यस्य ॥ख॥

राजन्यस्याधिकारिणो ग्रीष्मर्तावग्न्याधेयम् ॥ख॥

वर्षासु वैश्यस्य ॥ग॥

वैश्यस्याधिकारिणो वर्षर्तावग्न्याधेयम् ॥ग॥

वर्णत्रयेण च कालेषु सर्वेषामपि फाल्गुनीपौर्णमास्यां कालनियमः॥

त्रीणि पर्वाणि इत्युक्तम् ॥घ॥ ॥२॥[1]

त्रीणि पर्वाणि फाल्गुनीपौर्णमास्यमावास्ये[4] "पुण्यं नक्षत्रम्"[5] (कौसू ६७, ७) इति। यदस्माभिः स्मार्तकल्पेऽग्न्याधेयम् उक्तं तद् अत्रापि प्रत्येतव्यम् । श्रुत्यन्तरे तथा कालविधिदर्शनात् ॥घ॥२॥

त्वरितस्य कालनियमाऽनादरम् आह—

यदैव कदाचित् श्रद्धाऽऽपद्येत तदैवैनं[6] नाऽतीयात् ॥३॥[7]

कालविशेषं न[8] प्रतीक्षते । यतः श्रद्धा एनम् आधातारं नाऽतीयात् नाऽतिक्रामेद् इति । लक्षणयाऽऽधाता। श्रद्धाऽनतिक्रम उपदिश्यते ॥३॥

१. °शब्दाधि° मूको. २-२. °वस्थाकालव्य° मूको. ३. तु. काश्रौ ४,७, २-७; आपश्रौ ५, ३, २-१८. ४. °वास्या मूको. ५-५. °व्यन° मूको. ६. नास्ति भा[1,2] A; न्वेवैनं G., ७. तु. गोभा १, १,१४; बौश्रौ २, १२। १६. ८. नास्ति मूको.

एवं कालान् उपदिश्य इतिकर्तव्यताम् उपदिशति—

उक्तो ब्रह्मौदनः ॥४॥[1]

अग्नीनाधास्यमानः (कौसू ६०,१) इत्यादिना स्मार्तकल्पे य उक्तो ब्रह्मौदनः सोऽस्मिन्नग्न्याधेये कर्तव्यत्वेन प्रत्येतव्यः ॥४॥

सवान् दत्त्वाऽग्नीन् आदधीत (कौसू ६७,६), एकं द्वौ सर्वान् वा (कौसू ६०, १०) इत्यविशेषश्रवणात् स्मार्तब्रह्मौदने चतुर आर्षेयान् (कौसू ६३, ३) इत्याद्युक्तम् । तदनुवादम्[2] आह—

ऋत्विज उपसादयति ॥५॥[3]

ब्रह्महोत्रध्वर्य्वग्नीधश्चतुर उपसादयति ॥५॥

अभिमन्त्रितं नाऽश्नीयात् ॥६॥[4]

कारस्त्यं "ब्रह्मौदनकर्माणि प्राप्ते" अभिमन्त्रणम् उक्तम् । तावदेव कृत्वा ओदनम् आश्नीयात्, आधानाङ्गं संपादयेत ॥६॥

अनन्तरम् इतिकर्तव्यताम् आह—

यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा ।
तं ते हरामि ब्रह्मणा यज्ञियैः[1] केतुभिः सह ॥१॥
जातवेदो भुवनस्य रेतस् इह सिञ्च तपसो यज्जनिष्यते ।
अग्निमश्वत्थादधि हव्यवाहं शमीगर्भाज्जनयन् यो मयोभूः ॥२॥

इति मन्त्रोक्ते अरणी गृह्णन्तम् आधास्यमानं वाचयति ॥७॥[7]

प्रातराधास्यमानं यजमानम् अरणी गृह्णन्तं यो अश्वत्थः इत्यादि मयो भूः इत्यन्तं मन्त्रं ब्रह्मा वाचयति । मन्त्रोक्ते अश्वत्थशमीगर्भारणी । यावरणी अश्वत्थः शमीगर्भ इत्यादिभिर्मन्त्रैः प्रतिपादिते, तादृश्यावित्यर्थः । एतेन अरणिलक्षणम् अपि सूत्रमाहितयोक्तम् । अत्र अरणिग्रहणस्य वाचनलक्षणत्वेन सिद्धवद्

१. तु. काश्रौ ४, ८,२-९; आपश्रौ ५, ५, १-९. २. तदपवा° मूको. ३. तु. कौसू ६३, ३. ४. नास्ति भा[1] A; वा दद्यात् (ओदनम्) इति C शोधप्रस्तावः (तु. कौसू ६३,२०). ५-५. °न कर्मप्राप्ते मूको. ६. यज्ञि° भा पु. ७. तु. काश्रौ ४, ७, २२; आपश्रौ ५, १, १.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपादानाद् अरणिग्रहणविधिः सूचितः। सिद्धवद् उपादानाद् एव अर्थात् प्रदानविधिरपि सूचितः, अरणिग्रहणस्य कालः पुराऽऽदित्यस्याऽस्तमयात्[1]। कुत इति चेत्। उत्तरत्र[2] रात्रिमिति द्वितीया कालाध्वनोरत्यन्तसंयोगे (पा २,३,५) इति। अनुशिष्टजागरणस्य सकलरात्रिकाले कर्तव्यतया प्रतीतस्य पुरस्ताद् उच्यमानत्वात्। तेन पाठक्रम एव प्रमाणम्। एवं रात्रेः प्राक् [3]कर्मोक्तम् ॥७॥

रात्रिकर्माऽऽह[3]—

वाग्यता जाग्रतो रात्रिम् आसते। अपररात्रं वा ॥८॥[4]

अशक्तान् प्रति पक्षान्तरम् आह—अपररात्रिशेषं जाग्रत आसते ॥८॥

बृहस्पते सवितः (अ ७,१७[१६]) इति स्वपतो[5] बोधयेत् ॥९॥

आधास्यमानयजमानादीन्[6] ॥९॥

उषसि शान्त्युदकं करोति चित्यादिभिराथर्वणीभिः कपुर्-विपर्वा-रोदाका-वृक्कावती-नाडा-निर्दहन्तीभिराङ्गिरसीभिश्च[7]। चातनैर्मातृनामभिर्वास्तोष्पत्यैरनुयोजितैः ॥१०॥[8]

संहिताविध्युक्तेतिकर्तव्यतया [9]चित्यादिभिराथर्वणीभिरोषधीभिः कपुर्विपर्वादिभिः[9] आङ्गिरसीभिश्च चातनादिभिश्चतुर्भिर्गणैरनुयोजितैः शान्त्युदकं करोति[10]। पुनश्चित्यादिग्रहणम् आथर्वणीत्वज्ञापनार्थम्।

कपुः कपिकच्छुः, विपर्वा लाङ्गली, रोदाका काम्पिल्लः, वृक्कावती अव्यंडा, नाडा नडः[11], निर्दहन्ती राजिका। एता आङ्गिरसीः। चेति समुच्चयार्थः। सर्वत्राऽलाभे प्रतिनिधिः [12]कार्यः। मूल-काण्ड-पर्ण-†फल-पुष्प†-प्ररोह-रस-गन्धानां सादृश्ये प्रतिनिधिं कुर्यात्। सर्वालाभे ‡यवः प्रतिनिधिः‡[12] भवतीति स्मरणात्[13] ॥१०॥

---

१. °दित्यस्य समयात् मूको. २. तु. वैता ५,८. ३-३. कर्मोक्ता रात्रिः कर्मा° मूको. ४. तु. काश्रौ ४,८,११; आपश्रौ ५,८,१-४. ५. सुप्तान् वा सा [अ ७,१५ मू.]. ६. आधास्यमानादीन् मूको. ७. नास्ति भा[१] A. ८. तु. गोब्रा १,२,१८. ९-९. चित्यादिभिः मूको. १०. तु. कौसू ८, १६-२५;९,१-३ ११. नदः मूको. १२-१२. नास्ति A; †-† फल- भा[२]; ‡-‡प्रतियत्र भा[१] A. १३. तु. के. [कौसू ८,१६] एतासामलाभे यवः प्रतिनिधिः कार्य इति पैठीनसिः।

तेनाग्निपदम् अश्वं स्नापयन्नभ्युक्षञ्छमयति ॥११॥[1]

[2]तेन शान्त्युदकेनाग्निपदम् अश्वम् †अग्न्याधानाय ज्वलनो पदं यस्य भविष्यति तं स्नापयन्नभ्युक्षञ्छमयति शान्तं यज्ञियं करोति[2] ॥११॥

अनुदिते उदिते वाऽऽधास्यमानः आकृतिलोष्टेत्याद्युपस्थानान्तम् ॥१२॥

अनुदिते आदित्ये उदिते वाऽऽधास्यमानः आकृतिलोष्टवल्मीकेनाऽऽस्तीर्य[3] (कौसू ६९, १०) इत्यादि उपोत्थाय। अथोपतिष्ठते। अग्ने गृहपते (कौसू ७०,७-९) इत्येवमन्तं संहिताविध्युक्तं करोति ॥१२॥

यत्त्वा क्रुद्धाः (अ १२,२,५) इत्युपोद्धरन्ति[4] आचार्याः ॥क॥

यत्त्वा क्रुद्धाः इत्युपसमाधानेऽप्यतिदेशप्राप्तस्य गार्ग्यादय आचार्या उपोद्धारं मन्यन्ते। आचार्यग्रहणं पूजार्थम् ॥क॥

आहवनीयदक्षिणाग्न्योर्लक्षणान्तम् ॥ख॥ ॥१३॥

आहवनीयदक्षिणाग्न्योस्तु आकृतिलोष्टवल्मीकेनाऽऽस्तीर्येत्यादि अभ्युक्ष्य लक्षणान्तं कृत्वा पुनरभ्युक्ष्य शान्तम् आधास्यमानं करोति ॥१३॥[5]

पुरीष्योऽसि विश्वभराः[6]। अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥१॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः[7] ॥२॥
तमु त्वा दध्यङ् ऋषिः पुत्र ईधे अथर्वणः। वृत्रहणं पुरन्दरम् ॥३॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनंजयं रणेरणे ॥४॥
(तैसं ४,१,३,२-३) इति मथ्यमानम् अनुमन्त्रयते ॥१४॥

मथ्यमानम् अग्निं पुरीष्योऽसि इति चतुर्ऋचेन ब्रह्माऽनुमन्त्रयते ॥१४॥[8]

जातं सुजातं जातवेदसम् (अ ४,२३,४) इति ॥१५॥

जातम् अग्निम् अनुमन्त्रयते ॥१५॥[9]

---

१. तु. गोब्रा १,२,१८; काश्रौ ४, ८,२२,२३; वैता ५,१७. २-२. नास्ति A; †-†°नाय पदज्वल° भा[२]. ३ °कृतिवल्मी° भा[१]. A. ४. इत्यपो° वा पू. ५. तु. कौसू ६९,१०-१४. ६. विश्वंभ° पू. ७. वाग्यतः वा पू. ८. तु. कौसू ७०,२. ९. तु. कौसू ७०,३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जातरूपेणाऽन्तर्द्धाय नासिक्येनोष्मणाऽऽस्येन वा मय्यग्ने (अ ७,८७[८२]२) इत्येतयाऽपानतिं ॥१६॥‡

सुवर्णेनांतर्द्धानं कृत्वा नासिक्येन वा अथवा आस्येन वा[1] मय्यग्रे इत्यृचा जातस् अग्निस् आजिघ्रति आघास्यमानः[1] ॥१६॥

अश्वपादं लक्षणे निधाप्यमानं सम् अध्वराय (अ ३,१६,६) इत्यनुमन्त्रयते ॥१७॥[1]

[2]अग्निपदस्याऽश्वस्य पादस् आहवनीये निधाप्यमानं सम् अध्वराय इत्यनु-मन्त्रयते[2] ॥१७॥

इति वैतानकल्पे द्वितीयेऽध्याये प्रथमा कण्डिका ॥

रथेनाग्नौ प्रणीयमानेऽश्वेऽन्वारब्धं वाचयति ॥१८॥

[६]

यद् अक्रन्दः प्रथमं जायमान उद्यन्त्समुद्राद् उत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥१॥†
यद् अक्रन्दः सलिले जातो अर्वन्त्सहस्रान् वाजिन् बलवान्बलेन ।
तं त्वाऽऽदधुर्ब्रह्मणे भागम् अग्ने अथर्वाणः सामवेदो यजूंषि ॥२॥
ऋग्भिः पूतं प्रजापतिरथर्वणेऽश्वं प्रथमं निनाय ।
तस्य पदे प्रथमं ज्योतिरादधे‡ स मा वहाति सुकृतां यत्र लोकः ॥३॥
अभितिष्ठ पृतन्यतो मह्यं प्रजाम् आयुश्च वाजिन् धेहि ।
त्वया वधेयं§ द्विषतः सपत्नान् स्वर्गे मे लोकं यजमानाय धेहि ॥४॥
अभितिष्ठ पृतन्यतः सहस्व पृतनायतः ।
यथाहम् अभिभूः सर्वाणि तानि धूर्वतो जनान् ॥५॥ इति ॥१॥¶

अश्वेऽन्वारब्धं यजमानं यदक्रन्दः इति पञ्चर्चं ब्रह्मा वाचयति ॥१॥[5]

१-१. नास्ति भा[2]; †°पानिति C शोधः; ‡तु. काश्रौ ४, ६, १४; १५; २६; २७; आपश्रौ ५, ११, ५. २. °स्यमानम् A. ३. तु. काश्रौ ४, ९, १६३, १४. ४-४. °पदस्य पादमाहवनीय इति मूको. ५-५. नास्ति भा[2]; †ऋ १, १; ‡ तु. C; °राददे मूको; §वधूमें वा पू ; ¶तु. गोब्रा १, २, ३१; वैता ५, ११.

आहवनीयदक्षिणाग्नी गार्हपत्यात् सह प्रणीयमानौ[1] व्या-करोमि (अ १२, २, ३२) इत्यनुमन्त्रयते ॥२॥

स्वहस्तप्रणयनपक्षेऽनुमन्त्रणम् ॥२॥

आहितम् आहवनीयम् आऽयं गौः (अ ६,३१,१-३) इत्युपतिष्ठते ॥३॥[1]

लक्षणे निहितम् आहवनीयं तृचेन उपतिष्ठते ॥३॥

दक्षिणाग्निर्निर्मथ्य आहार्यो वा ॥४॥[2]

दक्षिणाग्नेर्योन्यन्तरविधानम् । तेन गार्हपत्याद् वा प्रणयनम्[3], अरण्योर्वा मन्थनम् अरणीपात्रादेर्वा भवति ॥४॥

सभ्याऽऽवसथ्ययोराहवनीयाद् विहारः ॥क॥

अनुगमने योन्यन्तरविधानार्थं[4] सूत्रम् ॥क॥

सभ्याद्वाऽऽवसथ्यस्य ॥ख॥

आवसथ्यस्य पाक्षिको योन्यन्तरविधिः ॥ख॥

सभ्यः सभायै[5] ॥ग॥

सभायै[5] सभ्यस्याऽग्नेर्विहरणं भवति । सभा च [6]ऋणदानादिव्यवहार-निरूपणार्थं[6] क्षत्रियाणाम्[7] । तस्यां साधुः सभ्यः ॥ग॥

आवसथ्य आवसथाय ॥घ॥ ॥५॥[9]

आवसथार्थम् आवसथ्याऽग्नेर्विहरणं भवति । आवसथो गृहम्, तत्र पाकादिप्रयोजनोऽग्निरावसथ्यः ॥घ॥५॥

अग्निपदम् अश्वं रथं चातुष्प्राश्यां[10] हिरण्यं च ब्रह्मणे ददाति ॥६॥[11]

अग्न्याधानाय लक्षणे पदं यस्याऽभूत् तम् अग्निपदम् अश्वम् । एतच्चतुष्टयं ब्रह्मणे ददाति । दानयोगाद् आहिताग्निः ॥६॥

१. तु. काश्रौ ४, ९, १६; आपश्रौ ५, १५, ६. २. तु. आपश्रौ ५, १३, ८. ३. तु. वैता ६, २. ४. योनिवि° मूको. ५. सभाया ब. पू. ६. नास्ति भा[1] A. ७. रणा° भा[1]. ८. क्षत्रियास्या मूको. ९. तु. आपश्रौ ५, १७, १. १०. ब्रह्मौदननिर्वर्तिकां धेनुमित्यर्थः । °प्राश्यं भा[2]. ११. तु. गोब्रा १२,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निं त्वाहुर्वैश्वानरं सदनान्[1] प्रदहन्वगाः[2] । स नो देवत्राधि ब्रूहि मा रिषामा वयं तव इत्यश्वं शमयित्वा यदक्रन्दः इत्युपाकुरुते ॥७॥

ऋचाऽग्निपदम्[4] "अश्वं शान्तं कृत्वा"[5] यदक्रन्दः (वैता ६,१) इति 'पञ्चभिर् ऋग्भिरग्निम् उपाकुरुते'[6] स्वीकुरुते ब्रह्मा। शमयित्वेत्यश्वप्रतिग्रहदोषापनोद-नार्थम्[7] ॥७॥

इन्द्रस्यौजो मरुताम् अनीकम् (अ ६,१२५,३) इति रथम् अभि हुत्वा वनस्पते वीड्वङ्ग (अ ६,१२५,१) इत्यातिष्ठति ॥८॥

'इन्द्रस्यौजो मरुतामनीकम् इति[8] अभिहोमत्वाद् रथे हुत्वा वनस्पते वीड्वङ्ग इति ऋग्द्वयेनारोहति'[8] ॥८॥

उपविश्य पूर्णहोमम् उप त्वा नमसा (अ ३, १५,७-८) इति ॥९॥

उपविश्येति शब्दप्रयोगाद् आसनसंस्कारो भवति। पूर्णहोमं पूर्णाहुतिम् ऋग्द्वयेन अनुमन्त्रयते ॥९॥

इदमुग्राय (अ ७, ११४[१०९]) इत्यन्वक्तान् अक्षान् विदेवनायाऽध्वर्यवे प्रयच्छति ॥१०॥

विदेवनार्थम् इदम् उग्राय इति सर्चेनाऽभिमन्त्र्य घृतेनाऽभ्यक्तान् अक्षान् अध्वर्यवे[12] प्रयच्छति ॥१०॥

१. स दहन् G. २. °न्नगात् पै. (३.) तु. वै १,९५,३; गोब्रा १,२,२१. ४ ऋचामग्नि° भा[1] A. ५-५. °श्वं कृ° भा[1] A. ६-६. पंचभिरग्निमुपा° भा[2] A; पंचभिर्ऋग्भिरुपा° भा[1]. ७. °षापनुदार्थम् भा[1]. ८-८. नास्ति भा[1]. ९. द्वयो रो° भा[1]. A (१०) तु. काश्रौ ४,१०,५; आपश्रौ ५,१८,१. (११) तु. काश्रौ ४, ९, १९; आपश्रौ ५, १९, २. (१२-१२.) तु. सा [अ ७, १०३ भ.]: °र्चेनाभिमन्त्र्याध्वर्यवे मूको.

आग्न्याधेयिकीष्विष्टिष्वग्नेः[1] पवमानस्य पावकस्य शुचेरदितेरिति पवमानः पुनातु[2] (अ ६, १९, २), त्वेषस्ते (अ १८, ४,५९), अग्नी रक्षांसि (अ ८,३,२६), अदितिर्द्यौः (अ ७,६,१) इति ॥११॥

आग्न्याधेयिक्य इष्टय आधानस्य शेषभूताः। अग्नेः पवमानस्याऽष्टाकपालेन प्रथमा। अग्नेः पावकस्याऽग्नेः शुचेश्च द्वितीया। अदितेश्चरुणा तृतीया। तासु यथासंख्यं होमान् अनुमन्त्रयते। अदितेरिति इतिकरण एवार्थः प्रकारार्थो वेति भाष्यकारेण व्याख्यातम् ॥११॥

यजमानो द्वादशरात्रम् उपवत्स्यद्भक्तम् इत्युक्तम् ॥१२॥

आधानदिवसाद् द्वादशरात्रं यावत् संहिताविध्युक्तम्—उपवत्स्यद्भक्तम् अश्नाति। मधुलवणमांसमाषवर्जम् (कौसू १, ३१-३२) इति ॥१२॥

ब्रह्मचारी व्रत्यधोऽग्नीन् उपशेते ॥१३॥

ब्रह्मचारी स्वाध्यायशीलः। व्रती संयतात्मा। अधोभूमावग्निसमीपे शेते इति। उपशब्दस्य समीपार्थत्वान्न प्रवासः ॥१३॥

इति वैतानकल्पे द्वितीयेऽध्याये द्वितीया कण्डिका ॥

[७]

सायंप्रातरग्निहोत्रम् ॥१॥[6]

अग्निहोत्रम् इति कर्मनाम। तस्य कालादिभेदेन प्रयोगभेदेऽपि फलैक्यात् कर्मैकत्वम्। कर्मैक्याच्च सायंप्रातर्होमयोरन्तरा नान्यत् कुर्यात्। आहत्य[7] विहितं 'तु तत्कुर्यात्'[8] यस्याऽभिसंप्राप्तिः[9]। कृताऽऽधानस्य यावज्जीवम् अग्निहोत्रं भवति कर्तृधर्मत्वात् ॥१॥

१. °धेयीष्वि° वा. २. पुनातु मा भा[2]. (३) तु. काश्रौ ४, १०,८-१०; आपश्रौ ५,२१,५. (४) तु. कौसू १,३१-३४. (५) तु. काश्रौ ४,१०,१६; आपश्रौ ५, २२, १३; २५,२; बौश्रौ २, २०; कौसू १,३५. ६. तु. बौपि १,१:४. ७. अहत्य भा[1] A. ८-८. तु. कुर्यात् भा[3]; न कुर्यात् भा[1] A. ९. यथानि सांप्तिः मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गवीडां दोहयित्वाऽग्निहोत्रम् अधिश्रयति ॥२॥

'यजुःप्रायश्चित्तविधानेनोद्धृतेष्वग्निष्वग्निहोत्रीं' धेनुं ब्राह्मणेन दोहयित्वा अग्निहोत्राय पयो गार्हपत्येऽधिश्रयति ॥२॥

अभ्यवज्वाल्य समुद्वान्तम् आद्भिः प्रत्यानीयोदग् उद्वासयति॥३॥

अभ्यवज्वालनं प्रज्वालनम्। पर्यग्निकरणमित्येके। समुद्वान्तं समुद्गमनम्। अद्भिः प्रत्यानीयाद्भिराप्याय। उदग् उद्वासयति उदक्षम् उद्वासयति ॥३॥

अग्निपरिस्तरणं पर्युक्षणम् ऋतं त्वा (तैब्रा २,१,११,१; कौसू ३,४) इति ॥४॥

अग्नीनाम् एव ॥४॥

गार्हपत्याद् आहवनीयम् उदकधारां निनयति— अमृतमस्यमृतममृतेन संधेहि इति ॥५॥

"गार्हपत्याद् आरभ्याहवनीयं यावद् उदकधारां निनयति" ॥५॥

स्रुक्स्रुवं प्रक्षालितं प्रतपति निष्टप्तम् (कौसू २,९) इति ॥६॥

स्रुक्स्रुवमिति द्वन्द्वैकवद्भावाद् सह प्रतपनम् ॥६॥

स्रुवेण स्रुचि ग्रहान् उन्नयति ॥७॥

स्रुचि अग्निहोत्रहवण्याम् ओं भूः शं भूत्यै त्वा (कौसू ३,११) इत्यादिभिश्चतुरो ग्रहान् उन्नयति गृह्णाति। ग्रहानिति नामधेयत्वाद् सधर्मकान् ॥७॥

---

१. तु. काश्रौ ४, १४, १-२; आपश्रौ ५, २२, १३; ६, ३, १०; ५, ६-७. २-२ यजुः प्रायश्चित्तविधाने हृतेष्वग्निहोत्रं भा॰. A. ३. अभिज्वाल्य भा॰ A G. ४. समुदन्तम् इति गोब्रा, आश्रौ, आपश्रौ. ५. तु. गोब्रा १,३,११;१२; काश्रौ ४,१४,५; आपश्रौ ६, ६,२-३;६-९; आश्रौ २, ३,८. ६. समुद्वान्तं A. ७. समुद्ध्वीसनं भा॰ A; समुद्वादनं भा॰. ८. अग्निः परि॰ भा॰ A भा॰. ९. तु. काश्रौ ४,१३, १५-१६; आपश्रौ ६, ३,५;५,४. १०. तु. काश्रौ ४, १३,१६; आपश्रौ ६,५,५. ११-११. नास्ति A. १२. तु. काश्रौ ४,१४,७; आपश्रौ ६,७,१. १३. तु. काश्रौ ४,१४,१०; आपश्रौ ६,७,५-६.

समिदुत्तरां स्रुचं मुखसंमिताम् उद्गृह्याऽऽहवनीयम् अभिप्रक्रामति इदमहं यजमानं स्वर्गं लोकम् उन्नयामि इति ॥८॥

उपरिष्टाद् 'समिद् यस्याः स्रुचस्तां' समिदुत्तरां स्रुचं मुखसंमिताम् उद्गृह्य मुखमात्रं यावद् उत्क्षिप्याऽऽहवनीयम् अभिमुखं प्रक्रामति गच्छति ॥८॥

बर्हिषि निधाय समिधम् आदधाति अग्निज्योतिषं त्वा वायुमतीं प्राणवतीं स्वर्ग्यां स्वर्गायोपदधामि भास्वतीम् इति ॥९॥

स्रुचं बर्हिषि निधायाहवनीये समिधम् आदधाति अग्निज्योतिषम् इति ॥९॥

सूर्यज्योतिषम् इति प्रातः ॥१०॥

प्रातरग्निहोत्रे सूर्यज्योतिषम् इति मन्त्रविकारः ॥१०॥

प्रदीप्ताम् अभिजुहोति सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या जुषाणो अग्निर्वेतु स्वाहा इति ॥क॥

प्रज्वालितां समिधम् अभिमुखोऽग्निहोत्रं जुहोति। अभिशब्देऽप्यग्नावेव प्रदीप्तवचनात्। नाहुत्वावर्तिनं यज्ञप्रायश्चित्तेषु वचनात् ॥क॥

सजूरुषसा इति, जुषाणः सूर्यः इति प्रातः ॥ख॥ ॥११॥

प्रातरग्निहोत्रे सजूरुषसा इति मन्त्रविकारः। सजूरुषसा इति प्रथमे वचने, जुषाणः सूर्यः इति द्वितीये ॥ख॥११॥

अयं मा लोकोऽनुसंतनुताम् इति गार्हपत्यम् अवेक्ष्य प्रजापते न त्वदेतान्यन्यः (अ ७,८५[८०],३) इति मनसैव पूर्णतराम् उत्तरां जुहोति ॥१२॥

---

१. तु. काश्रौ ४, १४, १२; आपश्रौ ६, ८, ५-१०. २-२. समित्स्या स्रुवस्या भा॰. A; समित्स्यात् स्रुवस्या भा॰. ३. तु. काश्रौ ४, १४,१३-१४; आपश्रौ ६,९,४, १०, ८. ४. स्रुवं भा॰ A. ५. ता हुत्वा वर्तिन A. नाहुत्वावर्त्तिन भा॰. ६. यजुप्राय॰ भा॰. ७. तु. काश्रौ ४, १४,१६-१७; आपश्रौ ६,१०,११,१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयं मा लोकः इति गार्हपत्यम् अवलोक्य प्रजापते न त्वद् इत्यनेन मन्त्रेण मनसैव बह्वन्नवतीं[1] द्वितीयाम् आहुतिम् आहवनीय एव जुहोति। एवकारोऽत्रधारणार्थः। तेन सर्वत्र प्रजापतिदैवतो[2] मनसैव प्रयोक्तव्यः। उत्तरामिति संबन्धिशब्दाद् द्वाभ्याम् आहुतिभ्यां प्रयोगसिद्धिः ॥१२॥

स्रुचं[3] त्रिरुदञ्चम् उन्नयति रुद्रान् प्रीणामि इति ॥१३॥[4]

हुत्वा स्रुचम् उदङ्मुखीं त्रिरूर्ध्वं नयति ॥१३॥

बर्हिषि निधायोन्मृज्योत्तरतः पाणी निर्मार्ष्टि ओषधिवनस्पतीन् प्रीणामि इति ॥१४॥[5]

स्रुचं[6] बर्हिषि निधाय पाणिभ्याम् ऊर्ध्वं मार्जयित्वोत्तरतः स्रुचो[7] बर्हिषि पाणी निर्मार्ष्टि ॥१४॥

द्वितीयम् उन्मृज्य पित्र्युपवीतं कृत्वा[8] दक्षिणतः पितृभ्यः स्वधां करोमि इति ॥१५॥[9]

पुनरुन्मृज्य पित्र्युपवीती स्रुचो दक्षिणतः बर्हिषि पाणी निर्मार्ष्टि। देवकर्मशेषत्वाद् यज्ञोपवीतत्वे प्राप्ते मन्त्रलिङ्गाच्छ्रुतेश्च पित्र्युपवीतग्रहणम् ॥१५॥

अपराग्न्योः काम्यम् अग्निहोत्रं नित्यम् इत्याचार्याः ॥१६॥

गार्हपत्यदक्षिणाग्न्योः पुष्ट्यादिकामयोगेनाऽग्निहोत्रं पूर्वाचार्या नित्यमेव मन्यन्ते ॥१६॥

गार्हपत्ये समिधम् आधाय स्थाल्याः स्रुवेण जुहोति इह पुष्टिं पुष्टिपतिर्दधातु, इह प्रजां रमयतु प्रजापतिः। अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा इति ॥१७॥[10]

१. वद्भवता भा[1] A; काश्रौ ४,१४,१७ भूयसीं; आपश्रौ ६,११,१ वर्षीयसीं. २. °पतिदैवता भा[1]. A. ३. स्रुवं G. ४. तु. काश्रौ ४, १४, १९; आपश्रौ ६, ११, ३. ५. तु. काश्रौ ४, १४,१९-२०; आपश्रौ ६, १०,११. ६. स्रुवं भा.[1] ७. स्रुचौ भा[1] A. ८. नास्ति भा[1] A. ९. तु. काश्रौ ४, १४, २१; आपश्रौ ६, १३, १-९. १०. तु. काश्रौ ४, १४, २२-२३; आपश्रौ ६, १३, २.

तूष्णीं समिधम् आधायाऽग्निहोत्रश्रपण्याः स्रुवेण जुहोति ॥१७॥

उक्तोत्तरा ॥१८॥[1]

आहवनीये योत्तरोक्ता साऽत्राप्युत्तरैव भवति ॥१८॥

दक्षिणाग्नौ अग्नयेऽन्नादायाऽन्नपतये स्वाहा इति पूर्वा ॥१९॥

पूर्वेति संबन्धिशब्दाद् उत्तरा गार्हपत्यवत् ॥१९॥

सत्यं त्वर्तेन (कौसू ६,२०) इति पर्युक्ष्य स्रुवं स्रुचं बर्हिश्चोत्तरेणाग्निं निदधाति ॥२०॥[2]

अग्निम् [3]आहवनीयम् उत्तरेण बर्हिःस्रुवस्रुगासादनम्[3] ॥२०॥

स्रुक्शेषं प्राऽश्नाति ॥२१॥

प्राणान् प्रीणामि इत्युपस्पृश्य गर्भान् इति द्वितीयम्। विश्वान् देवान् इत्यन्ततः सर्वम् ॥क॥

तदभावे संप्रदायः (कौसू १,७) इति प्राशनानन्तरम् प्राप्तम् अप्याचमनं विधीयते भक्षे अनाम्नातश्रुतप्रायश्चित्तप्राप्त्यर्थम्, गर्भान् [4]इति द्वितीयम्[4]। विश्वान् देवान् इति तृतीयम्। तत्र सामान्यात् प्रीणात्यनुषङ्गः। सर्वमिति निःशेषबोधनार्थम्[5] ॥क॥

अप्रक्षालितयोदकं स्रुचा निनयति सर्पेतरजनान् इति ॥ख॥

स्रुच्युदकं प्रासिच्य निनयत्युत्तरेणाऽग्निं प्रकृतत्वात् ॥ख॥

बर्हिषा[6] प्रक्षाल्य सर्पपुण्यजनान् इति द्वितीयम् ॥ग॥

उक्तेन बर्हिषा स्रुचं प्रक्षाल्य तत्रैवोदकं निनयति ॥ग॥

गन्धर्वाप्सरसः इत्यपरेण तृतीयम् ॥घ॥ ॥२२॥[7]

अपरेणाऽऽहवनीयं स्रुचा तृतीयम् [8]उदकं निनयति[8] ॥घ॥ ॥२२॥

१. तु. काश्रौ ४, १४, २४. २. तु. काश्रौ ४, १४, २९; आपश्रौ ६, १४,१. ३-३. °नीयं बर्हिःस्रुचासा° भा[1] A; °नीयं बर्हिरुत्तरेण स्रुच आसा° भा[2]. ४-४. नास्ति मूको. ५. निबोध° मूको. ६. बर्हिषि G. ७. तु. काश्रौ ४, १४, २७; २८; आपश्रौ ६, १२, २; ४; हिश्रौ ३, ७, ९९. ८-८. °दकेन नि° भा[1]. °दके भा[1] A

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तर्षीन् इति 'स्रुचं स्रुवं च प्रतपति'[1] ॥२३॥[2]

आहवनीये प्रतपति । निर्देशस्य पृथक्त्वात् पृथक् प्रतपनम् । सर्वत्र श्रीणात्यनुषङ्गः उक्तहेतुत्वाद् अधिकाराच्च ॥२३॥

'दक्षिणान् नयामि'[3] इति स्रुग्दण्डम् अवमार्ष्टि । प्रातरुन्मार्ष्टि ॥२४॥[4]

प्रातरग्निहोत्रे पाणिनैवोन्मार्ष्टि ॥२४॥ [illegible]

√ब्राह्मणोक्तम् अग्न्युपस्थानम् ॥२५॥

तत्राग्निहोत्रं हुत्वा रात्रिं रात्रिम् अप्रयातं भरतः (अ १९,५५,१-२) इति द्वाभ्यां यथाकालम्[5] आहवनीयम् उपतिष्ठते । सायं सायं गृहपतिर्नो अग्निः इति (अ १९,५५,३-४) द्वाभ्यां गार्हपत्यम्, अपश्चाद् दग्धान्नस्य भूयासम् (अ १९, ५५,५-६) इति द्वाभ्यां दक्षिणाग्निं[6] प्रातर्मन्त्रैः, दर्शेनेष्ट्वा पौर्णमासेन चैते ? इति ब्राह्मणोक्तम् अग्न्युपस्थानं भवति । मन्त्राश्चारणवैद्यानां पठ्यन्ते ॥२५॥

अथ गवीडादिश्रेषे तस्यै तस्यै देवतायै जुहुयात् ॥२६॥[7]

अथेति नैमित्तिकाधिकारार्थः । गवीडाद्यवपत्त्याऽग्निहोत्रस्य[8] श्रेषे तस्यां 'तस्यामवपत्त्यां या या देवता'[9] श्रुतौ पठ्यते तस्यै तस्यै देवतायै आज्यं जुहुयात् । चतुर्थ्यन्तेन देवतापदेन, तस्यै तस्या इति चतुर्थीनिर्देशात् ॥२६॥ [illegible]

इति वैतानकल्पे द्वितीयेऽध्याये तृतीया कण्डिका ॥

[८]

त्रयोदश्याम् आग्नावैष्णवम् एकादशकपालं निर्वपेद् दर्शपूर्णमासावारिप्स्यमानः[10] अग्नाविष्णू (अ ७, ३० [२९], १) इति ॥१॥[11]

१-१. स्रुवं स्रुचं प्रतितपति भा[1] वा G. २. तु. काश्रौ ४, १४,२८;२९; आपश्रौ ६, १२, ६. ३-३. °र्णां नया° भा[1,2] A. ४. तु. गोब्रा १, ३,१२. ५. तु. काश्रौ ४, १५, २९; यथाकालमयतस्त्विरे मूको. ६. °णाग्नौ मूको. ७. तु. गोब्रा १,३,१२. ८. °डाद्यवस्वस्त्याग्नि° मूको. ९-९. तस्यामेव स्वायां या त(या भा[2])दे° मूको. १०. °वारिप्समाण वा. पू. ११. तु. काश्रौ ४, ५, २१; आश्रौ ५, २३,४-५.

आधानदिवसात् त्रयोदशेऽहनि अन्यस्मिन् वा दर्शपूर्णमासयोः द्व्यह- 'कालत्तानुपरोधेन दर्शपूर्णमासाऽऽरम्भप्रयोगम्'[1] आग्नावैष्णवम् एकादशकपालं पुरोडाशं निर्वपेत् । निर्वपतिरागमवचनः[2] । तत्र होमम् अनुमन्त्रयते । दर्शपूर्णमासाविति समाननिर्देशः सहाऽऽरम्भार्थः । तेनोभयोरप्येकैवाऽऽरम्भणीयेष्टिः । श्रुतिरपि सहारम्भणम् आह उभौ सहाऽऽरम्भावित्याहुः (गोब्रा २,१, १२) इति । परिभाषासिद्धम् अपि देवताविधानं नियमार्थम् । अत्र ब्राह्मणत्वाद् वा न दोषः । सर्वत्र देवतादिविधानेष्वेवं द्रष्टव्यम् ॥१॥

पूर्वं पौर्णमासम् आरभमाणः सरस्वत्यै च[3] चरुं सरस्वते द्वादशकपालं सरस्वति व्रतेषु (अ ७, ७०, [६८], १), यस्य व्रतम् (अ ७, ४१, [४०], १) इति ॥२॥[4]

प्रथमं पौर्णमासं प्रयुञ्जान[5] एतस्याम् एवाऽऽग्नावैष्णव्याम् आरम्भणीयम् अपरं हविर्द्वयं सरस्वत्यै चरुं सरस्वते द्वादशकपालं पुरोडाशं निर्वपेत् । एवं त्रिहविषि[6] इयम् इष्टिर्भवति । चकारस्याचार्यार्थत्वात् । यथाक्रमं च होमाऽनुमन्त्रणम् । एवं च पौर्णमास्याधाने दर्शपूर्वता । अमावास्याऽऽधाने[7] पौर्णमासपूर्वता[8] । नक्षत्राऽऽधाने तु यथान्यायम् । अन्ये तु यज्ञक्रमं[9] दर्शपूर्णमासयोर्द्व्यहकालतां चाऽनादृत्याऽस्मिन्नेवाऽऽधानाद्धि सप्तमे[10] आरम्भणीयां कृत्वा दर्शपूर्णमासौ प्रयुञ्जते । दर्शपूर्वताऽऽचार्यपक्षः तथैव सूत्रितत्वात् । संहिताविधौ चाऽमावास्याऽऽधाननियमेऽपि दर्शाऽऽरम्भार्थम् आसीत् ।

कालस्यापि दर्शकर्मणः सद्यो विधानाद् अपरेद्युरग्निं चेन्द्राग्नी च यजेतेति । दर्शपूर्णमासप्रकरणे तु पूर्णमासपूर्वत्वविधानम् या पूर्वा पौर्णमासी सानुमतिः (कौसू १,२९) इति कालश्रुतिपाठाऽनुरोधात् । भाष्यकारेण च संहिताविधौ दर्शपूर्वत्वं प्रतिपाद्य श्रौतयज्ञक्रमबलात् पूर्णाहुतेरनन्तरं सायंहोमो व्याख्यातः । कालस्यातीतता[11] च । अनतीतत्वं तु यस्य सायमहुतम् अग्निहोत्रं प्रातरादित्योऽभ्युदयात् का च प्रायश्चित्तिरिति प्रायश्चित्तविधानात् ॥२॥

१-१. °धेनादर्श° मूको. २. °ति एगंव° भा[1] A, °तिरागव° भा[2], ३. नास्ति भा[1] A. ४. तु. काश्रौ ४, ५, २१; आपश्रौ ५, २३, ४-५. ५. प्रयोज्यमास मूको. ६. °हविषि भा[1] A. ७. अमावा° A. ८. °मास्यपू° भा[1] A. ९. तु. गोब्रा १, ५, ७, २, १, १२. १०. सप्त मूको. ११. °तीतया मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आधानाद् व्यृद्धिश्चेद् अर्वाक् संवत्सराद् रोहिण्याम् उत्सृज्याऽग्नि-होत्रं पुनर्वस्वोः पुनरादधीत ओं भूर्भुवः स्वर्जनदोम् इति ॥३॥[1]

आधानाद् अनन्तरं यद्याहिताग्नेर्धनादिविनाशेन [2]विगतर्धित्वात् ततो नैमित्तिकमाह[2]—रोहिण्यां नक्षत्रेऽग्निहोत्रस्योत्सर्गं कृत्वा पुनर्वसुनक्षत्रे पुनराधानं करोति। आधानमन्त्रविधानं परिसंख्यार्थम्। तेन यावद् उक्तमेवाऽऽधानमन्त्रो भवति। शेषं समानम्। पुनराधाने अङ्गं तु सर्वशाखाप्रत्ययात्। संहिताविधौ तु कल्पे कर्त्रेति संवत्सरस्तम्यां शान्त्युदकम् (कौसू ७२, ३१) इत्यादि भवति। अरणिनाशादौ तु [3]ब्रह्मौदनसंबन्धाश्वदेवनवर्जं[3] पुनराधानम्। गोबन्धनादि षट्संपातान्तं[4] पूर्ववदेव भवति।

तथा च भाष्यम्—पिड्याग्नेर्ज्येष्ठाग्नेश्च [5]विधानम् अमावास्यायां[5] वा। शमनं क्रव्याच्छमनवद् भवति विधानशेषत्वात्। अग्न्याधानप्रकरणे तूद्देश आधानाङ्गक्रव्याच्छमनेतिकर्तव्यताप्रसङ्गो वर्जनार्थः। पुनराधाने[6] च सवाभा-वोऽब्रह्मौदनसंबन्धात्। गोबन्धनादि तु षट्संपातान्ते भवत्येवेति ॥३॥[7]

ओषधीषु पक्कास्वाग्रयणेष्टिः ॥४॥[8]

इष्टिरित्येकवचनाद् द्रव्यादिभेदेऽप्येकैवेष्टिः ॥४॥

इदावत्सराय (अ ६, ५५, ३) इति पुरस्ताद्धोमसंस्थितहोमेष्वा-वपेत ॥५॥[9]

एतस्याम् इष्टौ पुरस्ताद्धोमेषु संस्थितहोमेषु चैताम् ऋचम् आवपेत ॥५॥

अग्न इन्द्रः (अ ७, ११५ [११०], १) इत्याग्नेन्द्रम् ॥क॥

द्वादशकपालहोमम् अनुमन्त्रयते ॥क॥

ऐन्द्राग्नं च इन्द्राग्नी अस्मान् (कौसू ५,२) इति ॥ख॥ ॥६॥[10]

१. तु. काश्रौ ४,११,३;५; आपश्रौ ५,२६,३;२७,३;५;९. २-२. विगतारि-जित्वान्तो निमितकर्माह भा[1] A; विगतारिज्वित्वात्ततो निमित्तिकमाह भा[2]. ३-३. रात्रौदंतसंबन्धांश्च (न्धाश्च भा[1] A) वेदा नवर्ज मूको. ४. तु. कौसू ६९,२; °तातातं मूको. ५-५. विधानामावास्यांवा भा[1] A. ६. न पुन° भा[1]. ७. तु. कौसू ७०-७२. ८ तु. काश्रौ ४, ६, १; आपश्रौ ६, २९, २; ३०, १२. ९. तु. गोब्रा २,१,१७. १०. तु. गोब्रा २,१,१७; काश्रौ ४,६,१; आपश्रौ ६, २९,१०.

यदि ऐन्द्राग्नम् इन्द्राग्नी अस्मान् इत्यर्द्धर्चेनाऽनुमन्त्रयते। कल्पजार्धर्चेनेत्येव[1] शब्दसामान्यम् ॥६॥

यद् विद्वांसः (अ ६, ११५, १), द्यावापृथिवी उपश्रुत्या (अ २, १६, २), सोमो वीरुधाम् (अ ५, २४, ७) इति वैश्वदेवद्यावा-पृथिवीयसौम्यान् ॥७॥[2]

वैश्वदेवश्चरुः, द्यावापृथिवीय एककपालः, सौम्यश्चरुः। एतेषां यथाक्रमं होमान् अनुमन्त्रयते ॥७॥

फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुञ्जीत ॥८॥[3]

प्रयुञ्जीताऽऽरभेत। चातुर्मास्यानीति वैश्वदेवादीनां कर्मणां नामधेयम्। नामधेयत्वाच्चैकद्विकल्पनेऽपि चातुर्मास्यशब्दप्रवृत्तिः ॥८॥

पूर्वेद्युर्वैश्वानरपार्जन्येष्टिर्वा अग्ने वैश्वानर (अ २, १६२, ४), अभि क्रन्द स्तनय (अ ४, १५, ६) इति ॥९॥

फाल्गुन्याः पौर्णमास्याः पूर्वेद्युर्विकल्पेनेष्टिर्निगम्यते[4]। तस्यां द्वादशकपालस्य चरोश्च यथाक्रमं होमम् अनुमन्त्रयते ॥९॥

वैश्वदेवे निर्मथ्यं प्रहृतं भवतं नः समनसौ (मा ५, ३) इत्यनुमन्त्रयते ॥१०॥[5]

वैश्वदेवे पर्वणि निर्मथ्यम् अग्निम् आहवनीये प्रक्षिप्तम् अनुमन्त्रयते ॥१०॥

अग्नावग्निः (अ ४, ३९, ९) इति होमम् ॥११॥[6]

प्रहरणानन्तरं होमम् अनुमन्त्रयते ॥११॥

एवं निर्मन्थनम् ॥१२॥

यत्र यत्र निर्मन्थनं तत्र तत्रैवं प्रहृतहोमाऽनुमन्त्रणे भवतः। यथा वरुणप्रघासादौ पश्वादिषु च ॥१२॥

१. कल्पजर्चर्चेत्येक° भा[1] A; कल्पवर्जत्येक भा[2]. २. तु. काश्रौ ४, ६, २-५; आपश्रौ ६, २९, १०-११. ३ तु. गोब्रा २, १, १९; काश्रौ ५, १, १; आपश्रौ ८,१,२. ४. °ष्टिर्विगयते भा[1] A, °ष्टिर्विगम्यते भा[2]. ५. तु. कौसू १०८,२; काश्रौ ५, २, ५; आपश्रौ ७,१३,६; ८, २, १३. ६. तु. काश्रौ ५, ३,६; आपश्रौ ७,१३,५; ८,२,१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आग्नेयं सौम्यं सावित्रं सारस्वतं पौष्णं मारुतं [1]वैश्वदेवं द्यावापृथिवीयम् अग्निर्वनस्पतीनाम् (अ ५, २४, २), सोमो वीरुधाम्[1] (अ ५, २४, ७), सविता [2]प्रसवानाम् (अ ५, २४, १), सरस्वति व्रतेषु (अ ७, ७० [६८], १), प्रपथे पथाम् (अ ७, १० [९], १), मरुतः पर्वतानाम्[2] (अ ५, २४, ६), विश्वे देवा मम (अ ९, २, ७ᶜᵈ), द्यावापृथिवी दातॄणाम्[3] (अ ५, २४, ३) इति ॥१३॥[4]

आग्नेयोऽष्टाकपालः, सौम्यश्चरुः, सावित्रो द्वादशकपालः, सारस्वतश्चरुः, पौष्णश्चरुः, मारुतः सप्तकपालः, वैश्वदेवी पयस्या, द्यावापृथिव्य एककपालः। एतेषाम् अष्टानां हविषां यथाक्रमं होमान् अनुमन्त्रयते। विश्वे देवाः (अ ९, २, ७ᶜᵈ) इत्यर्धर्चः। सर्वा ऋग् वा इत्येके बहुवल्लिङ्गात् ॥१३॥

वाजिनस्य अर्वाचीनं वसुविदम् (अ ३, १६, ६ᶜᵈ) इति ॥१४॥[5]

वाजिनस्य होमम् अर्वाचीनं वसुविदम् इत्यनुमन्त्रयते ॥१४॥

तस्य प्राणभक्षान्[6] भक्षयन्ति होत्रध्वर्युब्रह्माग्नीध्राः, प्रत्यक्षं यजमानः। मिथः समुपहूय ॥

यन्मे रेतः प्रसिच्यते[7] यद्वा मे अपगच्छति[8],
यद्वा जायते पुनस्तेन मा शिवमाविश।
तेन मा वाजिनं कृणु तेन सुप्रजसं कृणु,
तस्य ते [9]वाजिपीतस्योपहूतस्योपहूतो[9] भक्षयामि ॥ इति प्रकृतिः ॥१५-१६॥[10]

१-१. नास्ति A. २-२. नास्ति A. ३. तु. W [अ. टि.]; दात्राणाम् G C; दात्रेणाम् भा[1] A. ४. तु. गोश्रा २,१,२०; काश्रौ ५,१,४-१४; आपश्रौ ८, २, २. ५. तु. आपश्रौ ८,३,६-१०. ६. प्राणभक्षं आश्रौ. लाश्रौ. द्राश्रौ. ७. प्रसिंचति ब वा पू; प्रसिच्यति G. ८. अपिग° वा. ९-९. वाजिपीतस्योपहूतो G. १०. तु. आश्रौ २, १६, १९; आपश्रौ ८, ३, १५-१६; लाश्रौ ४, १२, १५. द्राश्रौ १२,४,२०-२२;

तस्य हुतशेषस्य वाजिनस्य होत्रादयः परस्परं सहोपह्वानं कृत्वा यन्मे रेतः इति प्राणभक्षान् भक्षयन्ति। प्रत्यक्षभक्षं यजमानः। आनन्तर्यांऽवगम्येऽपि[1] वाजिनस्य भक्षणे तस्येतिवचनम् अन्यत्रापि वाजिनस्याऽयं भक्षणविधिर्यथा स्यात्। होत्रध्वर्योर्ग्रहणं क्रमार्थम्। इति प्रकृतिः, इति एतद् वैश्वदेवं वरुणप्रघासादीनां प्रकृतिर्भवति। प्रकृतिविधानं[2] नवप्रयाजाद्यर्थम् ॥१५-१६॥

आषाढ्यां वरुणप्रघासेष्वग्न्योः प्रणीयमानयोः अग्ने प्रेहि (अ ४, १४, ५) इति जपन्नेति[3] ॥१७॥[4]

अध्वर्युप्रतिप्रस्थातृभ्याम् अग्न्योः प्रणीयमानयोर्दक्षिणतः अग्ने प्रेहि (अ ४, १४,५) इति जपन्नेति व्रजति ॥१७॥

दक्षिणम् अग्निम् उपविशति ॥१८॥

अग्न्योर्यो दक्षिणोऽग्निस्तं दक्षिणतो विधिवद् उपविशति ॥१८॥

पुरस्ताद् अतिव्रज्योत्तरेऽग्नौ हुत्वा दक्षिणे जुहोति ॥१९॥[5]

दक्षिणस्याग्नेः पूर्वेण गत्वा उत्तरेऽग्नौ पुरस्ताद्धोमान् हुत्वा दक्षिणे चाग्नौ जुहोति ॥१९॥

अतिचारं पृष्ट्वा पत्नीम् इदम् आपः प्रवहत (अ ७, ९४ [८९], ३) इति मार्जयन्ति ॥२०॥[6]

पतिम् अतीत्याऽन्येषु चारोऽतिचारः। ताम् अध्वर्युणा पृष्टां [7]पत्नीं मार्जयन्ति[7] ॥२०॥

पौष्णान्तान् पञ्च ॥२१॥[8] ऐन्द्राग्नं वारुणं मारुतं कायं वरुणोऽपाम् (अ ५, २४, ४), य आत्मदाः (अ ४, २, १) इति ॥२२॥[9]

वैश्वदेववत् पौष्णान्तान् पञ्च होमान्, तथैन्द्राग्नस्य द्वादशकपालस्य वारुण्या आमिक्षायाः मारुत्याः पयस्याया दक्षिणवेद्यग्नौ हूयमानायाः

---

१. अनन्तर्या वगमे भा[1] A. २. सा प्रकृतिवि° भा[1] A. ३. जपन्नन्वेति ?C. ४. तु. काश्रौ ५, ४, २-७; आपश्रौ ८, ५, २२. ५. तु वैता २, १०; ९, १०. ६. तु. काश्रौ ५, ५, ५-९; आपश्रौ ८, ६, १९-२२. ७-७. पत्नीमावर्जय° भा[1] A. ८. तु. गोश्रा २, १, २१; वैता ८, १३; आपश्रौ ८, ६, २८. ९. तु. गोश्रा २, १, २२; काश्रौ ५, ४, २०-२१; आपश्रौ ८, ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कायस्य एककपालस्य उत्तरेऽग्नौ । एतानेव यथाक्रमं होमान् अनुमन्त्रयते । पौष्णान्तानां[1] मारुतस्य च वैश्वदेवान्मन्त्राः, ऐन्द्राग्नस्य प्रकृतेः ॥२१-२२॥

[2]अवभृथः सोमात्[2] ॥क॥[3]

अत्रावगन्तव्यः [4]सोमलिप्तहोमकृष्णाजिननिधाने, अपाम[4] सोमम् (ऋ ८, ४८, ३) इति च ऋचं वर्जयित्वा[5] अर्थलोपात् ॥क॥[6]

अन्तरेण[7] वेदी विष्णुक्रमाः ॥ख॥ ॥२३॥

वेद्योर्मध्ये विष्णुक्रमान् क्रमते यजमानः ॥ख॥२३॥

इति वैतानकल्पे द्वितीयेऽध्याये चतुर्थी कण्डिका ॥

[९]

कार्तिक्यां साकमेधाः ॥१॥[8]

भवन्तीति ॥

पूर्वेद्युरिष्ट्याम् अग्नेरनीकवतः अचिक्रदत् (अ ३,३, १) इति ॥क॥

कार्तिक्यां पूर्वेद्युः प्रातरिष्ट्याम् अग्नेरनीकवतः संबन्धिनम् अष्टाकपालहोमम् अनुमन्त्रयते ॥क॥

मध्यंदिने सांतपनानां मरुतां सांतपना इदम् (अ ७, ८२ [७७], १) इति ॥ख॥

मध्यंदिन इष्ट्यां सांतपनानां मरुतां चरुहोमम् अनुमन्त्रयते ॥ख॥

---

१. पौष्णान्तान् मूको. २-२. अवभृथसोमात् G [तदनु 'सोमावभृथात् =सौमिकाद् अवभृथात्' इति C विवृतिः]. ३. तु. काश्रौ ५, ५, २८-२९; भाश्रौ ८,११, ७-८. ४-४. °जिनानिधानापाम मूको. ५. नास्ति मूको. ६. तु. वैता २३, २२; २४, २; ५; भाश्रौ १४, २०, ११. ७. अन्तरा च. ८. तु. काश्रौ ५, ६,१; आपश्रौ ८, ९,१.

सायं गृहमेधिनां तिग्मम् अनीकम् (अ ४,२७,७) इति ॥ग॥ ॥२॥[1]

सायमिष्ट्यां गृहमेधिनां मरुतां क्षीरौदनस्य होमम् अनुमन्त्रयते ॥ग॥२॥

आज्यभागादीडान्ता ॥३॥[2]

इयं गृहमेधीयेष्टिराज्यभागादीडान्ता भवति । आद्यन्तवचनं पुरस्ताद्धोमसंस्थितहोमदेशविध्यर्थम् ॥३॥

श्वो भूते पूर्णदर्व्यं[3] पूर्णा दर्वे (अ ३, १०, ७) इति ॥४॥[4]

श्वो भूते पौर्णमास्यां पौर्णदर्वहोमम् अनुमन्त्रयते ॥४॥

क्रीडिनां मरुतां कृष्णं नियानम् (अ ६, २२, १) इति ॥५॥[5]

इष्टौ क्रीडिनां मरुतां सप्तकपालस्य होमम् अनुमन्त्रयते ॥५॥

माहेन्द्र्यां षड् ऐन्द्राग्नान्तान् ॥६॥[6] माहेन्द्रं वैश्वकर्मणं ये भक्षयन्तः (अ २, ३५, १) इति ॥७॥[7]

माहेन्द्र्यां प्रधानेष्टौ ऐन्द्राग्नान्तान् षट् वरुणप्रघासवत् । तथा [8]माहेन्द्रम् एकादशकपालम्[8], वैश्वकर्मणम्[9] एककपालम्[10] । एतान् अष्टौ होमान् अनुमन्त्रयते । माहेन्द्रम् अत्र प्रकृतिः ॥६-७॥

पित्र्यायाम् आज्यभागान्तं दैवावृत् ॥क॥

पित्र्यायाम् इष्टावाज्यभागान्तं यावद् दैवावृत् सर्वं भवति ॥क॥

---

१. तु. गोब्रा ३, १,२३; काश्रौ ५, ६, २; ३; ६; आपश्रौ ८, ९, १;२; ५;८. २. तु. काश्रौ ५, ६,१६-२६; आपश्रौ ८, ११, ४-७. ३. पूर्वदर्वा मा[1] पू; पूर्णदर्वं G [तु. माश्रौ १,७,५,२९ प्रभृ.]; पूर्णादर्व्या? गोब्रा २, १,२३. ४. तु. गोब्रा २,१,२३; काश्रौ ५,६,३०; आपश्रौ ८,११,१८-२१. ५. तु. गोब्रा २,१,२३; काश्रौ ५,७, १; आपश्रौ ८, ११,२२. ६. तु. गोब्रा २, १,२३; काश्रौ ५,७,६; आपश्रौ ८, १२, ३; वैता ८, १३; २२. ७. वैता १, ३; गोब्रा २, १,२३; काश्रौ ५, ७, ९-१०; आपश्रौ ८, १२, ४. ८-८. ऐन्द्रस्यैकादशकपालस्य मूको. ९. वैश्वकर्मणः मा[1,2]. १०. एककपालस्य मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोमाय पितृमते (अ १८, ४, ७२), पितृभ्यः सोमवद्भ्यः (अ १८, ४, ७३) वा बर्हिषदः पितरः (अ १८, १, ५१), उपहूता नः पितरः (अ १८, ३, ४५), अग्निष्वात्ताः पितरः (अ १८, ३, ४४), अग्नये कव्यवाहनाय (अ १८, ४, ७१) इति ॥ख॥ ॥८॥

पुरस्ताद्धोमान् दक्षिणाग्नेरतिप्रणीते जुहोति ॥९॥[1]

प्रथमे यो 'विकल्पः स होतुः[2] पितृदेवताऽऽवाहननिमित्तः। बर्हिषदः पितरः इत्यादयश्च त्रयः। एवं चतुरः पुरस्ताद्धोमान् प्रत्याम्नायकान् दक्षिणाग्नेः सकाशाद् अतिप्रणीतेऽग्नौ प्राङ्मुखो जुहोति। अस्युप्रप्रकृष्टत्वात्[3] प्रणयने[4] अग्ने प्रेहि (अ ४, १४, ५) इति जपो न भवति[5] ॥ख॥८-९॥

दक्षिणेनाऽग्निम्[6] अतिक्रम्य प्रत्यङ्ङ् उपविशति ॥क॥

दक्षिणतस्तस्याऽग्नेर्गत्वा प्रत्यङ्मुखो विधिवद् उपविशति ॥क॥

उत्तरेण यजमान आग्नीध्रश्च[7] ॥ख॥ ॥१०॥

उत्तरेणाऽग्निम् अतिक्रम्य प्रत्यङ्मुखो यजमान उपविशत्याग्नीध्रश्च ॥ख॥ ॥१०॥

अस्तु स्वधा इति प्रत्याश्रावयति ॥११॥[8]

आनन्तर्यात् प्रत्याश्रावणसंबन्धाच्चाऽऽग्नीध्रः। प्रत्याश्रावणं तिष्ठतः परिभाषितत्वात्[9] ॥११॥

तदपि श्लोकौ वदतः—

पित्र्यायां प्राङ्मुखो ब्रह्मा हुत्वा होमान् पुरोगमान्।
गत्वा तु दक्षिणेनाग्नेः प्रत्यङ्ङासीत[10] कर्मणि ॥१॥
आग्नीध्रो यजमानश्चोत्तरेण तु तावुभौ।
अस्तु स्वधेति वक्तव्यं प्रत्याश्रावणमत्र तु ॥२॥ इति ॥१२॥

---

(१). तु. गोब्रा २, १, २४; काश्रौ ५, ८, ९-१२; ९,२-९; आपश्रौ ८, १३, १५-१६. २-२. विकल्पो हो° मूको. ३. °प्रमृष्टत्वात् मूको. ४. पतायने मूको. ५. तु. वैता ८,१७;१५,७. ६. दक्षिणाग्निम् भा[१,२] A. ७. C. उत्तरेण सूत्रेण संयोजयितुकामः द्र. ८. तु. गोब्रा २,१,२४; काश्रौ ५,९,९; आपश्रौ ८, १५,११. ९. तु. वैता १,९;१०. १०. तु. C.; °सीद मूको.

तदेतद् पुरस्ताद्धोमाद्युक्तं[1] ब्राह्मणपठितौ श्लोकावपि मूर्तः ॥१२॥

इडाम् अवजिघ्रन्ति[2] ॥१३॥[3]

घ्राणेन। बहुवचनात् सर्वे ॥१३॥

परिषिक्ते दैवावृत् ॥क॥

अध्वर्युणा विमिते परिषिक्ते दैवावृत् सर्वा भवति ॥क॥

शंय्वन्ता[4] ॥ख॥ ॥१४॥

प्रथमं शंय्वन्ता इयम् इष्टिर्भवति। [5]कारणतो व्यतिक्रमः[5] स्यात्। अन्तवचनं संस्थितहोमदेशविध्यर्थम् ॥ख॥१४॥

विमितान्निष्क्रामन्तो जपन्ति अया विष्ठा (अ ७, ३, १) इति ॥१५॥[6]

विमिताद् यस्मिन् पित्र्येष्टिः कृता। बहुवचनात् सर्वे ॥१५॥

प्राञ्चोऽभ्युत्क्रम्य उदस्य केतवः (अ १३, २, १) इत्यादित्यम् उपतिष्ठन्ते[7] ॥१६॥[8]

[9]प्राङ्मुखाः प्रक्रम्योपतिष्ठन्ते[9] ॥१६॥

दक्षिणाञ्चो दिवं पृथिवीम् (अ ३, २१, ७) इत्यग्नीन् ॥१७॥[10]

दक्षिणाञ्चोऽभ्युत्क्रम्याऽग्नीन् सर्वान् उपतिष्ठन्ते[11] ॥१७॥

अथोदञ्चश्चतुष्पथे त्रैयम्बकं यो अग्नौ (अ ७, ९२ [८७], १) इति ॥१८॥[12]

अथेति त्रैयम्बकाऽधिकारार्थम्। उदञ्चोऽभ्युत्क्रम्य चतुष्पथे त्रैयम्बकं पुरोडाशहोमम् अनुमन्त्रयन्ते ॥१८॥

---

१. °मात्युक्ते (क्त A.) भा[१,२]. २. °घ्रेति भा[१,२]; °घ्रेति A. G. (३). तु. गोब्रा २१,२४; काश्रौ ५, ९, १०; ११; आपश्रौ ८, १५,१५-१६. ४. °युवन्ता पू वा. ५-५. कारतो दधिक्रम मूको. ६. तु. कौब्रा ५, ७; शांश्रौ ३, १६, २७; १७,१; गोब्रा २, १, २५; आपश्रौ ८, १६,५. ७. °तिष्ठते ब वा भा[१,२] A. ८. तु. गोब्रा २,१,१५; कौब्रा ५,७. ९-९. प्राङ्मुखः प्रक्रम्योपतिष्ठते मूको. १०. तु. गोब्रा २,१,२५. ११. °तिष्ठते मूको. १२. तु. गोब्रा २, १,२५ काश्रौ ५,१०,७; आपश्रौ ८,१७,१२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यजमानार्यजनाः सव्यहस्तपुरोडाशा' दक्षिणान् ऊरून् आघ्नानाः त्रिः प्रसव्यम् अग्निम् अनुपरियन्ति त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् (ऋ ७, ५९, १२) इति ॥१९॥†

दक्षिणहस्तपुरोडाशाः प्रदक्षिणम् ॥२०॥

अनुपरियन्ति[३] प्रदक्षिणं यथादृष्टम् ॥२०॥

'मूतयोः प्रमुक्तयोः' यो नः स्वः (अ १, १९, ३) इति जपति ॥२१॥[४]

'पुरोडाशमूतयोः'† अध्वर्युणा प्रतिवापितयोर्जपति' ॥२१॥

दक्षिणावृत आव्रजन्ति ॥२२॥[६]

गृहान् आगच्छन्ति ॥२२॥

अथाऽऽदित्येष्टिः[७] ॥२३॥[८]

अथेत्यानन्तर्यार्थः । आदित्येष्ट्यां चरुहोमम् अनुमन्त्रयते अदितिर्द्यौः (अ ७,६,१) इति ॥२३॥

फाल्गुन्यां शुनासीर्यम् ॥२४॥[९]

फाल्गुन्यां पौर्णमास्यां शुनासीर्यं पर्व भवति ॥२४॥

पुनःप्रयोगे पूर्वेद्युः ॥२५॥[१०]

पुनश्चातुर्मास्यप्रयोगे फाल्गुन्याः पौर्णमास्याः पूर्वेद्युः शुनासीर्यं भवति।

१-१ तु. लाश्रौ C. च; °मानार्यजनात्सव्यहस्तःपु° वा भा[१ २] A; °मानार्यजनात् ॥१८॥ स° G. २-२. नास्ति भा[१] A. † तु. वैता ९, ९; लाश्रौ ५, ३, ६-७; काश्रौ ५; १०, १३-१४; आपश्रौ ८, १८,२-३. ३-३. नास्ति भा[१] A. ४. तु. काश्रौ ५, १०, १८; आपश्रौ ८,१८, ७-९. ५-५. पुरोडाशा° A. † = पुरोडाशसहितमूतयोरिति मृतयोरध्वर्युणा प्रतिपादितयोर्भवति मूको.; (मूतो वंशादिनिर्मिता करण्डिका)। ६. तु. काश्रौ ५,१०,२०; आपश्रौ ८,१८,१०. ७. नास्ति भा[१] A. ८. तु. गोब्रा २, १, २५; आपश्रौ ८,१९, १-४. ९. तु. काश्रौ ५,११,१; आपश्रौ ८,२०,१. १०. तु. गोब्रा २,१,२६; काश्रौ ५,११,१७; माश २, ६,३,१०-१३; आपश्रौ ८, २१,६.

तस्मिन्नेवाऽहनि पुनः[१] प्रयोगार्थं विकल्पेनैव वैश्वानरपार्जन्येष्टिर्भवति ॥२५॥

पौष्णान्तान् पञ्च[२] ॥२६॥ वायव्यं शुनासीर्यं सौर्यम् एकया च (अ ७, ४, १), शुनासीरेह (अ ३, १७, ७), सूर्यश्चक्षुषाम् (अ ५, २४, ९) इति ॥२७॥[३]

तत्र शुनासीर्ये पर्वणि पौष्णान्तान् वैश्वदेववत् पञ्च । वायव्यं च यवाग्वा, शुनासीर्यस्य एकादशकपालस्य, 'सौर्यस्य एककपालस्य'[४]। एतान् अष्टौ होमान् यथाक्रमम् अनुमन्त्रयते ॥२६-२७॥

इति वैतानकल्पे द्वितीयेऽध्याये पञ्चमी कण्डिका ॥

[१०]

अथ पशौ वैष्णवं पूर्णहोमम् उरु विष्णो (अ ७,२७ [२६], ३°-६) इति ॥१॥[५]

अथेत्यधिकारे । पशाविति कर्मनाम । तत्र पशौ इज्यार्थं[६] पूर्णहोमम् अध्वर्युणा हूयमानम् अनुमन्त्रयते ॥१॥

अरातीयोः (अ १०, ६, १) इति यूपं वृश्च्यमानम्[७] अनुमन्त्रयते ॥२॥[८]

वृश्च्यमानं[७] छिद्यमानम् ॥२॥

यत्त्वा शिक्वः (अ १०, ६, ३) इति प्रक्षाल्यमानम् ॥३॥[९]

अनुमन्त्रयते ॥३॥

अक्षते व्यक्षते (अ १८, ३, १८) इत्यभ्यज्यमानम् ॥४॥[१०]

१. नास्ति भा[१] A. २. तु. वैता ८,१३. ३. तु. काश्रौ ५,११,४-६; १०;११; आपश्रौ ८, २०, ३-५. ४. सौर्यैक° मूको. ५. तु. काश्रौ ६,१,४; आपश्रौ ७, १, ७. ६. युज्यार्थं मूको. ७. वृक्षमानं वा पू. भा[१ २] A. ८. तु. काश्रौ ६,१,१४;१५; आपश्रौ ७, २, ७. ९. तु. आपश्रौ ७, ९, ९. १०. तु. काश्रौ ६, २, २१; आपश्रौ ७,१०,२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घृतेनाऽभ्यज्यमानम् ॥४॥

खाक्तं मे (अ ७, ३१[३०]) इत्याज्यमानम् ॥क॥

अञ्जनेनाऽऽज्यमानम् ॥क॥

गन्धप्रवादाभिरनुलिप्यमानम् ॥ख॥ ॥५॥

गन्धैरुपलिप्यमानम्। यस्ते गन्धः (अ १२, १, २३-५२) इति गन्धप्रवादाः ॥ख॥५॥

यत्ते वासः (अ ८, २, १६) इति परिधाप्यमानम् ॥६॥[1]

परिधाप्यमानम्[2] परिधास्यमानम्, रशनया परिवीयमानम्[3] ॥६॥

वनस्पते स्तीर्णम् (अ १२, ३, ३३) इति बर्हिष्यासाद्यमानम् ॥७॥

वनस्पतिः सह (अ १२, ३, १५), यस्यां सदः (अ १२, १, ३८) इत्युच्छ्रीयमाणम् ॥८॥[4]

द्वाभ्याम् ऊर्ध्वम् उच्छ्रीयमाणम् ॥८॥

धर्ता ध्रियस्व (अ १२,३,३५) इति पादेनाऽवटे निधीयमानम् ॥९॥[5]

[6]गर्ते प्रक्षिप्यमाणम्[6] ॥९॥

विष्णोः कर्माणि (अ ७,२७[२६],६-७) इति द्वाभ्याम् उच्छ्रितम् ॥१०॥[7]

ऊर्ध्वं कृतम् ॥१०॥

समिद्धो अद्य (अ ५, १२) इति प्रयाजान् ॥११॥[8]

प्रयाजहोमान् यथाक्रमम् अनुमन्त्रयते ॥११॥

---

१. तु. पद्मा ४, ४,१४; कौसू ५४,५-७. २. नास्ति भा². ३. तु. आपश्रौ ७, ११, ४-५; परिधीय° मूको. ४. तु. काश्रौ ६,३,७; आपश्रौ ७, १०, ७; C. °स्यते इति विमृश्यम् । ५. तु. काश्रौ ६,३,८; आपश्रौ ७,१०, ८. ६-६. गर्तेष्वप्यप्र° भा¹ A. ७. तु. आपश्रौ ७, १०,९. ८. तु. काश्रौ ६,४, ७-१०; आपश्रौ ७, १४, ६-८; आश्रौ ३,२,६; शाश्रौ ५,१६,६.

[1]नाराशंसिनां देवो देवेषु (अ ५,२७,२;३) इति द्वितीयम् ॥१२॥[1]†

प्रयाजहोमम् अनुमन्त्रयते[1]। देवो देवेषु इति द्व्यवसाना[2] प्रयोगावसानात्[3] ॥१२॥

ऊर्ध्वा अस्य (अ ५, २७) इतीष्टकापशौ[4] ॥१३॥[5]

इष्टकापशुश्रपणे। तत्र ऊर्ध्वा अस्य' इति समिदादियथार्थलिङ्गसमवेतैः प्रयाजहोमान् अनुमन्त्रयते। बर्हिर्मन्त्रे गुणवृत्त्या लिङ्गसमवायः। एवं च ऊर्ध्वा अस्य (अ ५, २७, १[ab]), द्युमत्तमा (अ ५, २७, १[cd]), अच्छायम् (अ ५, २७,४), द्वारो देवीः (अ ५, २७, ७), [6]दैवा होतारः[6] (अ ५, २७, ९[ab]), देव त्वष्टः (अ ५, २७,१०[bc]) इति षड् एकावसाना[7] भवन्ति। यथालिङ्गम् इत्याचार्येणोक्तम्। एवं कर्मलिङ्गा मन्त्राः (कौसू १, ४) इति परिभाषितत्वादिति भाष्यकारः। अतश्च तनूनपात् सलिङ्गपरेऽन्यतरस्य[8] यजमानस्य[9] कुलवशेनाऽभ्युद्धारो[10] न भवति ॥१३॥

आ नयैतम् (अ ९, ५, १) इत्याद्याञ्जनान्तम् ॥१४॥[11]

[12]आ नयैतम्[12] इत्यपराजिताद् अजम् आनीयमानम् अनुमन्त्रयते (कौसू ६४, ६) ॥१४॥

इन्द्राय भागम् (अ ९, ५, २) इति यथादेवतम्[13] ॥१५॥[14]

य ईशे (अ २, ३४, १) इति प्रमुच्यमानम् अनुमन्त्रयते ॥१६॥

नीयमाने प्रमुच्यमानहोमाञ्जुहुयात्—

प्रमुच्यमानो भुवनस्य गोप पशुर्नो अत्र प्रति भागमेतु ।
अग्निर्यज्ञं त्रिवृतं सप्ततन्तुं देवो देवेभ्यो हव्यं वहतु प्रजानन् ॥१॥

१-१. नास्ति भा¹; †तु. शाश्रौ ५, १६, ७. २. मुद्रितसंहितायां तु द्व्यवसानाभावः द्र. ३. प्रयोगवसानात् मूको. ४. इष्टकाः ॥१३॥ पशावा न° G. ५. तु. काश्रौ १६,१,१२; आपश्रौ १६, ७,९. ६-६. °व्या होतारा मूको. (तु. मा २७, २९). ७. मुद्रितसंहितायां त्वेकावसानाभावः द्र.। ८. लिङ्गपरं (र भा²) न्यत° मूको. ९. °मानः मूको. १०. °भ्युद्धारे मूको. ११. तु. कौसू ६४, ६-१७. १२-१२. पश्येः आ न° भा¹ A; पशोः आ न° भा². १३. °दैवतं वा. १४. तु. कौसू ६४,७.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यौ ते दंष्ट्रौ क्षुदिहौ रोपयिष्णू जिह्मायेते[1] दक्षिणा सं च पश्यतः ।
अनाष्ट्रं नः पितरस्तत्कृणोत[2] यूपे बद्धं प्रमुमुचिमा[3] यदन्नम् ॥२॥
अहस्तस्त्वमभिजुष्टः परेहीन्द्रस्य गोष्ठमपिधाव[4] विद्वान् ।
धीरासस्त्वा कवयः संमृजन्त्विषमूर्जं यजमानाय दत्त्वा ॥३॥
(पै ५,२८,१-३) इति ॥१७॥

शामित्रदेशे नीयमाने पशौ त्रीन् होमान् जुहोति[5] ॥१७॥

[6]शास्यमाने प्रदक्षिणम् आवर्तन्ते ॥१८॥

बहुवचनात् सर्वे ॥१८॥

वपायाः जातवेदो वपया इति ॥क॥

जातवेदो [7]वपया गच्छ (कौसू ४५,११) इति[7] होमम् अनुमन्त्रयते ॥क॥

शंभुमयोभुभ्यां चात्वाले मार्जयन्ति ॥ख॥ ॥१९॥[8]

शंभुः शं नो देवीः (अ१,६,१), मयोभुः आपो हि ष्ठा मयोभुवः (अ १,५,१)। अल्पाच्तरत्वात्पूर्वनिपातः । प्रयोगस्तु यथाक्रमम् ॥ख॥ ॥१९॥

ऐन्द्राग्नं पुरोडाशम् आवदानिकं च ॥२०॥[9]

ऐन्द्राग्नं पशुपुरोडाशहोमं च पश्ववदानहोमं[10] च प्राकृतेनाऽनुमन्त्रयते ॥२०॥

संप्रेषित आग्नीध्रः शामित्राद् औपयजान् अङ्गारान् होतुः पुरस्ता-न्निर्वपति[11] ॥२१॥[12]

अध्वर्युणा संप्रेषित आग्नीध्रः शामित्राद् अग्नेः [13]उपयद्होमान्…अङ्गारान्[13] होतुः पुरस्तान्निर्वपति । प्रतिप्रस्थाता होमं करोति । होतुः पूर्वतः निर्वपति[14] ॥२१॥

---

१. निर्हृयेते वा पू. २. कृणोतु वा. ३. मुमुचिम G. ४. °पिधाम वा; °भिधाम पू. ५. जुहुयात् भा[1] A. ६. शाम्य° वा पू. ७-७. वपाया गच्छदिति भा[1] A; वप…दिति भा[2]. ८. तु. काश्रौ ६,६, २२;२७; आपश्रौ ७,२१,१-२;६. ⑨ तु. काश्रौ ६,७,१९-२८; ८, १-७; आपश्रौ ७,२२, १०-१२;२३,३-११. १०. स्ववदा° मूको. ११. निवपति पू G. १२. तु. काश्रौ ६,९,७-८; आपश्रौ ७, २६, ८-९. १३-१३. उपयवहोम … वैनंगा° भा[1] A; उपयवहोमान्…वंनंगा°. भा[2]. १४. नियति मूको.

हृदयशूल उपमिते अप्सु ते राजन् (अ ७, ८८ [८३]) इति जपन्ति ॥२२॥[1]

अप्सु ते राजन् इति चतुर्ऋचं सूक्तं हृदयशूल उपनिखाते । बहु-वचनात् सर्वे ॥२२॥

ऐन्द्राग्नेनेष्ट्वा काम्यः पशुः पशुः[2] ॥२३॥

इत्यथर्ववेदे वैतानसूत्रे द्वितीयोऽध्यायः समाप्तः ॥

अभ्यासोऽध्यायपरिसमाप्त्यर्थः ।

इति कौशिकीये वैतानकल्पे सोमादित्यस्वाक्षेपानु-
विधौ द्वितीयेऽध्याये षष्ठी कण्डिका ॥
द्वितीयोऽध्यायः समाप्तः[1] ॥

पुस्तकालय

---

१. तु. काश्रौ ६,१०, १-३; आपश्रौ ७, २७,१५-१६ २. [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ तृतीयोऽध्यायः

[११]

सोमेन यक्ष्यमाणः 'ऐन्द्राग्नम् उस्रम् अनुसृष्टम्'[1] आलभेत यस्य पिता पितामहः सोमं न पिबेत् (गोब्रा २, १, १६) ॥१॥[2]

सोम इति कर्मनामधेयम् । नामधेयस्य र ? प्रवृत्तिनिमित्तं 'या...[3] यागस्तदग्निष्टोमः । ऐन्द्रावायव्यादीनि सोमद्रव्यसाध्यानि प्रधानानि । कर्माणि । दीक्षणीयादीनि तु तदङ्गानि । यक्ष्यमाणो यागं करिष्यमाणः । ऐन्द्राग्नम् इन्द्राग्निदैवतम्[4] उस्रं [मा अनुसृष्टं धुमहर्वह] ? पुनर्वहनाऽसमर्थम् [5]आलभेत । तेन यागं कुर्वीत । यस्य पिता पितामहो वा सोमं न पिबेत् तस्यैहैतमिति । [कप्रथगुदेशे येकवाजोपातव्यद्] ? उभयोरेवासोमयोरयं पशुर्भवति ॥१॥

ऋत्विजो वृणीते ॥क॥

सोमेन 'यक्ष्यमाण ऋत्विजः'[6] ब्रह्माऽऽद्यान् वृणीते यज्ञकर्मकर्तृतया[7] स्वीकुरुते[8] । वृणीते ऋत्विजः गृहीतमधुपर्कान्[9] । येन सोम (अ ६, ७,१) इति याजयिष्यन् सारूपवत्सम् अश्नाति (कौसू ४६,४) इति कर्म कुरुते, तथा निघने यजते (कौसू ४६,५) इति ॥क॥

अथर्वाऽङ्गिरोविदं ब्रह्माणम् । सामविदम् उद्गातारम् । ऋग्विदं होतारम् । यजुर्विदम् अध्वर्युम् ॥ख॥ ॥२॥[10]

तं तमेव वेदविदम्[11] इत्येतत्क्रमेण ऋत्विजं वृणीते । ब्रह्मवेदविद् (वैता १,१) इति परिभाषितेऽप्यथर्वाङ्गिरोविदम् इत्यनुचरार्थम् । उदितस्य विधानं तु प्राधान्याद् इति हि भाष्यकारः ॥ख॥२॥

१-१. °नास्ति G. २. तु. पुनरुत्सृष्ट° तैसं २, १, ५, ५; °ग्नमनुसृष्ट° मैसं २,५, ५; काश्रौ ७,१,६; माश्रौ ५, २,१०,२५. ३-३. यागस्य तत्साम्यत्वं भा[1] A. ४. ऐन्द्राग्नीदै° मूको. ५. इतः प्रभृति प्रातरनुमन्त्रणं भवति (७भसूत्रवृत्तौ) इत्यन्तं यावत् नास्ति भा[2]. ६. °माणनित्वे मूको. ७. यजुकर्मवर्तया मूको. ८. स्वीकुरुतः मूको. ९. °पर्काः मूको. १०. तु. काश्रौ ७,१,७; आपश्रौ १०, १,१. ११. वेदम् मूको.

ब्राह्मणाच्छंसी पोताऽऽग्नीध्र इति ब्रह्मणोऽनुचराः सदस्यश्च । प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इत्युद्गातुः । मैत्रावरुणोऽच्छावाको ग्रावस्तुदिति होतुः । प्रतिप्रस्थाता नेष्टोन्नेतेत्यध्वर्योः ॥३॥[1]

इमान् यथोदितान् ब्रह्मादीनाम् अनुचरान् वृणीते ॥३॥

वसन्तादिषु यथावर्णम् ॥क॥[2]

सोमेन यजेतेति शेषः ॥क॥

देवयजनमित्युक्तम् ॥ख॥ ॥४॥

देवयजनम् (गोब्रा १, २,११; १४) इत्यादि ब्राह्मणोक्तं देवयजनं तद्यत्समं समूलं (कौसू ६०,१८) यद् उक्तं तद् अत्र प्रत्येतव्यम् ॥ख॥४॥

यस्य श्वभ्र ऊर्मो[3] वृक्षः[3] पर्वतो नदी पन्था वा पुरस्तात् स्यात् । न देवयजनमात्रं[4] पुरस्तात् पर्यवशिष्येत् (गोब्रा १,२,१४) ॥५॥

यस्य देवयजनस्य पुरस्ताद् एतेषु मध्येऽन्यतमत् पुरस्तात् स्यात् । न देवयजनमात्रं देवयजनस्य पुरस्ताद् देवयजनमात्रं तावत्परिमितां भूमिं न पर्यवशिष्येत् ॥५॥

सोमरूपाण्यनुध्यायेत् ॥६॥[5]

अथातः सोमरूपाणि (अप्राय ३, १) इत्युक्तानि अनुध्यायेद् ब्रह्मा ॥६॥

दीक्षणीयायाम्[6] आग्नावैष्णवम् ॥७॥[7]

दीक्षणीयायाम्[8] अग्निविष्णुदेवताकं हविर्भवति । तेन अग्नाविष्णू महि तद्वाम् (अ ७,३०[२९],१) इति प्रातरनुमन्त्रणं भवति । दीक्षिष्यमाणानां सोष्णोदकं शान्त्युदकम् (कौसू ५५,९-७) इत्यादिनिर्देशाद् उपनयनवद् भवति[9] ॥७॥

पत्नीसंयाजान्ता ॥८॥[10]

दीक्षणीयेष्टिर्भवति । अन्तवचनं सूक्तवाकार्थम्[11] ॥८॥

---

१. तु. काश्रौ ७,१,८-९; गोब्रा १,२, १९. २. तु. वैता ५,२. ३. अर्थः ?; वा पू; ऊशो G; कूर्मो BI जी. ४. °यजनं मूको. ५. तु. तैसं ४,४,९; मा ८,५४-५९. ६. °णीयाया भा[1] A. ⑦ तु. काश्रौ ७,२,२३; आपश्रौ १०, ४,२. ८. °याया मूको. ९. 'वति दण्डमात्रा स्वा भा[2]. १०. तु. काश्रौ ७, २, २५-२६; आश्रौ १०,४, ७. ११. सूक्तार्थः मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीक्षितः अभ्यञ्जनम् (अ ६, १२४, ३) इत्यभ्यज्यमानो जपति ॥९॥[1]

दीक्षणीयाया दीक्षितो नवनीतेनाऽभ्यज्यमानो जपति ॥९॥

पुनन्तु मा (अ ६, १९, १) इति पाव्यमानः ॥१०॥[2]

दर्भपवित्रैः पाव्यमानो जपति ॥१०॥

सुत्रामाणम् (अ ७,७[६],३) इति कृष्णाजिनम् उपवेशितः[3] ॥११॥[4]

निवेशितो[5] जपति । विवासित[6] आच्छादित इत्यर्थः ॥११॥

दीक्षिताऽऽवेदनात् कामं चरन्ति ॥१२॥[7]

दीक्षितोऽयं ब्राह्मणः इत्याऽऽवेदिते कामं यथेच्छं चरन्ति । [8]चरतिः गतिकर्मा[8] । कामशब्दात् तत्र 'न वाऽऽप्लवे' ॥१२॥

अस्तमिते वाग्विसर्जनाद् अस्तं यते नमः (अ १७, १, २३) इति नमस्कृत्य नक्षत्राणां मा संकाशश्च प्रतीकाशश्चावताम् (कौसू ८२, ११) इति नक्षत्राण्युपतिष्ठते ॥१३॥[10]

अस्तमिते आदित्ये अध्वर्युणा वाग्विसर्गे कारिते अधिकाराद् दीक्षितो मन्त्रोक्तां देवतां नमस्कृत्य नक्षत्राण्युपतिष्ठते ॥१३॥

दक्षिणेनाऽग्निं कशिप्वित्यादि वीक्षणान्तम् ॥१४॥[11]

दक्षिणत आहवनीयस्य कशिप्वास्तीर्येत्यादि[12] यावत्ते (अ १२,१,३३) इति वीक्षते । उन्नताच्च[12] इत्येवमन्तम् आग्रहायणीकर्मवद् इह भवति ॥१४॥

---

१. तु. काश्रौ ७,२,३०-३१; आपश्रौ १०,६,१२-१३. २. तु. काश्रौ ७,३,१; आपश्रौ १०,७,५-१४. ३. उपविशितः ब; °पवेसि° भा[11]. ४. तु. काश्रौ ७, ३, २१; आपश्रौ १०,९,३. ५. °वेसि° भा[1] A. ६. विवसितः मूको. ७. तु. काश्रौ ७,४,११-१२; आपश्रौ १०,११,५-६. ८-८. °तिगीतिक° मूको. ९-९. वासते भा[1] A; प्रसवे भा[2]. १०. काश्रौ ७,४,१३-१८; आपश्रौ १०,१२,३. ११. तु. काश्रौ ७, ४, ३४; आश्रौ १०, १५,९; १८,१-२. १२. तु. कौसू २४, २८-३४.

पुनः प्राणः (अ ६,५३,२) इति मन्त्रोक्तान्यभिमन्त्रयते ॥१५॥[1]

दीक्षित एव ॥१५॥

आदित्यस्य मा संकाशः । उद्यते नमः (अ १७, १, २२) इत्यादित्यम् उपतिष्ठते ॥१६॥

प्रथमेन मन्त्रेण मा संकाशः इत्याद्यनुषक्तो[2] न, स्वतन्त्रमन्त्रत्वात्[3] ॥१६॥

व्रतानि ॥१७॥

अप्रत्युत्थायिकादीनि [4]दीक्षितस्य भवन्ति[4] ॥१७॥

अप्रत्युत्थायिकः ॥क॥

अभ्यागताय प्रत्युत्थानं न करोति ॥क॥

अनभिवादुकः ॥ख॥ ॥१८॥[5]

अभिवादनशीलो न भवति ॥ख॥१८॥

न नाम गृह्णाति ॥क॥

नामाऽभिधानम्[6] । तन्न कस्यचिदुच्चारयति ॥क॥

विचक्षणोत्तरं ब्राह्मणस्य चनसितोत्तरं प्राजापत्यस्य[7] ॥ख॥ ॥१९॥[8]

[9]यज्ञार्थं यदि नाम गृह्णाति विचक्षणोत्तरं† ब्राह्मणस्य नाम गृह्णाति । चनसितशब्दोत्तरं[9] प्राजापत्यस्य । प्राजापत्यः क्षत्रियो वैश्यः शूद्रश्च । निदर्शनम्— अग्निनागशर्मन्!, विचक्षण!, इन्द्र!, गुप्त!, धर्म!, चनसित! इति । एवं हि [10]सत्या वागुदिता[10] भवति । अन्ये विचक्षणोत्तरमिति पञ्चमीसमासं वर्णयन्ति । विचक्षणाद् उत्तरं विचक्षणोत्तरम् । एवं [11]विचक्षणशब्दोत्तरं नाम[11] करोति ॥ख॥१९॥

---

१. तु. आपश्रौ १०,१८,३. २. तु. वैता ११,१३. ३. °मन्त्रवत् मूको. ४-४. ···कृतस्य भवति मूको. ५. तु. गोब्रा १,३,१९; काश्रौ ७, ५,४; आपश्रौ १०,१२,१४. ६. °धानं शब्दोत्तर भा[1]A. ७. नास्ति भा[2]. ८. तु. काठ १९, २; गोब्रा १,२,२१;३,१९-२३; कौसू ७९, ३२-३३; काश्रौ ७, ५, ६; आपश्रौ १०, १२, ७-८. ९-९ नास्ति भा[1] A. †. विचक्षणा° भा[1] A. १०-१०. सत्यो वाचागु° मूको. ११-११. °क्षणाशब्दनाम मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न दानहोमपाकाऽध्ययनानि ॥क॥[२]

करोतीति शेषः। होमा अग्निहोमादयः[३]। अग्निहोत्रस्य हि वसुनिषेधेनैव[३] निषिद्धत्वात्[४] ॥क॥

न वसूनि ॥ख॥ ॥२०॥[५]

वसून्यग्निहोत्रादीनि न प्रयुञ्जीत। अग्निहोत्रादीनि हि वसूनि संपदः[६]। द्वादश ह वै वसूनीत्युपक्रम्य न ह वै दीक्षितोऽग्निहोत्रं जुहुयादित्यादौ ब्राह्मणवादः[७] ॥ख॥२०॥

कृष्णाजिनं वसीत ॥२१॥[८]

वसीत आच्छादयेत्[९] ॥२१॥

कुरीरं धारयेत् ॥२२॥[१०]

उष्णीषम् ॥२२॥

मुष्टी कुर्यात् ॥२३॥[११]

उभयोर्हस्तयोः ॥२३॥

[१२]अङ्गुष्ठप्रभृतयस्तिस्र उच्छ्रयेत् ॥२४॥[१३]

उभयोर्हस्तयोर् अङ्गुष्ठप्रभृतयस्तिस्रस्तिस्रोऽङ्गुल्यः, [१४]ता ऊर्ध्वं[१४] कुर्यात् ॥२४॥

मृगशृङ्गं गृह्णीयात् ॥क॥

कृष्णमृगशृङ्गं धारयेत् ॥क॥

तेन कषेत ॥ख॥ ॥२५॥[१५]

तेन शृङ्गेण कण्डूयेत् ॥ख॥२५॥

---

१. तु. आपश्रौ १०, १४, ३-७. २. अग्निहोत्रहो° A. ३. यस्त्वनि° मूको. ४. निषेधत्वात् मूको. ५. तु. गोब्रा १, ३, २१. ६. स्तपंत्तो मूको. ७. तु. गोब्रा १,३, २१. ८. तु. काश्रौ ७, ३, १७-२१; आपश्रौ १०, ६, ४-६. ९. छाद° मूको. १०. तु. काश्रौ ७,३,२४; आपश्रौ १०, ९,५; ९. ११. तु. काश्रौ ७, ३,५-७; आपश्रौ १०,११,३-४. १२. इत आरभ्य कण्डिकान्तपर्यन्तं पाठो नास्ति A. १३. तु. काश्रौ ७, ३,८; आपश्रौ ९,१२,५. १४-१४. त्र्यङ्गुल्यः मूको. १५. तु. काश्रौ ७,३,२४-२८; आपश्रौ १०, ९,७-१०,३.

यस्य वाग्वाऽयता स्यान्मुष्टी [१]वाऽवसृष्टौ[१] स एतानि जपेत् ॥२६॥[२]

यस्य दीक्षितस्य वाग्वा असंयता[३] असंस्कृता भवति। मुष्टी वा व्यवगतसंसर्गौ भवतः स दीक्षित एतान्यग्निहोत्रं च मा इत्यादीनि यजूंषि जपेत् ॥२६॥

इति वैतानकल्पे तृतीयेऽध्याये प्रथमा कण्डिका ॥

[१२]

अग्निहोत्रं च मा पौर्णमासश्च यज्ञः पुरस्तात् प्रत्यञ्चम् उभौ कामप्रौ भूत्वा क्षित्या सहाविशताम्। वसतिश्च माऽऽमावास्यश्च यज्ञः पश्चात् प्राञ्चम्। मनश्च मा पितृयज्ञश्च यज्ञो दक्षिणत उदञ्चम्। वाक्च मेष्टिश्चोत्तरतो दक्षिणाञ्चम्। रेतश्च माऽन्नं चेत ऊर्ध्वम्। चक्षुश्च मा पशुबन्धश्च यज्ञोऽमुतोऽर्वाञ्चम् इति ॥१॥

उभौ कामप्रावित्यादि सर्वत्रानुषङ्गः साकांक्षत्वात् ॥१॥[४]

दीक्षान्ते च वसुसंपत्तये ॥२॥

अत्र दीक्षाणामन्ते चैतानि जपेद् अग्निहोत्रादिवसुसंपत्त्यर्थम्[५] ॥२॥

नैनं बहिर्वेद्यभ्युदियान्नाऽभ्यस्तमियात्[६] ॥क॥

एनं दीक्षितं बहिर्वेदिस्थं यथाऽऽदित्यो नाऽभ्युदियान्नाऽस्तमियात् तथा[६] कुर्यात्।

[७]नाऽधिष्ण्ये प्रतपेत्[७] ॥ख॥ ॥३॥[८]

अधिष्ण्येऽग्नौ न प्रतपेत् ॥ख॥ ॥३॥

सत्यं वदेत् ॥४॥

प्राप्ते विधानं वक्ष्यमाणप्रायश्चित्तनियमार्थम् ॥४॥

१-१. वा विसृ° गोब्रा G. २. तु. गोब्रा १, ३, २१. ३. अनंयंता मूको. ४. मूको. अतः परं कण्डिकासमाप्तिः द्र. ५. तु. गोब्रा २,५,४. ६. यथा मूको. ७-७. नास्ति भा[१] A. ८. तु. कौब्रा १७,७; गोब्रा २, ५,४; आपश्रौ १०,१५,५-६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]व्रतलोपे यद् अस्मृति (अ ७, १११ [१०६], १) इत्यग्निम् उपतिष्ठते ॥५॥

अप्रत्युत्थायिकादिव्रतलोप आहवनीयम् उपतिष्ठते ॥५॥

सत्यं बृहत् (अ १२, १, १) इति लोष्टम् आदाय शुद्धा न आपः (अ १२, १, ३०abc) इति मूत्रपुरीषे क्षारयति ॥क॥

दीक्षित एव [2]रात्रौ समये[2] शुद्धा न आपः इति त्रिभिः पादैः [3]मूत्रं पुरीषं[3] च क्षारयति ॥क॥

पवित्रेण पृथिवि (अ १२, १, ३०d) इति लोष्टेनाऽऽत्मानम् उत्पुनाति ॥ख॥ ॥६॥[4]

पादेनोत्पुनाति[5] ॥ख॥ ॥६॥

य ऋते चिद् अभिश्रिषः[6] (अ १४, २, ४७) इति शीर्णं दण्डाद्यभिमन्त्रयते ॥क॥

शीर्णमीषद् भग्नम् ॥क॥

स्वप्नेषूक्तम्[7] ॥ख॥

परोऽपेहि (अ ६, ४५, १); यो न जीवः (अ ६, ४६, १) इति स्वप्नं दृष्ट्वा मुखं विमार्ष्टि (कौसू ४६, ९) इत्याद्युक्तं करोति ॥ख॥

दिवो नु माम् (अ ६, १२४, १) इति च ॥ग॥ ॥७॥

पराचीनं दिवो नु माम् इति [8]वीध्रबिन्दून् प्रक्षालयति (कौसू ४६, ४१) इति सूत्रोक्तं[8] करोति ॥ग॥ ॥७॥

यद् अत्राऽपि मधोरहं निरष्ठविषम्[9] अस्मृतम् ।
अग्निश्च तत्सविता च पुनर्मे जठरे धत्ताम् ॥ इति जाम्बील-

१. इतः प्रभृति दशमसूत्रपर्यन्तं नास्ति भा². २-२. त्रिरात्रौ समाय मूको. ३-३. नास्ति मूको. ४. तु. काश्रौ ७, ४, ३१-३३; आपश्रौ १०, १३, ९. ५. वामेनो° मूको. ६. नास्ति वा G. ७. तु. काश्रौ २५, ११, २१. ८-८. वीध्रकालयतेति मन्त्रोक्त मूको. ९. निर् √ष्ठु (=ष्ठिव्) इत्यस्य लुङि रूपं द्र.

स्कन्दन आत्मानम् अनुमन्त्रयते ॥८॥[1]

[2]जाम्बीलं मुखम् । लालास्रावे[2] आत्मानम्[3] अनुमन्त्रयते ॥८॥

यद् अत्राऽपि रसस्य मे परा पपाताऽस्मृतम् ।
तद् इहोपह्वयामहे तन्म[4] आप्यायतां पुनः ॥ इति रेतसः ॥९॥[5]

रेतःस्कन्दने आत्मानम् अनुमन्त्रयते ॥९॥

परोऽपेहि (अ ५, ७, ७) इत्यशस्तशंसने ॥१०॥

अप्रशस्तप्रशंसने आत्मानम् अनुमन्त्रयते ॥१०॥

अश्मन्वती (अ १२, २, २६) इत्यपां तरणे ॥११॥[6]

[7]चौरादिसंतापाद् अपां[7] तरणे आत्मानम् अनुमन्त्रयते ॥११॥

अपः समुद्रात् (अ ४, २७, ४) इत्यनाच्छादिताभिवर्षणे ॥१२॥[8]

अनाच्छादितं दीक्षितं यद्यभिवर्षेत तत्राऽऽत्मानम् अनुमन्त्रयते ॥१२॥

अव ज्याम् इव (अ ६, ४२, १) इति क्रोधे ॥१३॥

क्रोध उत्पन्न आत्मानम् अनुमन्त्रयते ॥१३॥

ऋतुमतीं जायां सारूपवत्सं श्रपयित्वाऽभिघार्योद्वास्योद्धृत्याऽभिहिंकृत्य गर्भवेदनपुंसवनैः संपातवन्तं पराम् एव प्राशयेत् ॥१४॥[9]

दीक्षितस्य सारूपवत्साया गोः पयसि स्थालीपाकं गृह्याऽग्नौ श्रपयित्वाऽभिघार्योदगुद्वास्य पात्रान्तरे उद्धृत्य आभिमुख्येनौदनस्योपरि हिंकारं कृत्वा येन वेहत् (अ ३, २३; ५, २५; कौसू ३५, १) इति [अर्यमा दीनः] ? शमीमश्वत्थः (अ ६, ११, १; कौसू ३५, ८) इत्येतैर्गर्भवेदनपुंसवनैः संपातवन्तं कृत्वा

१. तु. गोब्रा १, २, ७; काश्रौ २५, ११, २७; आपश्रौ १०, १३, १०. २-२. जाम्बीलमुखं ललाटे मूको. ३. यजमानम् मूको. ४. तन्मा G. ५. तु. गोब्रा १, २, ७; काश्रौ २५, ११, २२; आपश्रौ १०, १३, ११. ६. तु. काश्रौ २५, ११, २३. ७-७. °दिमन्त्रौतादपां भा² A. ८. तु. काश्रौ २५, ११, २४. ९. तु. गोब्रा १, ३, २३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जायाम् ऋतुमतीं परां स्नातां प्राशयेत्। एवशब्दान्नाऽस्नाताम्[१]। एवं [२]दीक्षिता जाया[२] पुत्रं लभेतेति ब्राह्मणम् (तु. गोब्रा १,३,२३) ॥१४॥

इति वैतानकल्पे तृतीयेऽध्याये द्वितीया कण्डिका ॥

[१३]

तिस्रो दीक्षाः ॥क॥

त्रीणि[३] दीक्षाऽहानि भवन्ति ॥क॥

अपरिमिता वा ॥ख॥

अपरिमितानि वा दीक्षाऽहानि[४] भवन्ति सर्वशाखाप्रत्ययात् ॥ख॥

द्वादशाऽहीनस्य[५] ॥ग॥ ॥१॥

अहीनस्य द्वादश दीक्षाऽहानि भवन्ति । [६]स एष विधिः[६] सर्वशाखाप्रत्ययत्वेन ॥ग॥ ॥१॥

दीक्षाऽन्ते प्रायणीयायां[७] पथ्यायाः स्वस्तेरग्नेः सोमस्य सवितुरदितेः पथ्या रेवतीः (अ ३, ४, ७), वेदः स्वस्तिः (अ ७, २९ [२८], १) इति ॥२॥[८]

तिसृणाम् अपरिमितानां वा दीक्षाणाम् अन्ते प्रायणीयायाम् इष्टौ पथ्यायाः स्वस्तेराज्यहोमं द्वाभ्याम् अनुमन्त्रयते । अग्नेः सोमस्य सवितुर्होमान् उक्तैर्मन्त्रैः, अदितेश्चरुहोमं च ॥२॥

शंय्वन्ता ॥३॥[९]

इयम् इष्टिर्भवति । अन्तवचनं सूचनार्थम् ॥३॥

ध्रौवस्य पूर्णाहुतिम् यस्योरुषु (अ ७,२७ [२६],३)इति ॥४॥[१०]

ध्रौवस्य [११]यस्योरुषु इति पूर्णाहुतिम्[११] अनुमन्त्रयते ॥४॥

१. °ब्दात्प्राऽस्नातम् मूको. २-२. दक्षिणा(र्णा भा[१]) तीतयत् मूको. ३. त्रिदीक्षाः त्रीणि मूको. ४. °दीनि भा[१] A. ५. तु. काश्रौ ७, १, २४; आपश्रौ १०,१५,१. ६-६. हसविधिस° मूको. ७. °यायामिष्टौ भा[१,२] A. ८. तु. काश्रौ ७,५,१२-२०; आपश्रौ १०, २१, १-१३. ९. तु. काश्रौ ७,५, २२; आपश्रौ १०, २१,१३. १०. तु. काश्रौ ७,६,५-७; आपश्रौ १०,२२,१-७. ११-११. यस्य पूर्णा° भा[१] A.

निष्क्रम्य सोमक्रयणीं प्रपाद्यमानां दिवं च रोह (अ १३, १, ३४) इत्यनुमन्त्रयते ॥५॥[१]

[पत्नी सा] ? [२]निष्क्रम्य सोमक्रयणीम्[२] अध्वर्युणा सप्त पदानि प्रपाद्यमानाम् अनुमन्त्रयते ॥५॥

पदाऽभिहोमम् इडायास्पदम् (अ ३, १०, ६) इति ॥६॥

सोमक्रयिण्याः सप्तमे पदे पदाऽभिहोमम् अनुमन्त्रयते ॥६॥

उपरवदेशे चर्मणि सोमम् अभि त्यम् (अ ७, १५ [१४],१) इति हिरण्यपाणिर् विचिनोति ॥७॥[३]

उपरवाश्चत्वारो गर्ताः यस्मिन् देशे भविष्यन्ति स उपरवदेशः। तत्र चर्मणि [४]अध्वर्युणा न्युप्तं सोमं[४] हिरण्यहस्तो ब्रह्मा विधिना[५] तृणादि न्युदस्य तं[६] चिनोति ॥७॥

अयं सहस्रम् (अ ७,२३ [२२], १) इत्यनुमन्त्रयते ॥८॥

क्रीते कुरीरं निर्मुष्णाति ॥९॥

क्रीते सोमे कुरीरं दीक्षितोष्णीषं निर्मुष्णाति, अप्रदत्तं गृह्णाति ॥९॥

उदायुषा (अ ३, ३१, १०) इत्युत्तिष्ठति[७] ॥१०॥[८]

सोमप्रवहणाय[९] ॥१०॥

प्रोह्यमाणेऽप्रतिरथं जपति ॥११॥[१०]

शकटेन [११]हविर्द्धानेन रथेन[११] प्रोह्यमाणे नीयमाने सोमेऽप्रतिरथसूक्तं (अ १९,१३) जपति ॥११॥

१. तु. काश्रौ ७,६,१३-१५ आपश्रौ १०,२२,१०-१२. २-२. निश्रुमक्रयणीं भा[१] A. ३. तु. काश्रौ ७,६,१-६; आपश्रौ १०,२०,१३-१९. ४-४. °र्युणा-द्यपसो° मूको ५. विधियाति मूको. ६. व्यधेयस्य मूको. ७. °त्युपृति° भा[१] A. ८. तु. काश्रौ ७,९,३; आपश्रौ १०,२७,९. ९. सोमाय प्रवणाय भा[१] A; सोमप्रवणाय भा[२]. १०, तु. काश्रौ ७, ९, १२-१६; ११, १, ९; आपश्रौ १०, २९,१; १४,८,६. ११-११. हविर्घाने रथेन मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्रुवं ध्रुवेण (अ ७,९९ [९४], १) इति राजानं राजवहनाद् आसन्द्यां नीयमानम् अनुमन्त्रयते ॥१२॥[1]

राजानं [2]सोमवहनाद् अवतार्य शकटात् सोमम् आसन्द्यां नीयमानम् अनुमन्त्रयते ॥१२॥

दक्षिणेनाऽग्निम् आस्थापित आतिथ्यायां हविरभिमृशन्ति यज्ञेन यज्ञम् (अ ७,५,१) इति ॥१३॥[3]

सभायाम् आहवनीयाद् दक्षिणत आस्थापिते सोम आतिथ्यायाम् इष्टौ आसादितम् आतिथ्यं हविरभिमृशन्ति ॥१३॥

वैष्णवं विष्णोर्नु कम् (अ ७,२७ [२६], १) इति ॥१४॥[1]

वैष्णवस्य[4] नवकपालस्य होमम् अनुमन्त्रयते ॥१४॥

इडाऽन्ता ॥१५॥[5]

इयम् इष्टिर्भवति । अन्तवचनमित्युक्तम्[6] ॥१५॥

तानूनप्त्रपात्रे पञ्चकृत्वोऽवद्यन्त्याज्यम्[7] आपतये त्वा गृह्णामि परिपतये त्वा तानूनप्त्रे त्वा शाक्वराय त्वा शक्मन ओजिष्ठाय त्वा इति ॥१६॥[8]

तानूनप्त्राण्याज्यानि यानि[9] तानूनप्त्रमन्त्रयोगात् तानि यस्मिन् पात्रेऽवद्रीयन्ते तत् तानूनप्त्रपात्रम् । तस्मिन् आपतये त्वा इत्यादिभिः पञ्च पञ्चाज्यावदानानि सर्वेऽवद्यन्ति । [10]त्वेतिवचनात् गृह्णामीति[10] सर्वत्राऽनुषङ्गः ॥१६॥

---

१. तु. काश्रौ ७,९,२४; २७; आपश्रौ १०, ३०, १५. २-२. °मवाहना-वयसकृते सोमासं° भा[1] A; °मवहनाक्ष्यशकटे सोमासं° भा[2]. ३. तु. गोब्रा २, २,११; काश्रौ ८, १, ७-१३; आपश्रौ १०, ३१, ६-१५. ४. नास्ति मूको. ५. तु. वैता १३, ३. ५; तु. काश्रौ ८, १, १३; आपश्रौ १०, ३१, १५. ६. तु. वैता १३, ३. ४. °वद्यन्त्या° भा[2]. गोब्रा G C. ८. तु. गोब्रा २, २, ३; माश ३,४,२,९; काश्रौ ८, १,१५; १६; १९; आपश्रौ ११,१,१. ९. नास्ति भा[2]. १०-१०. ता एवेति सवनासूराज्ञामिति भा[1] A.

तद् अभिमृशन्ति ॥१७॥[1] अनाधृष्टमस्यनाधृष्यं[2] देवानाम् ओजोऽभिशस्तिपा अनभिशस्तिः । अनु मे दीक्षां दीक्षापतिर्मन्यताम् अनु तपः तपस्पतिः । अञ्जसा सत्यम् उपगेषं स्विते मा धाः इति । दीक्षालिङ्गं दीक्षितः ॥१८॥[3]

तत्तानूनप्त्राख्यमाज्यं ब्रह्मादयः[4] दक्षिणतोऽभिमृशन्ति । अस्मिन् यज्ञे[5] दीक्षालिङ्गं मन्त्राकारं[6] दीक्षितः प्रयुङ्क्ते नाऽदीक्षितः । सर्वे[7] तु सर्वे सर्वेषां दीक्षितत्वात् । अनु मे दीक्षां दीक्षापतिर्मन्यताम् इति दीक्षालिङ्गः ॥१७-१८॥

अध्वर्युर् आग्नीध्रम् आह अग्नीत् मदन्त्यापा३ः इति ॥१९॥[9]

जपन् ब्रूते[10] अग्नीत् मदन्त्यापा३ः इति अग्नीत्! मदन्त्यापा३ः इति मदन्ति न वेति विचार्यमाणत्वात् प्लुतिः । [11]तथा सति अप्रमत्त[11] इति मर्वति ॥१९॥

आग्नीध्रो मदन्ति देवीरमृता ऋतावृधः[12] इति ॥२०॥[12]

प्रतिवचनम् आह मदन्ति देवीः इत्यादि ॥२०॥

अध्वर्युस्ताभिः उदेहि इति ॥२१॥[1]

अध्वर्युः आग्नीध्रम् आह । परवादार्थकथनम् आग्नीध्रकर्मक्रमलक्षणार्थम् ॥२१॥

आग्नीध्रस्ताः कुशैरुदानयति ॥२२॥[1]

उदानयति [13]उद्धार्य अध्वर्युसमीप[13] आनयति ॥२२॥

---

१. तु. काश्रौ ८, १,२०. २. °नाधृष्टं वा. ३. तु. काश्रौ ८, १,२०; आश्रौ ११, १, २-३. ४. ब्रह्मा मूको. ५. रात्रे मूको. ६. °न्त्रकारां मूको. ७. सत्वे भा[1] A. ८. सर्वस्वा मूको. ९. तु. माश ३, ४, ३, २३; काश्रौ ८, २,१०-१२; आपश्रौ ११, १,८-१०. १०. कृते मूको. ११-११. त्वया सत्यप्रमता मूको. १२. ऋतावृतः भा[1] A वा G. १३-१३. उर्वाग्रा वपुस° भा[1] A; उद्धायवपुस° भा[2].

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता उपस्पृश्य सोमम् आप्याययन्ति —

अंशुरंशुष्टे देव सोमाऽऽप्यायताम् इन्द्रायैकधनविदे ।
आ तुभ्यम् इन्द्रः प्यायताम् आ त्वम् इन्द्राय प्यायस्व ॥
आप्याययाऽस्मान्त्सखीन्त्सन्या मेधया प्रजया धनेन ।
स्वस्ति ते देव सोम सुत्याम् उदृचम् अशीय इति ॥२३॥[१]

ता मदन्तीरप उपस्पृश्य स्पृष्ट्वा हि सोमम् आलभ्याऽऽप्याययन्ति । मन्त्रोच्चारणमात्रेण ब्रह्माऽऽग्नीध्रयजमानाः[२] ॥२३॥

पुनरुपस्पृश्योत्तानहस्ताः प्रस्तरे निह्नुवते एष्टा राय एष्टा वामानि प्रेषे[३] भगाय ऋतम् ऋतवादिभ्यो नमो दिवे नमः पृथिव्यै इति ॥२४॥[४]

पुनस्ता मदन्तीरुपस्पृश्योत्तानहस्ताः प्रस्तरे हि ते निह्नुवते हस्तौ निर्मार्जयन्ति ॥२४॥

प्रवर्ग्याय पुरस्ताद्धोमान् हुत्वा गार्हपत्यं दक्षिणेनोपविशाति[६] ॥२५॥[५]

प्रवर्ग्यार्थं पुरस्ताद्धोमान् हुत्वा गार्हपत्यं दक्षिणेन विधिवद् उपविशति ॥२५॥

न प्रथमयज्ञे प्रवर्ग्यं कुर्वीत[१] ॥क॥

प्रथमाऽऽहारे प्रवर्ग्यो न कर्तव्यः ॥क॥

कामम् अनूचानः श्रोत्रियः ॥ख॥ ॥२६॥

कामम् इच्छया अनूचानः प्रवर्ग्यं कुर्वीत । कर्ता प्रवचनस्य अनूचानः । संस्काराऽध्ययनाऽनुष्ठानत्रितययुक्तः श्रोत्रियः ॥ख॥ ॥२६॥

अन्तर्द्धायाऽध्वर्युराह ब्रह्मन् घर्मेण[७] प्रचरिष्यामः इति ॥२७॥[८]

अन्तर्द्धानं कृत्वाऽध्वर्युः ब्रह्मन् घर्मेण इत्यादि ब्रूते । होतः घर्मम् अभिष्टुहि

---

१. तु. मा ५,७; ते १,२,११,१; गोब्रा २, २,४; काश्रौ ८, २, ६; आपश्रौ ११,१,११-१२ २. वत्सासीयज° भा[१] A; वत्साग्नीयज° भा[२]. ३. प्रैषे वा पू. ४. °शन्ति भा[१२] A. ५. तु. द्राश्रौ १४, ३,१. ६. तु. गोब्रा २,२,६; आपश्रौ ११, २, ६-१०. ७. मैसं ४, ९,२ प्रवर्ग्येण पाभे. ८. तु. काश्रौ २६,२,२;२५; आपश्रौ १५, ५, १;६,१-३.

उद्गातः सामानि गाय (गोब्रा २,२,६) इति प्रैषः । शेषो न पठितो ब्रह्मणोऽनुपयोगित्वात् ॥२७॥

प्रचरत घर्मम् इत्यनुजानाति ॥२८॥[१]

परिभाषासिद्धाः[२] सर्वे गुणारम्भाः । अनुज्ञापदाधिकारे[३] द्वितीयादिपदविकारार्थं[४] आरम्भः । तेन प्रचरत घर्मं देवता वर्धयत यूयं नाकस्य — तत्रेमं यज्ञं यजमानं च वर्धयतो भूः[५] इति विकारः ॥क॥

उच्चैः सर्वम् उपांशु वा ॥२९॥

सर्वम् अनुज्ञावचनमन्त्रम्[६] उच्चैरुत्तमेन स्वरेण प्रयुञ्जीत । उपांशुस्वरेण वा । सर्वग्रहणम् अनुज्ञापदेतरस्योपांशुनिवारणार्थम्[७] । उपांशुपक्षे त्वनुज्ञापदस्योच्चैस्त्वम्[८] ॥२९॥

घर्मं ताप्यमानम् उपासीत ॥३०॥[९]

घर्मं महावीरं प्रताप्यमानम् उपासीत । देवयोनिर्ह्यग्निः[१०] ॥३०॥

इति वैतानकल्पे तृतीयेऽध्याये तृतीया कण्डिका ॥

[१४]

घर्मं तपाम्यमृतस्य धारया देवेभ्यो हव्यं परिदां[११] सवित्रे ।
शुक्रं देवाः शृतम् अदन्तु हव्यम् आसञ्जुह्वानम् अमृतस्य योनौ ॥
देवानाम् अधिपा एति घर्मं ऋतेन भ्राजन्नमृतं विचष्टे ।
हिरण्यवर्णो नभसो देव सूर्यो घर्मो भ्राजन् दिवो अन्तान् पर्येषि विद्युता ॥
वैश्वानरः समुद्रं पर्येति शुक्रो घर्मो भ्राजन् तेजसा रोचमानः ।
नुदञ् छत्रून् प्रदहन् मे सपत्नान् आदित्यो द्याम् अध्यरुक्षद् विपश्चित् ॥

---

१. तु. गोब्रा २,२,६; काश्रौ २६,४,२-३; आपश्रौ १५,६,२-३. २. °षा सिद्धे भा[१] A; °षा सिद्धः भा[२]. ३. °पदधि° मूको. ४. °दि पदाविका° मूको. ५. तु. वैता २.१. ६. °ज्ञावचनं मन्त्र उ° मूको. ७. °पांशुनिवार्थम् मूको. ८. °पदस्योर्वैतस्य भा[१] A; पदस्योर्वैस्तस्य भा[२]. ९. तु. गोब्रा २,२,६. १०. वेतन्य (व भा[२]) हि यग्निः मूको., अत्र खण्डसमाप्तिश्च ११. परीदं वा पू.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वियोतते द्योतत आ च द्योतत अप्स्वन्तर् अमृतो घर्म उद्यन् ।
हन्ता वृत्रस्य हंरिताम् अनीकम् अनाधृष्टास्तन्वः सूर्यस्य ॥
घर्मः पश्चाद् उत घर्मः पुरस्ताद् अयोदंष्ट्राय द्विषतोऽपि दध्मः ।
वैश्वानरः शीतरूरे वसानः सपत्नान् मे द्विषतो हन्तु सर्वान् ॥
ऋतून् ऋतुभिः श्रपयति ब्रह्मणैकवीरो घर्मः शुचानः समिधा समिद्धः ॥
ब्रह्म त्वा तपति ब्रह्मणा तेजसा च घर्मः साहस्रः समिधा समिद्धः ।
असपत्नाः[१] प्रदिशो मे भवन्तु (अ १९,१४,१) ॥
सपत्नान् सर्वान् मे सूर्यो हन्तु वैश्वानरो हरिः ।
घर्मस्तप्तः प्रदहतु भ्रातृव्यान् द्विषतो वृषा ।
उद्यन् मे शुक्र आदित्यो विमृधो हन्तु सूर्यः ॥

ब्रह्म जज्ञानम् (अ ४,१,१), इयं पित्र्या (अ ४,१,२) इति शस्त्रवद् अर्धर्चश आहावप्रतिगरवर्जम् ॥१॥[२]

एतासां नवानाम् ऋचां शस्त्रवत् प्रयोगो भवति । अर्धर्चश इति नियमार्थम् । सर्वशस्त्रधर्माऽतिदेशे[३] प्राप्त आहावप्रतिगरौ निषेधति— आहावप्रतिगरवर्जमिति[४] । तेन मन्द्रया वाचा (वैता २०, २१) त्रिर्हिंकृत्य त्रिः प्रथमां त्रिरुत्तमाम् अन्वाहाऽर्धर्चश ऋगन्तं प्रणवेनोपसंतनोति स्वरादिम् अपनीय शस्त्रान्तम् अकारान्तेनैव (वैता २१, ३-४) इति एते एव धर्मा भवन्ति ॥१॥

रुचिरसि (अ १७,१,२१) इति रुचितम्-अनुमन्त्रयते ॥२॥[५]

रुचिरसि इत्येतद् अब्गण[६] इति भाष्यकारः । [७]रुचिरसि इति प्रदीप्तं घर्मम् अनुमन्त्रयते । †प्रतीकग्रहणेऽयं सर्वगणः† इति भाष्यकारः[७] ॥२॥

घर्मधुग् दोहायोत्तिष्ठतः[८] उत्तिष्ठताऽवपश्यत (अ ७,७५ [७२], १) इति ॥३॥[९]

१. तु. BC; आपश्रौ ६,२९,१; १३,२५,३; सम° G. २. तु. पै. ५,१६, ३; १६, १५०, ६; १०; १५१, ५-७; १५२, ५; ६; आश्रौ ५, ४, १-२८. ३. °तिदेशे प्राप्नोति देशे मूको. ४. °राविति मूको. ५. तु. काश्रौ २६, ४, ११; आपश्रौ १५, ८, १३. ६. तु. सलिलगणः (शांक १८,५अ.); रुचिरद्रवाद्गण मूको. ७-७. नास्ति A. †-† °णे मुद्रवाद्गण भा[१]; °णे मुहुवाद् न भा[२]. ८. धोहा° मूको. ९. तु. काश्रौ २६, ५,१; आपश्रौ १५,९,३.

[१]अध्वर्य्वादीन् उत्तिष्ठतः[१] उत्तिष्ठताऽवपश्यत इत्यनुमन्त्रयते ॥३॥

उपह्वये (अ ७,७७ [७३],७) इति घर्मदुघाम् ॥४॥[२]

[३]गाम् अनुमन्त्रयते[३] ॥४॥

घर्मसूक्तेन घर्मं हूयमानम् ॥क॥[४]

[५]घर्मं हूयमानम् अनुमन्त्रयते[५] । समिद्धो अग्निर्वृषणा (अ ७,७७ [७३]) इति घर्मसूक्तम् । पप्रकीर्णादेशः? घर्मशब्देन पयः [६]कारणे कार्योपचाराद्[६] घर्मस्य वषट्कृता इति यथा ॥क॥

स्वाहाकृतः (अ ७,७७, [७३], ३-४) इति द्वाभ्याम् घर्मस्य वषट्कृतेऽनुवषट्कृते ॥ख॥ ॥५॥[७]

[८]होत्रा वषट्कृते[८] अनुवषट्कृते घर्मद्रव्यस्य होमम् अनुद्दिश्य च तन्त्रेणानुमन्त्रयते द्वाभ्यामिति निर्देशात् ॥ख॥५॥

भक्षो वाजिनवत् शृतं हविर्मधु हविरस्याम[९] ते घर्म मधुमतः पितृमतो वाजिमतो बृहस्पतिमतो विश्वदेव्यावतः[१०] इति ॥६॥[११]

भक्षो घर्मभक्षो वाजिनवत् वाजिनभक्षेण तुल्यः । तेन तस्य प्राणभक्षान् भक्षयन्ति होत्रध्वर्युब्रह्माग्नीध्राः, प्रत्यक्षं यजमानः । मिथः समुपहूय (वैता ८,१५) इतीह भवति[१२] । मन्त्रस्तु[१३] प्रत्याम्नायिकः ॥६॥

सत्रे होताऽध्वर्युर्ब्रह्मोद्गातानुचरा[१४] गृहपतिश्च ॥७॥

सत्रे गवामयनादौ होत्रादिगृहपतिपर्यन्तानां भवति अनुच्छिष्टवचा[१५] ।

१-१. यदा अध्वर्युः उत्तिष्ठतो दोहार्थं गच्छति तदा भा[१] A. २. तु. काश्रौ २६, ५, १; आपश्रौ १५, ९, ४. ३-३. गौरनु° मूको. ४. तु. काश्रौ २६, ६, ६; आपश्रौ १५, १०, ११. ५-५. नास्ति भा[१] A. ६-६. कारणैका° मूको. ७. तु. आश्रौ ४, ७,४. ८-८. नास्ति भा[१] A ९. तु. C शोधः [तु. तैआ]; हविरस्वावते वा पू. G. १०. विश्वेदेवावतः ब वा पू. ११. तु. तैआ ४, १०, ५; काश्रौ २६,६,१९; आपश्रौ १५,११,१०-१५. १२. भवन्ति भा[१] A. १३. आमन्त्रस्तु भा[१] A १४. तु. C शोधः; °युर्गृहपतिर्ब्र° मूको. G; °चरान् भा[१] A. १५. अनुछिष्टवरा भा[१] A; अनुचरा भा[२].

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]होत्रादिमहर्त्विजो यथानिर्दिष्टक्रमेण[1] भक्षयन्ति यथापूर्वम् । गृहपतिश्चेति चकारः गृहपतेर्भक्षसमुच्चयार्थः ॥७॥

उच्छिष्टखरे पवित्रैर्मार्जयन्ते ॥८॥[2]

उच्छिष्टखरः प्राक्प्रवणस्योत्तरः सिकताप्रकर्शन चेवत् ? । तत्र पवित्रैर्मन्त्रैः[3] पुनन्तु मा (अ ६,१९,१), वायोः पूताः (अ ६,५१,१), वैश्वानरो रश्मिभिः (अ ६,६२,१) इति मार्जयन्ते ॥८॥

सूयवसात् (ऋ १,१६४, ४०) इति त्रिरुक्तायां संस्थितहोमान् ॥९॥[4]

[5]एतस्याम् ऋचि होत्रा त्रिरुक्तायां संस्थितहोमान्[5] जुहोति ॥९॥

इति वैतानकल्पे तृतीयेऽध्याये चतुर्थी कण्डिका ।

[१५]

उपसद्याग्नेयसौम्यवैष्णवान् ॥१॥[6]

उपसदि इष्टौ आग्नेयसौम्यवैष्णवान् आज्यहोमान् अनुमन्त्रयते ॥१॥

वषट्कारान्ता[7] ॥क॥

इयम् इष्टिर्भवति । अन्तवचनम् उक्तार्थम्[8] [आज्यहविष्ट्वात्वने प्रणीताप्रणयनं प्रणीतावाहावात् तुञ्जभ्यामे] ? । परिभाषितस्तु वाग्यमो भवत्येव । प्रणीता-[9]प्रणयनभावे च प्रश्नप्रतिवचनरूपौ[9] श्लोकावप्युदाहरन्ति —

कतिकृत्वः प्रणयनं सोमतन्त्रे प्रचोद्यते[10] ।
एतद् ब्रूहि नो ब्रह्मन् सु द्विस्त्वमिति[11] कामयेति ॥१॥

१-१. °महत्विगायानिर्दिष्टः भा[1] A. २. तु. काश्रौ २६, ६, २; आपश्रौ १५,६,२२;११,१६. ३. तु. कौसू ६१,५. ४. तु. आश्वश्रौ ४,७,४; काश्रौ २६, ६, २४. ५-५. एतस्य तृचे होत्रादित्रिरुक्तायां तत्सं° भा[1] A.; एतामृचं होत्रा त्रिरुक्ता या तत्सं° भा[2]. ६. तु. काश्रौ ८,२,१६–३६; आपश्रौ ११,२, १३;३,१२. ७. लाश्रौ ५६,११. ८. उक्त्यर्थः मूको. ९. °यनतावेव प्रश्ने प्रति प्रति भा[1] A. १०. प्रचोद्यते भा[2]. ११. द्विष° भा[2].

दीक्षणीयायां[1] प्रायणीयायाम् आतिथ्यायां च ब्राह्मणः । उदयनीयोदवसानीययोः[2] परम् इष्टिषु चोद्यते ॥२॥ इति ॥क॥

[3]आप्यायननिह्नवने[3] ॥ख॥ ॥२॥

आप्यायननिह्नवने यथोक्ते इह भवतः । ता उपस्पृश्य सोमम् आप्याययन्ति, अंशुरंशुष्टे इति (वैता १३, २३) । पुनरुपस्पृश्योत्तानहस्ताः प्रस्तरे निह्नुवते, एष्टा रायः इति (वैता १३, २४) ॥२॥

यत्राऽऽहाऽध्वर्युः अग्नीद् देवपत्नीर्व्याचक्ष्व इति । तदपरेण गार्हपत्यं प्राङ्मुखस्तिष्ठन्न् अनवानन्न् आग्नीध्रो देवपत्नीर्व्याचष्टे—पृथिव्यग्नेः पत्नी वाग् वातस्य पत्नी सेनेन्द्रस्य पत्नी धेना बृहस्पतेः पत्नी पथ्या पूष्णः पत्नी गायत्री वसूनां पत्नी त्रिष्टुब् रुद्राणां पत्नी जगत्यादित्यानां पत्न्यनुष्टुब् मित्रस्य पत्नी विराड् वरुणस्य पत्नी पङ्क्तिर्विष्णोः पत्नी दीक्षा सोमस्य राज्ञः पत्नी इति ॥३॥[4]

यस्मिन् कालेऽध्वर्युः अग्नीद् देवपत्नीर्व्याचक्ष्वेत्याह तस्मिन् काले आग्नीध्रोऽपरेण गार्हपत्यं प्राङ्मुखस्तिष्ठन् अनवानन् देवपत्नीर्व्याचष्टे—पृथिव्यग्नेः पत्नी इत्यादीनि देवास्त्वावृत्सा? । सुब्रह्मण्य सुब्रह्मण्यामाह्वय (गोब्रा २, २, ९) इतीह पाठे ब्राह्मणसंचरभ्रान्त्या । इह त्वनुपयोगात् ॥३॥

सुब्रह्मण्याऽऽह्वाने सर्वत्र यस्यां सदः (अ १२, १,३८-४०) इति तिस्रो जपति ॥४॥[5]

सुब्रह्मण्या नाम निगदः । तस्य आह्वानं उच्चारणे क्रियमाणे तिस्र ऋचो जपति । सर्वत्रशब्दाद् यत्र क्वचित् सुब्रह्मण्याऽऽह्वानं तत्र जपः ॥४॥

एवम् अपराह्णे घर्मोपसदौ ॥क॥

भवत इति शेषः । अप्रथमयज्ञविषयम् एतत् । श्रोत्रियाऽनूचानस्य तु प्रथमयज्ञेऽपि ॥क॥[6]

---

१. णीयानां मूको. २. नीयोदरसा° मूको. ३. तु. C [ZDMG ५७, ७४०] द्र.; वैतु. वा पू G आप्यायनान्निहुवते; वैप ४, ५३० °नम् इति च तत्रत्यं टि. च शोधार्हम् । ४. तु. मै १,९,२; गोब्रा २.२,९; काठ ९,१०; प्रभृ. आपश्रौ ११,३,१३–१४. ५. तु. काश्रौ ७,९, १२; १७; ८, २,१३; आपश्रौ ११, ३, १४. ६. तु. गोब्रा २,२, ६; वैता १३, २५–२६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपरेद्युः पूर्वाह्णेऽपराह्णे च ॥ख॥

अपरेद्युर्द्वितीयेऽहनि । यस्याऽह्नो भागस्य पूर्वो भागो न विद्यते स पूर्वाह्णः । यस्य चाऽपरो भागो न विद्यते सोऽपराह्ण इति । [1]नभावृत्ती पूर्वाह्णापराह्ण-शब्दाविह भगवता[1] भाष्यकारेण व्याख्याताविति । अस्मिन् पूर्वाह्णेऽपराह्णे च घर्मोपसदावेकत्र समुच्चितौ भवतः चकारस्य समुच्चयार्थत्वात् ॥ख॥

औपवसथ्ये समासे ॥ग॥[2] ॥५॥

[3]औपवसथ्यमिति सुत्याहात् पूर्वमहः[3]। तस्मिन् घर्मोपसदां समस्तानां पूर्वाह्णे प्रयोगः ॥ग॥५॥

एवं तिस्रोऽग्निष्टोमस्य ॥क॥

एवम् उक्तविधिना तिस्र उपसदोऽग्निष्टोमस्याऽऽवृत्त्या भवन्ति अयाशया रजाशया हराशया इति ॥क[4]॥

द्वादशाहीनस्य ॥ख॥ ॥६॥[5]

अह्नां[6] समूहस्य क्रतोर्द्वादशोपसदो भवन्ति तासां वृद्धिन्मायात्[7] ॥६॥

वि मिमीष्व (अ १२,१, २७) इति वेदिं मिमानम् अनु-मन्त्रयते ॥७॥[8]

औपवसथ्ये पूर्वाह्णस्योपसदा प्रचर्याऽध्वर्युर्वेदिं मिमीते । तं मिमानम् अनुमन्त्रयते ॥७॥

यस्यां वेदिम् (अ १२,१,१३) इति वेदिं परिगृह्यमाणाम् ॥८॥[9]

अध्वर्युणा वेदिं परिगृह्यमाणाम् अनुमन्त्रयते ॥८॥

अग्नौ प्रणीयमाने अग्ने प्रेहि (अ ४,१४,५) इति जपित्वा बहिर्वेद्यु-पविशति ॥९॥[10]

१-१. नुस्य तृतीय पूर्वाह्णशब्दत्रिह भगवान् भा[1] A; नु साम्रती पूर्वापराह्ण° भा[2]. २. तु. काश्रौ ८,२,३५-३६;३,१६; आपश्रौ ११, ४, १; ४;५, ७-८. ३-३. °थ्यमित्याहा पूर्व° मूको. ४. तु. आपश्रौ ११, ३, १२;४,५. ५. तु. गोब्रा २,२,८; काश्रौ ८,२, ३७-३८; आपश्रौ ११,४,७. ६. अह्नो भा[1] A. ७. तु. काश्रौ ८,३,५. ८. तु. काश्रौ ८,३,६-१२; आपश्रौ ११,४,११-१६. ९. तु. काश्रौ ८,३, १२-१३; आपश्रौ ११, ५, ३. १०. तु. काश्रौ ८, ३, १९; आपश्रौ ११, ५, ९-१०.

शालामुखीयाद् उत्तरवेद्याम्[1] अग्नौ प्रणीयमाने मन्त्रं जपित्वा बहिर्वेदि दक्षिणतो विधिवद् उपविशति ॥९॥

दक्षिणहविर्धानस्य[2] वर्त्माऽभिहोमम् इदं विष्णुः (अ ७,२७[२६], ४) इति ॥क॥[3]

हविर्धानं सोमवहनशकटम् । तस्य दक्षिणस्य वर्त्माऽभिहोमम् अनु-मन्त्रयते ॥क॥

उत्तरस्य त्रीणि पदा (अ ७,२७[२६],५) इति ॥ख॥ ॥१०॥[4]

उत्तरस्य हविर्धानस्य वर्त्माऽभिहोमम् अनुमन्त्रयते । चक्रेण कृता रथ्या [5]सा वर्त्म[5] ॥१०॥

हविर्धाने प्रवर्त्यमाने इतश्च मा (अ १८,३, ३८-३९) इति द्वाभ्याम् अनुमन्त्रयते ॥११॥[6]

उभे अपि हविर्धाने प्रवर्त्यमाने[7] ऋग्भ्याम् अनुमन्त्रयते ॥११॥

विष्णोर्नु कम् (अ ७, २७[२६], १) इत्युपस्तम्भनम् उपस्तभ्य-मानम् ॥१२॥[8]

दक्षिणस्य हविर्धानस्योपस्तम्भनम् उपस्तभ्यमानम् अनुमन्त्रयते ॥१२॥

मन्वे वां द्यावापृथिवी (अ ४, २६, १) इत्यौदुम्बर्या अभिहोमम् ॥१३॥[9]

औदुम्बर्या अभिहोमम् अनुमन्त्रयते ॥१३॥

अग्नीषोमयोः प्रणयनायाऽऽमन्त्रितस्तीर्थेन पत्नीशालमाव्रजति ॥क॥

अग्निराग्नीध्रीयः । सोमः प्रसिद्धः । तयोरग्नीषोमयोः प्रणयनार्थम् आमन्त्रित आमन्त्रितो ब्रह्मा तीर्थेन वक्ष्यमाणेन पत्नीशालम्[10] आव्रजति ॥क॥

१. उत्तरे वे° भा[1] A. २. दक्षिणतो ह भा[1] A. ३. तु. काश्रौ ८,३, २७. ४. तु. काश्रौ ८,३,३१;४,१-३; आपश्रौ ११,६,४-७. ५-५. स वर्त्म मूको. ६. तु. काश्रौ ८,४, १-३; आपश्रौ ११, ६, १०-११. ७. प्रवर्तमाने वा पू. ८. तु. काश्रौ ८,४,५-१२; आपश्रौ ११,७,३-४. ९. तु. काश्रौ ८, ५,२६-२७; आपश्रौ ११, १०, ४. १०. °शालाम् भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चात्वालोत्करावन्तरेणाऽऽग्नीध्रीयलक्षणम् । उत्तरेण सदश्चेति तीर्थम् ॥ख॥ ॥१४॥

चात्वालोत्करयोर्मध्येन आग्नीध्रीयस्याऽग्नेः [हाविनोपलक्षणम्]?। तस्योत्तरेण सदस्योत्तरेण नीतो? तीर्थम्। तीर्थविधानम् आ कर्मसमाप्तेः, आवश्य... आदिसंचरविधानार्थम्। अनुचराणां वै एतदनुचरवचनात् ॥१४॥

आचमनादि वीक्षणाऽन्तम् ॥१५॥[2]

दार्शपौर्णमासिकम् इह भवति ॥१५॥

सोमं राजानम् (अ ३,२०,४ab) इत्यर्धर्चेनाऽग्नीषोमौ प्रणीयमानावनुव्रजति ॥१६॥[3]

[illegible] ॥१६॥

आग्नीध्रीयहोमाद् आग्नीध्रीयम् उत्तरेणाऽग्निम् अपरेण अति-[illegible] उपविशति ॥१७॥[1]

आग्नीध्रीयेऽग्नौ अध्वर्युहोमाद् अनन्तरं तम् आग्नीध्रीयम् अग्निम् उत्तरेण [illegible][4] विधिवद् उपविशति ॥१७॥

[illegible] ॥क॥

अथेत्थानन्तर्यं अग्नीषोमीये पशौ उक्ताः कथिता धर्मा ऐन्द्राग्ने पशौ ॥क॥

एतेन पशवो व्याख्याताः ॥ख॥ ॥१८॥[5]

अग्नीषोमीयस्य प्रकृतिविधानपरं[6] सूत्रम् । तं प्रकृत्य हि यज्ञविधानात्[7] ऐन्द्राग्ने तु धर्मविधिर्यज्ञक्रमाऽनुरोधात् ॥ख॥१८॥

---

१. तु. वैता १, १९–२०; कौसू ३, ४–५. २. तु. काश्रौ ८, ७, ३–६; आश्रौ ११, १६, १७;१७,३. ३. तु. काश्रौ ८, ७, ७-१५; आपश्रौ ११,१७, ४-७. ४. ब्रह्मकर्या मूको. ५. तु. वैता १०,३. ६. °ति विधानापरं भा[1] A. ७. यज्ञेदंधर्मविधानात् भा[1] A.

पत्नीसंयाजान्तः[1] ॥१९॥[2]

इह पशुर्भवति । अन्तवचनम् उक्तार्थम् ॥१९॥

इति वैतानकल्पे तृतीयेऽध्याये पञ्चमी कण्डिका ॥

[१६]

वसतीवरीः परिहियमाणाः पूर्णम् नारि[3] प्रभर (अ ३, १२,८) इत्यनुमन्त्रयते ॥१॥[4]

वसतीवरीः [5]अपः । ताः[5] कुम्भैश्च अध्वर्युणा सर्वतो नीयमानाः पूर्णम् नारि[3] प्रभर कुम्भम् इत्यनुमन्त्रयते ॥१॥

आग्नीध्रीये स्थाप्यमाना उत्तरया, अमूर्याः (अ १,४,२) इति च ॥२॥[6]

[illegible] प्रभरामि (अ ३,१२,९), अमूर्या उप सूर्ये (अ १,४,२) इति चाऽनुमन्त्रयते। [illegible] ॥२॥

दीक्षितस्तत्र वसति ॥३॥[7]

[illegible] दीक्षित० स्थात् ॥३॥

अपरराత్ర [illegible] उपस्पृशन्ति ॥४॥[8]

[illegible] सर्वं ॥४॥

[illegible][10] [illegible] पुरा प्रचरितोराग्नीध्रीये जुहोति ॥५॥[11]

---

१. तु. म C; घेतु. G. °जान्ताः. २. तु. काश्रौ ८, ९,१.; आपश्री ११, २०,१९. ३. [illegible] ४. तु. [illegible] आपश्रौ ११,२१,१-४. ५-५ अयनाः भा[1] A.; आपनाः भा[1]. ६. तु. काश्रौ ८,९,२१; आपश्रौ ११,२१,५. ७. तु. काश्रौ ८,९.२३; आपश्रौ ११, २१, १२–१३. ८. तु. काश्रौ ९,१,१; आपश्रौ १२,१,१. ९. नास्ति मूको. १०. °वहृत्य भा[1] A. ११. तु. काठ ३४,१५-१७; तैसं ४, ४,९; मा ८,५४-५९; गोब्रा २, २,९-१०; माश १२,६,१; माश्रौ ३, ६,२; आपश्रौ १२,१,३; अप्राय ३,१-२.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोमरूपेषु पठिताभिराद्यन्तग्रहणपरिसंख्याताभिर्यज्ञतनूभिः पुराऽध्वर्यु-प्रचाराद् आग्नीध्रीय आज्यं जुहोति । ता यज्ञतन्वस्तु त्रयस्त्रिंशद्भवन्ति[1] यद्देवत्यः सोमस्तद्देवत्यः पशुः इत्यतिदेशात् । तत्र हि मेध आप्रीषु इति प्रयाजतन्वा अनन्तरं हविः पर्यग्निकृतः पितृदेवत्यः पशुः संज्ञप्यमानो यज्ञस्य मिथुनं पत्नेजनीषु रक्षसां भागधेयं वपायाम् उद्ध्रियमाणायाम् इति चतस्रस्ताः । अत्रापि वसवः प्रयाजेषु इति प्रयाजतन्वा अनन्तरमेव भवन्ति । निदर्शनम् हविरुपावहृतः[2] स्वाहा सारस्वतः प्रातरनुवाके स्वाहा, अथर्वा न्युप्तः स्वाहा इत्यादि । केचित्तु चतुर्थ्यन्तं देवतापदमात्रम् ऊहयन्ति । निदर्शनम्[3]— हविषे स्वाहा सरस्वत्यै स्वाहा इति अथर्वणे स्वाहा इत्यादि ॥५॥

यजूंषि यज्ञे (अ ५,२६) इति च ॥क॥

चकारो जुहोतिसंबन्धार्थः । पृथङ् निर्देश उत्तरार्थः ॥क॥

विष्पर्द्धायां चतुर्भिश्चतुर्भिः पुरस्तात् प्रातरनुवाकस्य ॥ख॥ ॥६॥[4]

विष्पर्द्धायां समृतसोमनिमित्तायां स्पर्द्धायां यजूंषि यज्ञे (अ ५,२६) इति सूक्तस्य चतुर्भिश्चतुर्भिर्मन्त्रैः एकैकाम् आहुतिं जुहोति पुरस्तात्[5] प्रातरनुवाकात् ॥ख॥ ॥६॥[6]

एनं[7] दाक्षिणेनाऽऽहवनीयम् अपरेणाऽतिव्रज्याऽऽसाद उप-विशति ॥७॥

यस्मिन् होमान् हुत्वा स्तौ एनम् आग्नीध्रीयं दक्षिणेनाऽऽहवनीयम् अपरेण गत्वाऽऽसादे ब्रह्मकुर्यां[8] विधिवद् उपविशति ॥७॥

[9]उपविष्टे होतरि होतारं[9] यदस्मृति (अ ७,१११[१०६]) इति हुत्वा पुरस्ताद्धोमान् जुहोति ॥८॥[10]

प्रातःसवनाय पुरस्ताद्धोमान् जुहोति । स्पष्टार्थं[11] जुहोतिवचनम्[12] ॥८॥

---

१. तु. आपश्रौ १४,१७,२. २. °वहृतं भा[1] A. ३. निदर्शयन्ति भा[1] A. ४. तु. मैसं १,९,८; गोब्रा २,२,११. ५. नास्ति मूको. ६. तु. माश्रौ ५,२,१४,२३-२४. ७. अथ इति C शोधितः पाठः. ८. ब्रह्मकुर्व्यां भा[1] A. ९-९. नास्ति भा[1,2] A; † C अनुवाद उपेक्षित इव पाठः. १०. तु. आश्रौ ४,१३,६. ११. स्पद्यार्थं भा[1] A; स्पर्द्धार्थं भा[1]. १२. °चनम् । उपविष्टे होतरि होतारं यदि पुनः प्रातर्… मूको.

पातं न इन्द्रापूषणा (अ ६,३-६) इति चत्वारि सूक्तानि प्रातरनु-वाकम् अनु जपति ॥९॥

प्रातरनुवाकं होत्रानूच्यमानं चत्वारि सूक्तानि अनु जपति[1] ॥९॥

अम्बयो यन्ति (अ १,४-६) इति त्रीण्यपोनप्त्रीयम् ॥१०॥[2]

अभूदुषाः (ऋ ५,७५,९) इति प्रातरनुवाकाय होतोपविष्टः स्यात् । ततो होतारम् अपरेणाऽतिव्रज्याऽऽसाद उपविशति[3] [4]सति अभूत् इत्युक्तायाम्[4] अपोनप्त्रीयं होत्राऽनूच्यमानं[5] त्रीणि सूक्तान्यनु जपति ब्रह्मा ॥१०॥

इन्द्र जुषस्व (अ २,५) इति [6]राज्यभिषूयमाणेऽभिषवणहोमान्[6] जुहोति ॥क॥

राज्ञि सोमेऽधिषवणफलकस्थे[7] चर्मण्यध्वर्युभिरभिषूयमाणे अभिषवण-संज्ञकान् होमान् जुहोति । ब्राह्मणोक्ता चेयं संज्ञा ॥क॥

उपांशुग्रहहोमम् सूर्यो द्याम् (अ १३,१, ४५) इत्युदिते ॥ख॥

उपांशुग्रहहोमम् अनुमन्त्रयते ॥ख॥

अन्तर्यामीयं च ॥ग॥ ॥११॥[8]

अन्तर्यामीयं च ग्रहहोमं सूर्यो द्याम् इत्येतेनाऽनुमन्त्रयते ॥ग॥ ॥११॥

हविर्द्धाने पूर्वेणाऽतीत्य खरं[9] चोपविश्य दिवस्पृथिव्याः (अ९, १) इति मधुसूक्तेन राजानं संश्रयति ॥१२॥

हविर्द्धानशालायां पूर्वेण द्वारेणाऽतिक्रम्य खरं च ग्रहाऽऽसादनस्थानं पूर्वेणै-वाऽतीत्य विधिवद् उपविश्य राजानं सोमं संश्रयति सेवते । मधुसूक्तम् इति ब्राह्मणसंज्ञा । ब्राह्मणनिमित्ता ब्रह्मविधिरिति[10] चार्थः ॥१२॥

इन्द्राय सोमम् ऋत्विजः (अ ६,२) इति द्रोणकलशस्थम् अनु-मन्त्रयते ॥१३॥[11]

द्रोणकलशस्थं सिक्तं सोमम् अनुमन्त्रयते ॥१३॥

---

१. अत्र जप° मूको. २. तु. आश्रौ ५,१,१९; काश्रौ ९,३,१. ३. तु. वैता १६,७. ४-४. सत्य मुपरित्यु° मूको. ५. होत्रोच्य° मूको. ६-६. राज्ञोभि° भा[1] A.; राज्ञेभि° भा[1] G. ७. °भिपव° मूको. ८. तु. काश्रौ ९,४,२१-३५; ६,१-५; आपश्रौ १२,१०, १३-११,५;१३,१०-१३. ९. खरे G. १०. ब्रह्मविमधिर्ति मूको. ११. तु. काश्रौ ९, ६, २४; आपश्रौ १२,६, ९.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]धृषत् पिब (अ ७,८१[७६],२) इति माध्यन्दिने ॥१४॥†

माध्यन्दिने सवने द्रोणकलशस्थं सोमम् अनुमन्त्रयते[1] ॥१४॥

यत्र विजानाति ब्रह्मन्त्सोमोऽस्कन् इति तमेतयाऽऽलभ्याऽभिमन्त्रयते—

अभूद् देवः सविता वन्द्यो नू न इदानीम् अह्न उपवाच्यो नृभिः ।
वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत्
इति ॥१५॥[2]

ब्रह्मन् सोमोऽस्कन् इत्यध्वर्युणोक्त एनं सोमं पाणिना संस्पृश्याऽभिमन्त्रयते ब्राह्मणपाठात् ॥१५॥

ये अग्नयो अप्स्वन्तः (अ ३, २१, १-७) इति सप्तभिरभिजुहोति ॥१६॥[2]

स्कन्नहोमम् अभिमन्त्र्याऽऽहवनीय आज्यं जुहोति । अभिशब्दो ब्राह्मणपाठात् ॥१६॥

अध्वर्युः प्रतिप्रस्थाता प्रस्तोतोद्गाता प्रतिहर्ता ब्रह्मा सुन्वन् समन्वारब्धा बहिष्पवमानाय विसृप्य वैप्रुषान् होमान् जुह्वति द्रप्सश्चस्कन्द (अ १८,४,२८) इति ।

यस्ते द्रप्सः स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात् ।
अध्वर्योर्वा परि यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतम् ॥
द्रप्सः पतितोऽत्त्यवक्ष्[3] यः परः स्रुचः ।
अयं देवो बृहस्पतिः सं तं सिञ्चतु राधसे ॥
यस्ते द्रप्सः पतितः पृथिव्यां धानासोमः परीवापः करम्भः ।
अयं देवो बृहस्पतिः[4] सं तं सिञ्चतु वर्चसे ॥

१-१. नास्ति भा[2]. † तु. आपश्रौ १३, २, ६. २. तु. गोब्रा २, २, १२; आपश्रौ १४, २८, ६. ३ तु. C शोधः (तु. [अंशतः] ऋ; वैप ४ यस्था. च); वैद्व. G पातीतोऽत्यवक्ष; वा पू पातीतो ऽयस्य . ४. वनस्पतिः वा पू.

यन्मे स्कन्नम् इति ॥१७॥[1]

अध्वर्य्वादयो यथाक्रमं समन्वारब्धाः संलग्नाः हविर्धानाद् विसृप्य निष्क्रम्य वैप्रुषान् सोमविप्रुण्निमित्तान् होमान् जुह्वति । तत्र ब्रह्मणो यजमानस्य च मन्त्राः द्रप्सश्चस्कन्द इत्यादयः पञ्च ॥१७॥

इति वैतानकल्पे तृतीयेऽध्याये षष्ठी कण्डिका ॥

[१७]

[2]चात्वालाद् दक्षिणत उपविशन्ति ॥१॥

हुत्वा [3]च समन्वारब्धा एव चात्वालाद् दक्षिणतो सत्वाऽध्वानम्[4] अध्वर्य्वादय उपविशन्ति ब्रह्मवत् ॥१॥

दोषो गाय (अ ६,१) इति जपन् उद्गातारम् ईक्षते ॥२॥

[5]अव्यक्तया वाचा तृचं जपन् उद्गातारम् ईक्षते ॥२॥[5]

स्तोत्रोपाकरणात् प्रस्तोता ब्रह्माणम् आमन्त्रयते ब्रह्मन् स्तोष्यामः प्रशास्तः इति ॥३॥[6]

सोमः पवते[7] (गोब्रा २, ५, ४) इत्यध्वर्युस्तोत्रोपाकरणात् प्रस्तोता बहिष्पवमानस्तोत्रगानाय ब्रह्माणम् आमन्त्रयते पृच्छति ॥३॥

तत्र रश्मिरसि क्षयाय त्वा क्षयं जिन्व । सवितृप्रसूता बृहस्पतये स्तुत । देव सवितरेतत् ते प्राह तत् प्र च सुव प्र च यज । आयुष्मत्या ऋचो माऽपगायत[8] तनूपात् साम्नः । सत्या व[9] आशिषः सन्तु सत्या आकूतयः । ऋतं च सत्यं च वदत । बृहस्पतेऽनुमत्यों भूर्जनद् इन्द्रवन्तः

---

१. तु. कौसू ६,१;२. २. तु. ऋ १०, १७, १२; १३; मा ७, २६; तैसं ३,१,१०,१; गोब्रा २, २, १२; काठ ३५,८; काश्रौ ९,६,२८; आपश्रौ १२, १६,१५. ३. य मूको. ४. यत्वा स्त्वानम मूको. ५-५. नास्ति भा[2]. ६. तु. गोब्रा २,५,४; लाश्रौ ५,११,२; द्राश्रौ १५, ३, २; आपश्रौ १४, ९, ७. ७. एव मूको. ८. तु. गोब्रा २, २, १४, C; सापगाया G; मापागायः बा; मापागाः पू. ९. वा बा पू.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्त्वा स्तुत इति प्रथमया स्वरमात्रया प्रसौति ॥क॥[१]

तत्र रश्मिरसीत्यादि स्वरमात्रया प्रसौत्यन्तं सूत्रम् । तत्र प्रस्तोत्रादिष्टः [२]रश्मिरसि इत्यादिना स्तुत इत्यन्तेन[२] स्तोमभागेन प्रसौति प्रसवं ददाति । इन्द्रवन्त इत्युक्त्वेत्यवच्छेदकरणम्[३] उपांशुस्वरार्थम्[४] क्वचिद् उ वै स्वरोऽव्यक्तवर्णः प्रथमः स्वरः ॥क॥

मध्यमया माध्यन्दिने ॥ख॥[५]

माध्यन्दिने सवने मध्यमया स्वरमात्रया प्रसौति ॥ख॥

उत्तमया तृतीयसवने ॥ग॥ ॥४॥

उत्तमया स्वरमात्रया तृतीयसवने प्रसौति ॥४॥

भुव इति माध्यन्दिने ॥क॥[५]

माध्यन्दिने सवने स्तोमभागे भूरित्यस्य भुव इति विकारः ॥क॥

स्वर् इति तृतीयसवने ॥ख॥ ॥५॥

तृतीयसवने स्वरिति विकारः ॥ख॥ ॥५॥

उक्थ्यादिष्वहीने च ओं भूर्भुवः स्वर्जनद् वृधत् करद् रुहन्महच्छमोम् इति च ॥६॥

उक्थ्यादिसंस्थितेषु क्रतुषु अहःसमूहे च क्रतौ तृतीयसवने स्तोमभागेषु ओं भूर्भुवः[६] स्वर्जनत् इत्यस्य सर्वाभिर्व्याहृतिभिर्विकारः[७] । अहीनोऽग्निष्टोमसंस्थोऽत्र विवक्षितः[८] । उक्थ्यादिसंस्थे हि प्रकृतितो विकारः प्राप्तः ॥६॥

विष्पर्धमानयोः सवृतसोमयोः[१] स्तोमभागानाम् उपर्युपरि स्तुतेषे स्तुतोर्जे स्तुत देवस्य सवितुः सवे । बृहस्पतिं वः प्रजापतिं वो वसून् वो देवान् रुद्रान् वो देवान् आदित्यान् वो देवान् साध्यान् वो देवान् आप्यान् वो देवान् विश्वान् वो देवान् सर्वान् वो देवान् विश्वतस्परि

१. तु. तैसं ४, ४, १, १; गोब्रा २, २, १४; काश्रौ ११, १, १९-२१; आपश्रौ १४,९, ७-१०. २-२. °दिना स्तुतं (ता भा[२]) आचमनान्तेन मूको. ३. द्रक्तेत्यवस्येदक° भा[१] A; उक्ते त्यव° भा[२]. ४. °शुस्वरा मूको. ५. तु. गोब्रा २,२,१४. ६. नास्ति मूको. ७. सर्वाभिर्विकारः A. ८. विवर्जतः मूको. ९. संवृत° इति C शोधः द्र.

हवामहे । जनेभ्योऽस्माकम् अस्तु केवल इतः कृणोतु वीर्यम् इति जपन् परेषां ब्रह्माणम् अवेक्षेत ॥७॥[१]

विष्पर्द्धमानयोरित्यादि जपन् परेषां ब्रह्माणम् अवेक्षेतेत्यन्तं सूत्रम् । स्पर्द्धमानयोः समृतसोमयोः [२]सहसमारब्धसोमयोर्यजमानयोः । स्तोमभागानाम् उपर्युपरीति वीप्सावचनाद् एकैकस्य स्तोमभागस्योपरि स्तुतेषे स्तुतोर्जे[२] स्तुत देवस्य सवितुः सवे इत्यादिकरणाऽवस्थितं[३] निगदमन्त्रमनुमन्त्रयते जपन्नेतेषां प्रतिपक्षिणां [४]विस्पर्द्धमानानां विनाशं प्रति[४] ॥७॥[५]

स्तुतस्य स्तुतम् अस्यूर्जस्वत् पयस्वत् । ऊर्जं मह्यं स्तुतं दुहाम् आ मा स्तुतस्य स्तुतं गमेत्[६] । इन्द्रियावन्तो हवामहे धुक्षीमहि प्रजाम् इषम् । सा मे सत्याशीर्देवेष्वस्तु । ब्रह्मवर्चसं माऽऽगमयेत् इति स्तोत्रम् अनुमन्त्रयते ॥८॥[७]

स्तुतेत्यादिना मन्त्रद्वयेन स्तोत्रं सर्वमनुमन्त्रयते स्तोत्रशब्दसमानत्वात् ॥८॥

इन्द्रस्य कुक्षिः (अ ७, ११६ [१११], १) इत्यासिक्ते सोमे पूतभृतम् ॥९॥[८]

पूतभृदाख्यं सोमकलशम् अनुमन्त्रयते ॥९॥

स्तुते बहिष्पवमाने[९] वाचयति श्येनोऽसि (अ ६,४८,१) इति ॥क॥

बहिष्पवमाने स्तोत्रे स्तुते यजमानं वाचयति ॥क॥

वृषाऽसि (अ ६, ४८,३) इति माध्यन्दिने ॥ख॥

माध्यन्दिने पवमाने स्तोत्रे स्तुते यजमानं वाचयति ॥ख॥

ऋभुरासि (अ ६, ४८,२) इत्यार्भवे ॥ग॥ ॥१०॥[१०]

आर्भवे पवमाने स्तोत्रे स्तुते यजमानं वाचयति । आर्भवस्तार्तीयसवनिकः पवमानः प्रसङ्गादत्र श्रुतिः[११] ॥ग॥१०॥

१. तु. गोब्रा २,२, १४. २-२. समा…स्तुतोर्जे A. ३. °दिकराणाव° भा[१] A. ४-४. विस्पर्द्धानां विशाण मूको. ५. तु. माश्रौ ५,२,१४, २३-२४. ६. गमे च वा. ७. तु. तैसं ३, २, ७, २; आपश्रौ १२, १७, १७-१८. ८. तु. काश्रौ ९, ७, ३; आपश्रौ १२, १६, ११. ९. °मानस्तो° भा[१] A. १०. तु. गोब्रा १, ५,१२-१४; काश्रौ १३, १, ११; आपश्रौ १२, १७,१५-१६. ११. श्रुतौ भा[१] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणोक्तान् इत्यनुब्राह्मणिनः ॥११॥[1]

अनुब्राह्मणिनः कल्पकारा ब्राह्मणोक्तान् ब्राह्मणपठितान् मन्त्रान् श्येनोऽसि इत्यादीन् (गोब्रा १,५,१२) [2]यथायजमानवाचमे मन्यन्ते[2] ॥११॥

अथाध्वर्युराह[3] अग्नीद् अग्नीन् विहर बर्हिस्तृणीहि पुरोडाशान् अलं कुरु इति ॥१२॥[4]

अथेत्यानन्तर्यार्थः । अध्वर्युराह ब्रूते अग्नीद् अग्नीन् इति प्रैषमन्त्रम् ॥१२॥

इति वैतानकल्पे तृतीयेऽध्याये सप्तमी कण्डिका ॥

[१८]

आग्नीध्र आग्नीध्रीयाद् अङ्गारैर्द्वे सवने विहरति[5] । शलाकाभिस्तृतीयसवनम् ॥क॥[6]

आग्नीध्रोऽध्वर्युप्रेषितः प्रैषार्थमत्र तिष्ठति । अङ्गारैरिति द्वितीयार्थे तृतीया । द्वे सवने इति सप्तम्यर्थे द्वितीया [6]तथा संबन्धत्वात्[6] । तेनाग्नीध्रीयाद् अग्नेः अङ्गारान् विहरति होत्रादिधिष्ण्येषु नयति द्वयोः सवनयोः[7] । तृतीयसवने तु शलाकाभिः । शलाका इषीकाः काष्ठमय्यो[8] वा । अन्ये तु अङ्गारैरिति करणतृतीयां मन्यन्ते । तेन अग्नीद् अङ्गारैः [9]करणभूतैः अग्नीन् विहरति[9] । तथापि शलाकाभिरिति स्पष्टा करणता ॥क॥

इदानीं येषु स्थानेषु यथा [10]प्रसृतः स विहरति[10] तदर्थम्[11] आह—

प्रत्यङ्मुखो होतृमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकानां धिष्ण्येषु मार्जालीये ॥ख॥

1. तु. गोब्रा १, ५, १२; १३; १४. 2-2. °माने न नोन्ते मूको. 3. अथाप्याहाध्वर्युः वा पू. 4. तु. तैसं ६, ३, १; २; गोब्रा २, २, १६; काश्रौ ९, ७, ४; आपश्रौ १२, १७, १९. 5. तु. तैसं ६, ३, १; २; काठ २६, १; गोब्रा २, २, १६; काश्रौ ९, ७, ५; आपश्रौ १२, १८, १-२; १३, १९, २. 6-6. यां वसन्वत्वात् भा[1] A; यां वसन्वात् भा[2]. 7. नास्ति मूको. 8. काष्ठभेदो भा[2]. 9-9. °णभूतैर्वि° मूको. 10-10. °सूततत्त्वविरति भा[1] A.; °सूत विरति भा[2]. 11. तदार्थम् मूको.

तत्रैव प्रत्यानयति ॥ग॥ ॥१;२॥[1]

आग्नीध्रीयात् सकृद् गृहीतैरङ्गारैर्द्वयोः सवनयोः, शलाकाभिः तृतीयसवने प्रत्यङ्मुख आग्नीध्रो होत्रादिधिष्ण्येषु मार्जालीये सप्तमेऽग्नीन् विहृत्य तत्रैवाऽऽग्नीध्रीयं शेषम् अग्निं प्रत्यानयति ॥ख-ग॥१-२॥

अनु पृष्ठ्याम् आस्तीर्य पुरोडाशान् अलंकुरुते ॥३॥[2]

पृष्ठ्या वेदेर्मध्ये जघनाद् आरभ्य [3]प्राची रेखोत्तरवेदिं यावद् गता । तां[3] पृष्ठ्याम् अनु, अनुपृष्ठ्यम् इति । पृष्ठ्यालक्षितं देशं स्तृणातीत्यर्थः । बर्हिः स्तीर्त्वा । सवनीयान् पुरोडाशादीन् अलङ्कुरुते । आज्येनाऽभिघारयति । पुरोडाशान् इति विरूपैकशेषत्वाद् धानादीन् अपि लक्षयति[4] । अलङ्करणं चैतन्निर्वपणाद्याग्नीध्रस्य[5] आक्षिपति प्रक्षिप्तौ[6] समानकर्तृत्वदर्शनात् । तथा च भगवान् वाचस्पतिर्भाष्यकारः पठति । प्रातरनुवाकेऽनूच्यमाने [7]पैतापुत्रीयसुब्रह्मण्यानिगदाद् आग्नीध्रः सवनीयान्[7] निर्वपति—इन्द्रायैकादशकपालम्, हरिवते[8] धानाः, पूषण्वते करम्भम्, सरस्वतिमते दधि, [9]मित्रावरुणाभ्यां पयस्यां । न चैषोत्तरयोः[9] सवनयोः । माध्यन्दिने द्रोणकलशे पवित्रमोजनात् पशुपुरोडाशप्रथमान्[10] सवनयोर्निर्वपति । तृतीयसवने अभिषोतारोऽभिषुण्वो-लूखलानुद्वादयताऽग्नीद् आशिरं विनय सोम्यस्य वित्तादिति प्रेष्य[11] सवनीयान् मारुतं चरुं वारुणम् एककपालं निर्वपति । अलङ्करणस्य तु कालोत्कर्षः प्रैषात् । शाखान्तरविहितकर्मसंबन्धे हि ऋत्विजां भाष्यकारेणैव सर्वशाखाप्रत्ययं स्वनूप्रोक्तम् । वचनं न्याय्यस्येति? । वचनं होतुः सौत्रामण्यां यजुर्वेदे तथाऽऽग्नीध्रस्य दर्शपूर्णमासयोः...संमर्शनः? कपालोपधानस्य शेषकपालोपधानयोः समकालत्वात् । तथा सवनीयपुरोडाशनिर्वपणस्याप्रकृतौ निर्वपति । अलङ्करणनिर्वपणसमानकर्तृकत्वान्नियतम् अलङ्करणम् आग्नीध्रस्य । अग्नीद् अग्नीन्विहर [12]इत्यादिप्रैषान्तम् अध्वर्युः प्रतिगरविधिं न[12] कुर्यात् । तयोर्विधिः

1. तु. आपश्रौ १२, १८, ५-६. 2. तु. बौश्रौ ७, १२; काश्रौ ९, ७, ६; आपश्रौ १२, १८, ७. 3-3. °चीरेखोत्तरवेदियावनानां मूको. 4. लक्षति मूको. 5. °पणाद्य- याग्नी° मूको. 6. प्रक्षितौ भा[1] A. 7-7. °पुत्रियासुब्रह्मण्यानिगदाग्नीध्रसवनीय मूको. 8. तु. आपश्रौ १२, ४, ६; हरिमते मूको. 9-9. करण वा तपं यस्यान वैषोत्तर° मूको; † तु. माश्रौ २, ३, २, ४. 10. °डाशप्रथमयात् मूको. 11. तु. काश्रौ १०, ३, १२ सौम्य वित्ताः भा[1] A. 12-12. °दिप्रेषात्तमध्वर्योः प्रतिगरविधिः मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

होतृवेदे ब्रह्मवेदे च । तथा स्तोत्रियादिनियमविधिरुद्गात्रादीनां[1] सामवेदे । एवमन्येषाम् ऋत्विजां शाखान्तरे स्मार्तकर्मसंबन्धे सति बहुप्रसङ्गदर्शनं ग्रन्थगौरवाद् अत्र नोच्यते ॥३॥

ये अग्नयो विहृता धिष्ण्याः पृथिवीम् अनु । ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्ते नो मा हिंसिषुः इति विहृतान् अनुमन्त्रयते ॥क॥

विहृतान् धिष्ण्येष्वग्नीन् अनुमन्त्रयते ॥क॥

उत्तरयोः सवनयोः पुनर्मैत्विन्द्रियम् (अ ७,६९ [६७], १) इति । आहवनीयम् अपरेणेत्युक्तम् ॥ख॥ ॥४॥

माध्यन्दिनतृतीयसवनयोः पुनर्मैत्विन्द्रियम् इति भवति । आनवनीयम् अपरेणाऽतिव्रज्याऽऽसाद उपविशति । उपविष्टे होतरि होतारम् (वैता १६, ७; ८) इत्युक्तं भवति ॥ख॥४॥

प्रवृताः प्रवृताहुतीर्जुहृति जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाग् यद्वाचो मधुमत्तमं तस्मिन् मा धाः स्वाहा । वाचे स्वाहा वाचस्पतये स्वाहा सरस्वत्यै स्वाहा इति ॥क॥

अध्वर्युविहृतेन[2] पुरोडाशेन[3] प्रचरन्तः[4] प्रवृता यथाक्रमं प्रवृताख्याम् आहुतिं जुहृति ॥क॥

मनसा चतुर्थीम् ॥ख॥ ॥५॥[5]

चतुर्थीम् आहुतिं मनसा जुहृति[6] सरस्वत्यै स्वाहा इति ॥ख॥ ॥५॥

सप्ताहुतीरित्येके सरस्वते स्वाहा महोभ्यः संमहोभ्यः स्वाहा । ऋचा स्तोमम् इति ॥६॥[7]

एके स्वाचार्याः सप्ताऽऽहुतीर्मन्यन्ते पूर्वाश्चतस्र उत्तरास्तिस्रः ॥६॥

वपामार्जनान्त उपोत्थाय दिवस्पृष्ठे (अ १३, २, ३७) इत्यादित्यम्

---

१. श्रोत्रियानियमविधिहोत्रा° मूको. २. अध्वर्युविहितेन मूको. ३. नास्ति भा[१२] A. ४. प्रचरेन भा[१]; प्रचरन A; नास्ति भा[२]. ५. तु. काश्रौ ९, ८, १५; आपश्रौ ११, २०, १. ६. जुहोति मूको. ७. तु. गोब्रा २, २,१७; कौसू ५, ७.

उपतिष्ठन्ते[1] ॥७॥

सवनीयपशुवपामार्जनान्ते चात्वालदेशं[2] नवभिः[3] "संतिष्ठमाना वेदिं"[4] दशम्या उदायुषा (अ ३, ३१, १०) इत्युपतिष्ठन्ते । उपोत्थायाऽऽदित्यम्[5] उपतिष्ठन्ते । बहुवचनं सर्वार्थम् ॥७॥

मा प्रगाम (अ १३, १, ५९) इत्याव्रज्याऽऽहवनीयं निर्मथ्यं यूपम् आदित्यम् अग्नयः सगरा स्थ सगरेण नाम्ना रौद्रेणाऽनीकेन पात माऽग्नयः पिपृत माऽग्नयो गोपायत मा नमो वोऽस्तु मा मा हिंसिष्ट इति ॥८॥[6]

उपोत्थानदेशाद् आव्रज्याऽऽहवनीयादीनुपतिष्ठन्ते[7] । निर्मथ्योऽग्निर्य[8] आहवनीये प्रभृतः[9] ॥८॥

आग्नीध्रीयम् अग्निम् उत्तरेण सदोऽभिव्रजन्ति ॥९॥

आग्नीध्रीयम् उत्तरेण सदोदेशम्[10] अभिव्रजन्ति । [11]बहुवचनात् सर्वे[11] ॥९॥

धिष्ण्यवन्तो यजमानश्च पूर्वया द्वारा प्रसर्पन्ति ॥क॥

[12]सदसि पूर्वया द्वारा प्रसर्पन्ति प्रविशन्ति धिष्ण्यवन्तः ॥क॥

अपरेऽपरया ॥ख॥ ॥१०॥[13]

अपरे ब्रह्मोद्गात्रादयोऽपरया द्वारा प्रविशन्ति ॥१०॥

सदः प्रसृप्स्यन्तो[14] धिष्ण्यान् नमस्कुर्वन्ति धिष्ण्येभ्यो नमो नमः इति ॥११॥[15]

प्रसर्पणे गुणविधिः । प्रसर्पणं करिष्यन्तो धिष्ण्यान् अग्नीन् नमस्कुर्वन्ति धिष्ण्येभ्यो नमः इति ॥११॥

---

१. °तिष्ठते ब. २. °लवेशे मूको. ३. = अ ३,३१,१-९. ४-४. सन्ति वेदि मूको. ५. नास्ति भा[१] A. ६. तु. काश्रौ ९, ८, १७–२३; आपश्रौ १२,१९,६–२०,११. ७. °दीन्युपतिष्ठन्तो भा[१] A. ८. निर्मथ्याग्नेर्य मूको. ९. प्रभृते मूको. १०. °देशे A. ११-११. नास्ति भा[२]. १२. इवः प्रभृति १८ क सूत्रान्तं नास्ति भा[१] A. १३. तु. काश्रौ ११, ६, ३५. १४. तु. गोब्रा; हिश्रौ ८, ५, १५; वैतु. आपश्रौ १२, १८, १६; C प्रसृ°; प्रसृप्सन्तः भा[१]. १५. तु. गोब्रा २,२,१८.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रष्ट्रे[1] नमः इति द्रष्टारं प्रसर्पन्तः उपश्रोत्रे नमः इत्युपश्रोतारम् ॥१२॥[2]

सर्पन्तमेव[3] करिष्यन्तो द्रष्टारम् अग्निं नमस्कुर्वन्ति ॥१२॥

चात्वालोत्करशामित्रोवध्यगोहा[4]ऽऽस्तावाऽऽग्नीध्रीयाऽच्छावाकवादं मार्जालीयं खरं धिष्ण्यान् अन्यांश्चोपतिष्ठन्ते अग्नयः सगरा स्थ इति ॥१३॥

[5]सर्पन्त एव चात्वालादच्छावाकवादान्तान् समस्तान् उपतिष्ठन्ते। मार्जालीयादीन् भेदेन[5] पृथग्विभक्तिनिर्देशात्। एके तु 'सर्वान् सहृद्[6] एवेच्छन्ति अग्नयः' इति मन्त्रे बहुवचननिर्देशात्। शामित्रं पशुश्रपणस्थानम्। ऊवध्यगोहः[7] पशोः पुरीषं यस्मिन् गुह्यते निगुह्यते। आस्तावो बहिष्पवमानस्तोत्रगानस्थानम्। सदसः[8] पूर्वद्वाराद् उत्तरतो यत्राऽच्छावाकस्य वादो भवति सोऽच्छावाकवादः। तस्मादेव द्वाराद् दक्षिणतो मद्यचमसादिप्रक्षालनस्थानं मार्जालीयः। अन्यान् शालामुखीयादीन् ॥१३॥

उर्वन्तरिक्षं वीहि इति सदोऽभिमृशन्ति ॥क॥

'सर्पन्तः सदो बर्हिस्तम्भैर् अभिमृशन्ति'[9] ॥क॥

[10]'देवीं द्वारौ[10] मा मा सन्ताप्तम् (तैसं ३,२,४,४), लोकं मे लोककृतौ[11] कृणुतम्'[12] (तैसं १,१,१२,१) इति द्वार्ये ॥ख॥ ॥१४॥[13]

'देवी द्वारौ इति प्रसर्पन्त एव द्वारे[14] सर्वेऽभिमृशन्ति ॥१४॥

प्रसृप्य अनुख्यात्रे नमः इत्यनुख्यातारम् ॥क॥[15]

सदसि प्रविश्यानुख्यातारम् आदित्यं नमस्कुर्वन्ति ॥क॥

---

१. तु. काठ २६,१२; आपश्रौ.; वैतु. गोब्रा २, २, १९ (तु. तैसं ३, ३, ८, ५; गोब्रा २, ४,९); C उपद्रष्ट्रे २. तु. गोब्रा २, २, १९; आपश्रौ १२, २०,६. ३. सर्वाणमेता मूको. ४. °ध्यगूहा° वा पू मा[1] A. ५-५. सर्वत्र एव चात्वालादच्छावाक होगः समन्तादुपतिष्ठन्ते मार्जालीया दिनेदेन (°लीयादिभेदेन A) मूको. ६-६. सर्वा हृद्° मूको. ७. °गूहं मूको. ८ उवध्यसदस मूको. ९-९. सर्वे···बर्हिस्तैरहिमिम्° मूको. १०-१०. देवीर्द्वारो वा पू G. ११. लोकंकृतौ पू. १२. कृणुतम् म वा. १३. तु. आश्रौ ४, १३,५. १४. द्वारं मूको. १५. तु. गोब्रा २ २, १८.

उत्तरेण धिष्ण्यान् परिक्रम्य स्वं स्वं धिष्ण्यम् अभिप्रसृप्ताः उपद्रष्टे नमः इत्युपद्रष्टारम् ॥ख॥[1] ॥१५॥

उत्तरेण धिष्ण्यान् अग्नीन् परिक्रम्य स्वं स्वं धिष्ण्यम् आभिमुख्येन[2] प्राप्ता उपद्रष्टारं ब्राह्मणं ब्रह्माणं नमस्कुर्वन्ति ॥ख॥ ॥१५॥

उपविश्य जपन्ति अभि त्वेन्द्र (अ ६,९९,१) इति ॥क॥

धिष्ण्यान् अभिमुखा उपविश्य जपन्ति ॥क॥

स्तोत्रं यजमानः[3] ॥ख॥ ॥१६॥

उद्गातृभिः स्तोत्रं स्तूयमानं यजमान उपविश्य समीपे निविश्य अभि त्वेन्द्र इति जपति। स्तोत्रग्रहणं सर्वस्तोत्रार्थम् ॥ख॥ ॥१६॥

सदस्यो ब्रह्माणं दक्षिणेन ॥क॥

सदस्यो ब्रह्मपुरुषं ब्राह्मणं दक्षिणेनोपविश्य जपति। सदस्योऽन्यो[4] वा समाख्यानात् ॥क॥

स्तोत्रानुमन्त्रणात् जनत् इति मनसा ॥ख॥ ॥१७॥[5]

स्तुतस्य स्तुतमसि (वैता १७, ८) इति स्तोत्राऽनुमन्त्रणात् जनत् इति मनसा 'जपति, सदस्य' एव अधिकारात् ॥ख॥ ॥१७॥

विसंस्थिते यथाधिष्ण्यम् उत्तरेण पूर्वया द्वारा निष्क्रामन्ति ॥क॥

अपरिसमाप्ते कर्मणि [7]आवश्यककार्यर्थम् एतत्। स्वधिष्ण्यम्[7] उत्तरेण पूर्वया द्वारा निष्क्रामन्ति ॥क॥

[8]मैत्रावरुणधिष्ण्यम् अधिष्ण्यवन्तः ॥ख॥ ॥१८॥[†]

अधिष्ण्यवन्तोऽवस्थिता मैत्रावरुणधिष्ण्यम् उत्तरतः पूर्वया द्वारा निष्क्रामन्ति[8] ॥ख॥ ॥१८॥

इति वैतानकल्पे तृतीयेऽध्याये अष्टमी कण्डिका ॥

---

१. तु. गोब्रा २,२,१९. २. धिष्ण्याभिमुखो न मूको. ३. C °मानः इति प्रक्षिप्तमिव पाठ इति विमृश्यम् (तु. K L JRAS १९१०, ९३७). ४. सदस्यो मूको. ५. तु. गोब्रा १, २, १९; वैता १७, ८. ६-६. °पति ···स्ये मूको. ७-७. °र्थं तत्स्व° मूको. ८-८. नास्ति मा[1] A. †. तु. काश्रौ ११, १,२७-२८; आपश्रौ १४,१०,९; बौश्रौ ७,११उ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१९]

सवनीयपुरोडाशानाम्[1] ऐन्द्रान् ॥१॥[2]

द्विदेवत्यान् होमांस्तद्देवत्येन मन्त्रेणानुमन्त्रयते पारिभाषिकेण[3] वा। पुरोडाशानामिति बहुवचनं [4]विरूपैकशेषत्वाद् धानादीनामपि ग्रहणार्थं सहप्रदानत्वात् । सकृद् वाऽनुमन्त्रणं प्रैषयाज्यावत् । ऐन्द्रानिति[4] बहुवचनं कर्मभेदार्थं प्राजापत्येषु पशुष्वेव ॥१॥

द्विदेवत्यानाम् ॥क॥

[5]ग्रहाणां होमा आवर्तयिष्यन्त[5] इति शेषः ॥क॥

[6]ऐन्द्रवायवस्य होमौ वायुरन्तरिक्षस्य (अ ५,२४,८), इन्द्रवायू (अ ३,२०,६) इति[6] ॥ख॥ ॥२॥[7]

ऐन्द्रवायवग्रहस्य होमौ[8] यथासंख्यम् अनुमन्त्रयते। पूर्वौ वा द्विदेवत्यो मन्त्रलिङ्गात् ॥२॥

मैत्रावरुणस्य मित्रावरुणौ वृष्ट्याः (अ ५, २४, ५) इति ॥३॥[7]

मैत्रावरुणस्य होमम् अनुमन्त्रयते ॥३॥

आश्विनस्य अश्विना ब्रह्मणा (अ ५,२६, १२[ab]) इत्यर्धर्चेन ॥४॥[9]

आश्विनस्य ग्रहस्य होमम् अनुमन्त्रयते । होत्राऽध्वर्युद्वारेणैव हूयन्ते द्विदेवत्याः ॥४॥

प्रस्थितैश्चरिष्यन्न् अध्वर्युः संप्रेष्यति होतर्यज प्रशास्तर्ब्राह्मणाच्छंसिन् पोतर्नेष्टर् अग्नीत् इति ॥५॥[10]

[11]प्रस्थितैः सोमैः[11] चरिष्यन् होतर्यज इत्यादिना प्रैषेण प्रेष्यति याज्याप्रयोगात् ॥५॥

---

१. °शान् इति C शोधप्रस्तावश्चिन्त्यः (तु. काश्रौ ९,९,५). (२) तु. काश्रौ ९, ९, २–१२; आपश्रौ १२, २०, १२–१८. ३. परिभा° मूको. ४-४. नास्ति भा[1] A. ५-५. ग्रहणां भौ(भो भा[1])मावर्तविष्य° मूको. ६-६. नास्ति भा[1] A. ७. तु. काश्रौ ९,९,११-१९; आपश्रौ १२,२०,१८-२१. ८. होमः भा[1] A. ९. तु. काश्रौ ९, ९, ११-१९; आपश्रौ १२, २१, ७-१०. १०. तु. काश्रौ ९,११, ७-८; आपश्रौ १२,२३,१६;२४,१. ११-११. प्रस्थितं सोमे मूको.

इन्द्र त्वा वृषभं वयम् (अ २०, १, १) इति ब्राह्मणाच्छंसी यजति ॥क॥[1]

संप्रैषाद् यथाक्रमं ब्राह्मणाच्छंस्येतया यजति ॥क॥

उत्तराभ्यां पोत्राग्नीध्रौ ॥ख॥ ॥६॥

[2]इन्द्र त्वा इत्येतस्या उत्तराभ्यां मरुतो यस्य हि क्षये (अ २०, १, २-३) इत्येताभ्यां यथाक्रमं पोत्राग्नीध्रौ[2] यजतः ॥ख॥६॥

याज्यानाम् अन्तः प्लवते ॥७॥

सर्वासां याज्यानां गुणविधिरयम् । अन्त्यो वर्णः प्लुतो भवति ॥७॥

ये३यजामहे वौ३षट् इत्याद्यन्तौ ॥क॥

याज्यानाम् एतावाद्यन्तौ भवतो यथाक्रमम् ॥क॥

आदिप्लुतौ ॥ख॥ ॥८॥[3]

ये३यजामहे वौ३ षट् इत्येतावादिप्लुतौ भवतः । आ इ भावादि तु व्याकरणाद् अवगन्तव्यम् ॥ख॥८॥

अनवानं प्रातःसवने ॥क॥

ऋग्वेदेन[4] अन्तस्थप्राणः प्रातःसवने यजति । निदर्शनम्[5] ये३यंजामह इन्द्र त्वा वृषभम् (अ २०,१,१[a]) इत्यादि मध्वो [6]अन्धसो (अ २०,१,१[c]) वौ३षट्[6] इति ॥क॥

वषट्कृत्य वागोजः सह ओजो मयि प्राणापानौ इत्यनुमन्त्रयते ॥ख॥ ॥९॥[7]

सर्वत्र वषट्कारं कृत्वा आत्मानम् अनुमन्त्रयते ॥ख॥९॥

सोमस्याऽग्ने वीही३ इत्यन्तप्लुतेनाऽनुवषट्कुर्वन्ति ॥१०॥[8]

याज्यावषट्कारावसानानन्तरम् अनुवषट्कुर्वन्ति प्लुतवषट्कारविधान-

---

१. तु. गोब्रा २, २, २०; आपश्रौ ५, ५, १८. २-२. नास्ति भा[1]. ३. तु. शांश्रौ १, १,४२;२,२. ४. ऋग्वेदं भा[1]; ऋग्वेदे भा[1]. ५. तिदडनि भा[1] A; तिदनुनं भा[2]. ५-६. अंजसा३ षट् मूको. ७. तु. गोब्रा २, ३, ६; आश्रौ १,५, १७. ८. तु. गोब्रा २,३,१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रष्ट्रे[1] नमः इति द्रष्टारं प्रसर्पन्तः उपश्रोत्रे नमः इत्युपश्रोतारम् ॥१२॥[1]

सर्पणमेव[1] करिष्यन्तो द्रष्टारम् अग्निं नमस्कुर्वन्ति ॥१२॥

चात्वालोत्करशामित्रोवध्यगोहा[2]ऽऽस्तावाऽऽग्नीध्रीयाऽच्छावाकवादं मार्जालीयं खरं धिष्ण्यान् अन्यांश्चोपतिष्ठन्ते अग्नयः सगरा स्थ इति ॥१३॥

[3]सर्पन्त एव चात्वालाद्यच्छावाकवादान्तान् समस्तान् उपतिष्ठन्ते। मार्जालीयादीन् भेदेन[3] पृथग्विभक्तिनिर्देशात्। एके तु 'सर्वान् सकृद्' एवेच्छन्ति अग्नयः इति मन्त्रे बहुवचननिर्देशात्। शामित्रं पशुश्रपणस्थानम्। ऊवध्यगोहः[4] पशोः पुरीषं यस्मिन् गुह्यते निगुह्यते। आस्तावो बहिष्पवमानस्तोत्रगानस्थानम्। सदसः[5] पूर्वद्वाराद् उत्तरतो यत्राऽच्छावाकस्य वादो भवति सोऽच्छावाकवादः। तस्मादेव द्वाराद् दक्षिणतो ग्रहचमसादिप्रक्षालनस्थानं मार्जालीयः। अन्यान् शालामुखीयादीन् ॥१३॥

उर्वन्तरिक्षं वीहि इति सदोऽभिमृशन्ति ॥क॥

[6]सर्पन्तः सदो बर्हिस्तम्भैर् अभिमृशन्ति[6] ॥क॥

[10]देवी द्वारौ[10] मा मा सन्ताप्तम् (तैसं ३,२,४,४), लोकं मे लोककृतौ[11] कृणुतम्[12] (तैसं १,१,१२,१) इति द्वार्यै ॥ख॥ ॥१४॥[13]

देवी द्वारौ इति प्रसर्पन्त एव द्वारे[14] सर्वेऽभिमृशन्ति ॥१४॥

प्रसृप्य अनुख्यात्रे नमः इत्यनुख्यातारम् ॥क॥[15]

सदसि प्रविश्यानुख्यातारम् आदित्यं नमस्कुर्वन्ति ॥क॥

---

१. तु. काठ २६,१२; आपश्रौ.; वैतु. गोब्रा २,२,१९ (तु. तैसं ३,३,८,५; गोब्रा २,४,९); C उपद्रष्ट्रे २. तु. गोब्रा २,२,१९; आपश्रौ १२,२०,६. ३. सर्वाणमेता मूको. ४. °घ्यगूहा° वा पू भा[1] A. ५-५. सर्वत्र एव चात्वालाद्यच्छावाक होताः समन्तात्युपतिष्ठन्ते मार्जालीया दिनेदेन (°लीयादिभेदेन A) मूको. ६-६. सर्वा वृद्° मूको. ७. °गूहं मूको. ८ उवध्यसद्स मूको. ९-९. सर्प···बर्हिस्तैरहिभिमृ° मूको. १०-१०. देवीर्द्वारो वा पू G. ११. लोकं कृतौ पू. १२. कृणुध्वम् ब्र वा. १३. तु. आश्रौ ४,१३,५. १४. द्वारं मूको. १५. तु. गोब्रा २,३,१८.

उत्तरेण धिष्ण्यान् परिक्रम्य स्वं स्वं धिष्ण्यम् अभिप्रसृप्ताः उपद्रष्ट्रे नमः इत्युपद्रष्टारम् ॥ख॥[1] ॥१५॥

उत्तरेण धिष्ण्यान् अग्नीन् परिक्रम्य स्वं स्वं धिष्ण्यम् आभिमुख्येन[2] प्राप्ता उपद्रष्टारं ब्राह्मणं ब्रह्माणं नमस्कुर्वन्ति ॥ख॥ ॥१५॥

उपविश्य जपन्ति अभि त्वेन्द्र (अ ६,९९,१) इति ॥क॥

धिष्ण्यान् अभिमुखा उपविश्य जपन्ति ॥क॥

स्तोत्रं यजमानः[3] ॥ख॥ ॥१६॥

उद्गातृभिः स्तोत्रं स्तूयमानं यजमान उपविश्य समीपे निविश्य अभि त्वेन्द्र इति जपति। स्तोत्रग्रहणं सर्वस्तोत्रार्थम् ॥ख॥ ॥१६॥

सदस्यो ब्रह्माणं दक्षिणेन ॥क॥

सदस्यो ब्रह्मपुरुषं ब्राह्मणं दक्षिणेनोपविश्य जपति। सदस्योऽन्यो[4] वा समाख्यानात् ॥क॥

स्तोत्रानुमन्त्रणात् जनत् इति मनसा ॥ख॥ ॥१७॥[5]

स्तुतस्य स्तुतमसि (वैता १७,८) इति स्तोत्राऽनुमन्त्रणात् जनत् इति मनसा [6]जपति, सदस्य[6] एव अधिकारात् ॥ख॥ ॥१७॥

विसंस्थिते यथाधिष्ण्यम् उत्तरेण पूर्वया द्वारा निष्क्रामन्ति ॥क॥

अपरिसमाप्ते कर्मणि [7]आवश्यकार्थम् एतत्। स्वधिष्ण्यम्[7] उत्तरेण पूर्वया द्वारा निष्क्रामन्ति ॥क॥

[8]मैत्रावरुणधिष्ण्यम् अधिष्ण्यवन्तः ॥ख॥ ॥१८॥†

अधिष्ण्यवन्तोऽवस्थिता मैत्रावरुणधिष्ण्यम् उत्तरतः पूर्वया द्वारा निष्क्रामन्ति[8] ॥ख॥ ॥१८॥

इति वैतानकल्पे तृतीयेऽध्याये अष्टमी कण्डिका ॥

---

१. तु. गोब्रा २,२,१९. २. धिष्ण्याभिमुखो न मूको. ३. C °मानः इति प्रक्षिप्तमिव पाठ इति विमृश्यम् (तु. K L JRAS १९१०, ९३७). ४. सदस्यो मूको. ५. तु. गोब्रा १,२,१९; वैता १७,८. ६-६. °पति ···स्ये मूको. ७-७. °र्थं तत्स्व° मूको. ८-८. नास्ति भा[1] A. †. तु. काश्रौ ११,१,२७-२८; आपश्रौ १४,१०,९; बौश्रौ ७,११उ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१९]

सवनीयपुरोडाशानाम्[१] ऐन्द्रान् ॥१॥[२]

द्विदेवत्यान् होमांस्तद्देवत्येन मन्त्रेणानुमन्त्रयते पारिभाषिकेण[३] वा। पुरोडाशानामिति बहुवचनं "विरूपैकशेषत्वाद् धानादीनामपि ग्रहणार्थं सहप्रदानत्वात् । सकृद् वाऽनुमन्त्रणं प्रैषयाज्यावत् । ऐन्द्रानिति[४] बहुवचनं कर्मभेदार्थं प्राजापत्येषु पशुष्वेव ॥१॥

द्विदेवत्यानाम् ॥क॥

[५]ग्रहाणां होमा आवर्तयिष्यन्त[५] इति शेषः ॥क॥

[६]ऐन्द्रवायवस्य होमौ वायुरन्तरिक्षस्य (अ ५,२४,८), इन्द्रवायू (अ ३,२०,६) इति[६] ॥ख॥ ॥२॥[७]

ऐन्द्रवायवग्रहस्य होमौ[८] यथासंख्यम् अनुमन्त्रयते। पूर्वो वा द्विदेवत्यो मन्त्रलिङ्गात् ॥२॥

मैत्रावरुणस्य मित्रावरुणौ वृष्ट्याः (अ ५, २४, ५) इति ॥३॥[९]

मैत्रावरुणस्य होमम् अनुमन्त्रयते ॥३॥

आश्विनस्य अश्विना ब्रह्मणा (अ ५,२६, १२[ab]) इत्यर्धर्चेन ॥४॥[९]

आश्विनस्य ग्रहस्य होमम् अनुमन्त्रयते । होत्राऽध्वर्युद्वारेणैव हूयन्ते द्विदेवत्याः ॥४॥

प्रस्थितैश्चरिष्यन्न् अध्वर्युः संप्रेष्यति होतर्यज प्रशास्तर्ब्राह्मणाच्छंसिन् पोतर्नेष्टर् अग्नीत् इति ॥५॥[१०]

[११]प्रस्थितैः सोमैः[११] चरिष्यन् होतर्यज इत्यादिना प्रैषेण प्रेष्यति याज्याप्रयोगात् ॥५॥

---

१. °शान् इति C शोधप्रस्तावश्चिन्त्यः (तु. काश्रौ ९,९,५). (२) तु. काश्रौ ९, ९, २–१२; आपश्रौ १२, २०, १२–१८. ३. परिभा° मूको. ४-४. नास्ति भा[१] A. ५-५. ग्रहाणां भौ(भो भा[१])मावर्तविष्य° मूको. ६-६. नास्ति भा[१] A. ७. तु. काश्रौ ९,९,११-१९; आपश्रौ १२,२०,१८-२१. ८. होमः भा[१] A. ९. तु. काश्रौ ९, ९, ११-१९; आपश्रौ १२, २१, ७-१०. १०. तु. काश्रौ ९,११, ७-८; आपश्रौ १२,२३,१६;२४,१. ११-११. प्रस्थितं सोमे मूको.

इन्द्र त्वा वृषभं वयम् (अ २०, १, १) इति ब्राह्मणाच्छंसी यजति ॥क॥[१]

संप्रैषाद् यथाक्रमं ब्राह्मणाच्छंस्येतया यजति ॥क॥

उत्तराभ्यां पोत्राग्नीध्रौ ॥ख॥ ॥६॥

[२]इन्द्र त्वा इत्येतस्या उत्तराभ्यां मरुतो यस्य हि क्षये (अ २०, १, २-३) इत्येताभ्यां यथाक्रमं पोत्राग्नीध्रौ[२] यजतः ॥ख॥६॥

याज्यानाम् अन्तः प्लवते ॥७॥

सर्वासां याज्यानां गुणविधिरयम् । अन्त्यो वर्णः प्लुतो भवति ॥७॥

ये३यजामहे वौ३षट् इत्याद्यन्तौ ॥क॥

याज्यानाम् एतावाद्यन्तौ भवतो यथाक्रमम् ॥क॥

आदिप्लुतौ ॥ख॥ ॥८॥[३]

ये३यजामहे वौ३ षट् इत्येतावादिप्लुतौ भवतः । आ इ भावादि तु व्याकरणाद् अवगन्तव्यम् ॥ख॥८॥

अनवानं प्रातःसवने ॥क॥

ऋग्वेदेन[४] अन्तस्थप्राणः प्रातःसवने यजति । निदर्शनम्[५] ये३यजामह इन्द्र त्वा वृषभम् (अ २०,१,१[a]) इत्यादि मध्वो [६]अन्धसो (अ २०,१,१[c]) वौ३षट्[६] इति ॥क॥

वषट्कृत्य वागोजः सह ओजो मयि प्राणापानौ इत्यनुमन्त्रयते ॥ख॥ ॥९॥[७]

सर्वत्र वषट्कारं कृत्वा आत्मानम् अनुमन्त्रयते ॥ख॥९॥

सोमस्याऽग्ने वीही३ इत्यन्तप्लुतेनाऽनुवषट्कुर्वन्ति ॥१०॥[८]

याज्यावषट्कारावसानानन्तरम् अनुवषट्कुर्वन्ति प्लुतवषट्कारविधान-

---

१. तु. गोब्रा २, २, २०; आपश्रौ ५, ५, १८. २-२. नास्ति भा[१]. ३. तु. शांश्रौ १, १,४२;२,२. ४. ऋग्वेदं भा[१]; ऋग्वेदे भा[१]. ५. तिदडनि भा[१] A; तिदनुनं भा[२]. ५-६. अंजसा३ षट् मूको. ७. तु. गोब्रा २, ३, ६; आश्रौ १,५, १७. ८. तु. गोब्रा २,३,१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वोऽभ्यत्वाद्[1]। याज्यावदसति [2]ऋतुयाज्यायाम् अपि याज्यावद् एष शब्दः प्रयुज्यते। अवषट्कृत्येऽपि[2] वषट्कारसंबन्धाद् अनुमन्त्रणं भवति ॥१०॥

इदानीं होतुरनुमन्त्रणं विधीयते —

शुक्रामन्थिचमसहोमान् ऐन्द्रान् इन्द्रो दिवः (अ ५, २४, ११) इति ॥११॥[3]

शुक्रस्याध्वर्युः मन्थिनः प्रतिप्रस्थाता, [4]अच्छावाकचमसवर्जम् अनवानं चमसानां चमसाध्वर्यवो होतुरेकेनैव वषट्कारेण सह होमान्[4] जुह्वति, तान् अनुमन्त्रयते। ऐन्द्रानिति तद्धितनिर्देशाद् सिद्धेऽपि [5]तद्देवत्याऽनुमन्त्रण-मन्त्रविधानं नियमार्थम्[5]। एवम् अन्यत्रापि ॥११॥

अनुवषट्काराणाम् आ देवानाम् (अ १९, ५९, ३) इति ॥क॥[6]

अनुवषट्कारस्य होमम् अनुमन्त्रयते। बहुवचनं सर्वार्थम् ॥क॥

अनुहोमांश्च ॥ख॥

द्विदेवत्यान् अनुहोमांश्चानेनैवाऽनुमन्त्रयते ॥ख॥

मैत्रावरुणम् ऐन्द्रं मारुतं त्वाष्ट्रम् आग्नेयम् ॥ग॥[7] ॥१२॥

मैत्रावरुणम् ऐन्द्रं मारुतं त्वाष्ट्रम् आग्नेयम् [8]इति मैत्रावरुणादिद्वि-देवकान् प्रशास्तृब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीध्रा वषट्कारैः[9] प्रस्थितचमसहोमान् यथाक्रमं पारिभाषिकैरनुमन्त्रयन्ते[10] ॥ग॥ ॥१२॥

अग्नीधेष्टेऽध्वर्युराह[11] अयाड् अग्नीद् इति ॥क॥[12]

[13]अग्नीधा प्रस्थितेनेष्टे[13]ऽध्वर्युराग्नीध्रम् आह अयाट् इति ॥क॥

---

१. °रविधानायोज्यत्वात् भा[1] A. २-२. ऋतुयाज्यासि वपाज्यदेव्यशब्दः प्रयुज्येते वषट्कृत्ये वि मूको. ३. तु. काश्रौ ९, १०, ११-१२; ११, २; आपश्रौ १२, २३, ३-४; वैतु. G °शुक्रमन्थि°. ४-४. °चमसवर्जनं वानां चमसातां चमसाध्वर्यवो होनरेकै एव नैत्र वषट्कासेहणर होमा मूको. ५-५. °त्यासु मन्त्र मन्त्रविधानं नियमार्थी मूको. ६. तु. गोब्रा २, ३, १; काश्रौ ९, १०, ११-१२; ११, २. ७. तु. काश्रौ ९, ११, ६-९; आपश्रौ १२, २३, १४-२४, १. ८. मै(त्रि भा[1])वरुणद्वि° मूको. ९. वषट्काराः A. १०. परिभाषिकैमनु° मूको. ११. अग्नीध्रीष्ट्रे भा[12] A; अग्नीधेष्ट्रे पू; °ध्रीष्ट्रे वा. १२. तु. काश्रौ ९, ११, १०; आपश्रौ १२, २४, ३. १३-१३. अग्नीध्रात्प्रस्थि° भा[2]; आग्नीध्राद् प्रस्थितेनेष्ट्रे भा[1] A.

अयाट् इत्यग्नीत् ॥ख॥ ॥१३॥

अग्नीद् आग्नीध्रोऽध्वर्युं प्रत्याचष्टे अयाट् इति ॥१३॥

पूर्ववद् इडाभक्षः ॥१४॥

इडाभक्षो दर्शपूर्णमासवद् भवति ॥१४॥

सदसि सोमान् भक्षयन्त्युपहूताः ॥१५॥

सदसो मध्ये [1]होत्रादय उपहूता[1] यथाक्रमं वक्ष्यमाणेन विधिना सोमान् भक्षयन्ति। वषट्कारो [2]होमाभिषवौ समाख्यानं चोपहवनिमित्तम्[2] ॥१५॥

प्राशित्रवत् प्रतीक्ष्य प्रतिगृह्य अग्निहुतस्येन्द्रपीतस्येन्दोरिन्द्रियावतः[3]। यो भक्षो गोसनिरश्वसनिर्धनसनिः प्रजासनिर्लोकसनिः। तस्य त उपहूतस्योपहूतो भक्षयामि गायत्रेण छन्दसा तेजसा ब्राह्मणवर्चसेन इति ॥१६॥[4]

प्राशित्रवद् प्रतीक्ष्येत्यादि तेजसा ब्राह्मणवर्चसेनेत्यन्तं सूत्रम्। सोमान् भक्षयन्ति (वैता. १९, १५) इत्युक्तम्। तस्य विधिरुच्यते। अध्वर्यो-रुपस्थस्थितं सोमं प्राशित्रवत् सूर्यस्य त्वा चक्षुषा प्रतीक्षे इति[5] यजुषा[6] प्रतीक्ष्य देवस्य त्वा इति प्रतिगृह्य अग्निहुतस्य इत्यादिना मन्त्रेण भक्षयन्ति ब्राह्मणाच्छंस्यादयो यथाक्रमम् ॥१६॥

त्रैष्टुभेनेति माध्यन्दिने[7] ॥क॥

माध्यन्दिने सवने भक्षमन्त्रो विधीयते। गायत्रेणेत्यस्य स्थाने त्रैष्टुभेनेति ॥क॥

जागतेनेति तृतीयसवने ॥ख॥

तृतीयसवने जागतेनेति विकारः ॥ख॥

अनुष्टुप्छन्दसेति पर्यायेषु ॥ग॥

रात्रिपर्यायेषु अनुष्टुप्छन्दसेति विकारः ॥ग॥

१-१. होत्राद्युप° मूको. २-२. होमाभिषवो समाख्या वोपह° मूको. ३. °न्द्रपीथस्ये° पू G. ४. तु. वैता ३, ८-९; काश्रौ ९, १२, ३-४; आपश्रौ १२, २५, १६-२३. ५. तु. तैसं २, ६, ८, ५; गोब्रा २, १, २. ६. चक्षुषा भा[1] A. ७. मध्यंदिने भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पङ्क्तिछन्दसेति सन्धिचमसेषु ॥घ॥

सन्धिस्तोत्रचमसेषु[1] पङ्क्तिच्छन्दसेति विकारः ॥घ॥

अतिच्छन्दसेत्यप्तोर्याम्णि ॥ङ॥ ॥१७॥[2]

अप्तोर्याम्णि क्रतौ अतिरिक्तस्तोत्रेषु अतिच्छन्दसेति विकारः ॥ङ॥१७॥

भक्षित आत्मानं प्रत्यभिमृशन्ति शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः। सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥ ह्विन्वा[3] मे गात्रा हरिवो गणान्मे मा व्यरीरिषः । शिवो मे सप्तर्षीन् उपतिष्ठ मा मेऽवाग् नाभिम् अभि गाः[4] इति ॥१८॥[5]

भक्षिते सोमे आत्मानम् आत्मनः स्थानं हृदयम् अभिमृशन्ति ॥१८॥

चमसान् आप्याययन्ति आप्यायस्व । सं ते पयांसि (कौसू ६८,१०) इति ॥१९॥[6]

भक्षितसोमशेषांश्चमसान्[7] मन्त्रयाऽभिमन्त्रणमात्रेणाऽऽप्यायन्ति[8] ॥१९॥

तत्र श्लोकः —

पश्चैव कृत्वश्चमसान् यज्ञ आप्याययेत् कविः ।
आज्ये मरुत्वतीये च प्रस्थितांश्चापि[9] सर्वशः ॥ इति ॥२०॥

नराशंसभक्षणार्थस्तत्राऽऽप्यायनविधौ ब्राह्मणपठितश्लोको भवति। पश्चै-वेत्येवकारोऽवधारणार्थः ॥२०॥

अच्छावाकचमसहोमम् ऐन्द्राग्नम् ॥२१॥[10]

अच्छावाकस्य प्रस्थितसोमचमसहोमम् ऐन्द्राग्नं पारिभाषिकेणाऽनु-मन्त्रयते[11] ॥२१॥

---

१. नास्ति भा[1] A. २. तु. आपश्रौ १४, ३,६;१३;४,११; माश्रौ २, ५, ३, १५; १८; २७. ३. ह्विन्म ब वा पू. ४. तु. तैसं ३,२,५,३; C च. ५. तु. गोब्रा २, ३, ६; काश्रौ ९, १२, ५; आपश्रौ १२, २४, १३. ६. तु. काश्रौ ९, १२, ५; आपश्रौ १२, २५, २४; गोब्रा २,३,६; ऋ १, ९१, १६;१८. ७. भक्षितं सोमं शे° मूको. ८. °भिमात्रेणाप्या° भा[1] A. ९. तु. C शोधः; वैतु. पू G प्रस्थितास्चापि. १०. तु. काश्रौ ९, १२, १०-१५; आपश्रौ १२, २६,१२, ५-६. ११. परिभा° मूको.

यद्यश्नन्त्याग्नीध्रीये ॥२२॥[1]

भोजनकालदेशविधानार्थं सूत्रम् ॥२२॥

सदस्युपविष्टा यथाप्रैषम् ऋतून् यजन्ति ॥२३॥[2]

अशनस्थानाद्[3] आगत्य सदस्युपविष्टा यथाप्रैषम् । योऽयं प्रैषक्रमः — होता पोता नेष्टाऽऽग्नीध्रो ब्राह्मणाच्छंसी मैत्रावरुणः । होता पोता नेष्टाऽच्छावाको-ऽध्वर्युर्यजमानश्चेति प्रैषक्रमेण ऋतून् [4]मरुतः पोत्रात् इति[4] ऋतुयाज्याभिर् यजनम् इच्छन्ति[5] ॥२३॥

इति वैतानकल्पे तृतीयेऽध्याये नवमी कण्डिका ॥

[२०]

मरुतः पोत्राद् (अ २०, २,१) इति प्रथमोत्तमाभ्यां पोता ॥क॥

मरुतः पोत्रात् इत्यासां चतसृणां प्रथमया, देवो द्रविणोदाः (अ २०,२,४) इति चोत्तमया यथाप्रैषं पोता यजति ॥क॥

द्वितीययाऽऽग्नीध्रः ॥ख॥

अग्निराग्नीध्रात्[6] (अ २०,२,२) इति द्वितीयया ॥ख॥

तृतीयया ब्राह्मणाच्छंसी ॥ग॥ ॥१॥

इन्द्रो ब्रह्मा (अ २०,२,३) इति तृतीयया ॥ग॥१॥

यजमानोऽति प्रेष्यति होतरेतद् यज इति ॥२॥[7]

[8]यजमान आत्मानम् अतीत्य[8] ऋतुयाज्ययर्चा होतारं प्रेषयति होतरेतद्यज इति प्रैषेण ॥२॥

नाऽनुवषट्कुर्वन्ति ॥३॥[9]

---

१. तु. काश्रौ ९,१२,१६; आपश्रौ १२,२५,१२. २. तु. काश्रौ ९, १३, १-१९; आपश्रौ १२, २६, ८-२७. ३. अनशस्त्वाना° मूको. ४-४. नास्ति भा[1] A. ५. यन्निछति भा[1] A; °जननिच्छति भा[2]. ६. नास्ति भा[1] A. ७. तु. काश्रौ ९,१३,१६; आपश्रौ १२, २७,७. ८-८. °मानं आत्मा(त्म भा[2]) नामती° मूको. ९. तु. गोब्रा २,३,७ (तु. कौब्रा १४,९).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋतुयाज्यास्वनुवषट्कारं न कुर्वन्ति ॥३॥

तत्र श्लोकः—

द्विदेवत्यान् ऋतुयाजान् यश्च पात्नीवतो ग्रहः ।
'आदित्यग्रहसावित्रौ तान् स्म माऽनुवषट्कृथाः[1] इति ॥४॥

तत्रानुवषट्कारनिषेधे ब्राह्मणपठितः श्लोको भवति ॥४॥

इदानीम् ऋतुहोमाऽनुमन्त्रणम् उच्यते[2]—

ऋतुहोमान् ॥क॥

अनुमन्त्रणार्थं वक्ष्याम इति शेषः ॥क॥

ऐन्द्रं मारुतं त्वाष्ट्रम् आग्नेयम् ऐन्द्रं मैत्रावरुणं चतुरो द्राविणोदसान् आश्विनं गार्हपत्यम् ॥ख॥ ॥५॥

एतान् द्वादश यथाप्रैषमेव ऋतुहोमान् पारिभाषिकैरनुमन्त्रयते[3] । गृहपतिरग्निः, विशेषगुणत्वात्[4] तस्य । होमः[5] गार्हपत्यः[5] । तेन गार्हपत्यम् आग्नेयम् अग्ने गृहपते इति लिङ्गवताऽनुमन्त्रयते ॥५॥

ऋतुपात्रे[6] भक्षयन्ति लिम्पन्ति वाऽवजिघ्रन्ति वा कोऽसि यशोऽसि यशोदा असि यशो मयि धेहि इति ॥६॥[7]

ऋतुपात्रे सोमं भक्षयन्ति, लिम्पन्ति वा ओष्ठयोः, अवजिघ्रन्ति वा घ्राणेन[8] इति । यत्र भक्षमन्त्रः प्रत्याम्नायकः ॥६॥

नाराशंसांस्तूष्णीं प्रतिगृह्य भक्षयन्ति नराशंसपीतस्य देव सोम ते नृभिः ष्टुतस्य मतिविदः । ऊमैः पितृभिर्भक्षितस्योपहूतस्योपहूतो भक्षयामि इति ॥७॥[10]

१-१. तु. आश्रौ ५,५,२१; आपश्रौ १२, २४, २; C. च; वैतु G °त्रिग्रांधते नानुवषट्कृथाः. २. °होमानुमन्त्रयते भा[1] A. ३. परिभाषिसैरनु° मूको. ४. विशेषणत्वात् मूको. ५. होमं भा[1,2]. ६. गार्हपत्यं मूको. ७. तु. K (JRAS १९१०, ९३८); वैतु. C. °भ्रम् इति शोध इति ? ८. तु. गोब्रा २, ३, ८; काश्रौ ९, १२,३१; आपश्रौ १२,२७,९. ९. प्रायेन भा[1] A. १०. तु. काश्रौ ९, १२,३५-३७; आपश्रौ १२, २८,१-२.

नाराशंसान् सोमान् प्रस्थितभक्षशेषान् तूष्णीं प्रतिगृह्य नराशंसपीतस्य इत्यादिना प्रत्याम्नायकेन भक्षयन्ति ॥७॥

ऊर्वैः[1] इति माध्यन्दिने ॥क॥

माध्यन्दिने सवने ऊर्वैरिति विकारो भवति ॥क॥

काव्यैः इति तृतीयसवने ॥ख॥ ॥८॥

अस्मिन्नेव मन्त्रे काव्यैरिति विकारः ॥ख॥८॥

मनो न्वा ह्वामहि[2] (कौसू ८९, १) इति मन उपाह्वयन्ते ॥९॥

[3]मनो न्वा ह्वामहि[3] इति कल्पजसूक्तेनोपाह्वयन्ते ॥९॥

पञ्चकृत्वो नाराशंसान् भक्षयन्ति ॥१०॥

पञ्च [4]वारान् सोमचमसान्[4] भक्षयन्ति[5] ॥१०॥

तत्र श्लोकः—

पञ्चैव कृत्वश्चमसान् नाराशंसेषु भक्षयेत् ।
होतुः पूर्वेषु शस्त्रेषु यानि प्राग् आग्निमारुतात् इति ॥११॥[6]

तत्र तस्मिन् पञ्चसंख्याके भक्षणे ब्राह्मणपठितः श्लोकोऽपि भवति ॥११॥

आज्यशस्त्राद् ऐन्द्राग्नम् ॥१२॥[7]

होतुराज्यशस्त्राद् अनन्तरं होतुरेव याज्याहोमं पारिभाषिकेणाऽनुमन्त्रयते[8] ॥१२॥

होत्रे प्रउगस्तोत्राय प्रसौति प्रेतिरसि धर्मणे त्वा धर्मं जिन्व ॥क॥

होत्रे[9] प्रउगस्तोत्रायाऽऽमन्त्रितः प्रसवं ददाति । [10]स्तोमभागानाम् अन्ते त्वेति[10] सर्वत्र । सवितृप्रसूत[11] इति स्तोमभागशेषसंबन्धार्थम् । शेषं बहिष्पवमानं चोक्तम् ॥क॥

---

१. उर्वैः वा पू. २. हुवा° G. ३-३. नास्ति भा[1] A. ४-४. वा (वा भा[2]) न्यावसोमं च मूको. ५. °न्ति इत्यादि तत्रैव मूको. ६. तु. लाश्रौ २,५, १३; आश्रौ ५, ६,२७-२८; आपश्रौ १८, =५, २६. ७. तु. काश्रौ ९, १३, ३३; आपश्रौ १२,२७,१९. ८. परिभाषिके° मूको. ९. हो(त्रः भा[2])त्रस्तं मूको. १०-१०. °भागानामित्वेति भा[1] A. ११. तु. वैता १७,४ °तृप्रसूता,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मैत्रावरुणाय अन्वितिरसि[१] दिवे त्वा दिवं जिन्व ॥ख॥

मैत्रावरुणस्तोत्रार्थं प्रसौति[२] ॥ख॥

ब्राह्मणाच्छंसिने संधिरस्यन्तरिक्षाय त्वाऽन्तरिक्षं जिन्व ॥ग॥

ब्राह्मणाच्छंसिस्तोत्रार्थम्[३] आमन्त्रितः प्रसौति ॥ग॥

अच्छावाकाय प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व इति ॥घ॥ ॥१३॥[४]

अच्छावाकस्तोत्रार्थम् आमन्त्रितः प्रसौति ॥घ॥१३॥

इदानीं शस्त्रयाज्याहोमानुमन्त्रणं[५] विदधाति —

[६]प्रउगशस्त्राद् वैश्वदेवम् । मैत्रावरुणस्य मैत्रावरुणम् । ब्राह्मणाच्छंसिन ऐन्द्रम् । अच्छावाकस्यैन्द्राग्नम्[६] ॥१४॥

[७]होतुः प्रउगशस्त्राद् '[८]अनन्तरं होतुरेव[८] याज्याहोमे पारिभाषिकेण[९] यद्विद्वांसः (अ ६, ११५,१) इत्यादिना होमम् अनुमन्त्रयते । मैत्रावरुणस्य प्रउगशस्त्राद् अनन्तरं मैत्रावरुणस्य याज्याहोमे मैत्रावरुणं[१०] मित्रावरुणावृष्ट्या इति ? परिभाषितम् अनुमन्त्रणं भवति । ब्राह्मणाच्छंसिनः प्रउगशस्त्राद् अनन्तरं तस्यैव याज्याहोमे ऐन्द्रम् इन्द्रेमम् (अ ६,५,२) इति परिभाषितम् अनुमन्त्रणं भवति । [११]अच्छावाकस्य प्रउगशस्त्राद् अनन्तरं तस्यैव याज्याहोमे ऐन्द्राग्नम् आवनिम् इति परिभाषितम् अनुमन्त्रणं भवति[११] ॥१४॥

ब्राह्मणाच्छंस्युत्तमात् प्रतीहारात् त्रिर्हिंकृत्य शंसावोम् इत्यध्वर्युम् आह्वयते[१२] ॥१५॥

ब्राह्मणाच्छंसिग्रहणं शस्त्रसंनिधिनियमार्थम्[१३] । असत्येतस्मिन्[१४] ब्रह्मणः[१५] स्यात् ब्रह्मा कर्मणि (वैता १, १) इति परिभाषणात् । तेन सर्वत्र ब्राह्मणाच्छंसिन एव संभवति साम्नस्तृतीया भक्तिः । तेन हि प्रतिहर्ता साम प्रतिहरति । तस्मात् स्तोत्रोत्तमात् प्रतीहाराद् अनन्तरम् । प्राग्विधिःकृतः[१] ? । त्रिर्हिङ्कृत्य त्रिवारं हुंशब्दम् उच्चार्य । हुंशब्दो[२] हिंकरोतियोगे हिङ्कारम् आपद्यत इति भाष्यकारः पूर्वस्मिन् पार्षदे दर्शनात् । त्रिर्हिङ्कृत्य [३]शंसावोम् इत्यध्वर्युमाह्वयते आहावेनाऽऽह्वयते[३] शंसनार्थम् ॥१५॥

---

१. अनिति° वा पू गोब्रा भा[२] A. २. प्रसूतिः भा[१] A. ३. °च्छसीस्तो° मूको. ४. तु. तै ३, ५, २, २; काठ १७,७; गोब्रा २, २, १३ [तु. BC.]; काश्रौ ११,१, १९; आपश्रौ १४, १०, ३. ५. समुद्याज्या° मूको. ६-६. नास्ति भा[१] [२]A. ७. होतुः प्रभृति ब्राह्मणाच्छंस्युत्तमात् (वैता २०, १५) इत्यन्तं नास्ति भा[२]. ८-८. 'नन्तरं मैत्रावरुणस्य हो° A. ९. मित्राव° मूको. १०. परिभाषितं मूको. ११-११. नास्ति A. १२. °आह्वयन्ते वा. १३. शस्त्रसंजिघनि° मूको. १४. असध्यंत° मूको. १५. ब्राह्मणाच्छं भा[१] A.

अहिङ्कारम्[४] अनुरूपायोक्थमुखाय परिधानीयायै ॥क॥[५]

हिङ्कारवर्जम् अनुरूपाद्यर्थं शंसावोम् इत्यध्वर्युम् आह्वयते ॥क॥

प्रगाथाय च माध्यन्दिने ॥ख॥ ॥१६॥

माध्यन्दिने सवने प्रगाथार्थम् आह्वयते । चकाराद् अनुरूपाद्यर्थम् ॥१६॥

योनय[६] एके ॥१७॥

योन्यर्थम् एक आचार्या आह्वानं मन्यन्ते । योनिशंसनं च विषुवति सौर्यपृष्ठे (वैता ३३,५) माध्यन्दिने प्रक्षिप्याऽऽम्नातम्[७] अनुरूपात् 'तं वो दस्ममृतीषहम् (अ २०, ९, १), अभि प्र वः सुराधसम् (अ २०, ५१, १)' इति नौधसश्यैतयोनी कामम् (वैता ३३,७) इति ॥१७॥

अध्वर्यो शंसावोम् इति स्तोत्रियाय ॥क॥

माध्यन्दिन एव स्तोत्रियार्थम् अध्वर्यो शंसावोम्[८] इत्यादिविकृतेनाऽऽहावेनाऽऽह्वयते ॥क॥

अध्वर्यो शं शंसावोम् इति तृतीयसवने ॥ख॥[९] ॥१८॥

तृतीयसवने स्तोत्रियार्थम् । अध्वर्यो शं[८] शंसावोम् इत्यादि विकृतेनैवाऽऽह्वयते । विकारविधानाच्छेषं प्रातःसवने ॥१८॥

इदानीं शस्त्राङ्गत्वाद् अध्वर्योः प्रतिगरविधिः —

आहावेषु शंसावो दैव इत्यध्वर्युः प्रतिगृणाति ॥१९॥

ब्राह्मणाच्छंसिन आहावेषु स्तोत्रियाद्यर्थेषु सर्वेषु[१०] अध्वर्युः प्रतिगृणाति ॥१९॥

---

१. विधिकृतः मूको. २. हिं भा[१] A. ३-३. शंसावोमित्याह्वयेना° भा[१] A. ४. हिङ्कारम् G. ५. तु. गोब्रा २, ३, १६. ६. अयोनये G. ७. प्रक्षिप्यास्नानं मूको. ८. नास्ति मूको. ९. तु. गोब्रा २,४,४. १०. नास्ति भा[१] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'ओषा मोदैव[1] इत्यवसाने ॥क॥

अर्धर्चशस्येऽर्धर्चावसाने पच्छःशस्ये पादावसाने ओषा मोदैव इति प्रतिगरो भवति प्रतिगरस् आहूयते ॥क॥

ओम्[2] ओथा मोदैव इति प्रणवे ॥ख॥

अर्धर्चशस्ये ऋगन्ते प्रणवो विहितः पच्छःशस्येऽर्धर्चान्ते[3]। तस्मिन् प्रणव एष प्रतिगरो भवति ॥ख॥[4]

ओम् इति शस्त्रान्ते ॥ग॥ ॥२०॥[5]

शस्त्रसमाप्तौ ओम् इति प्रतिगरः ॥ग॥२०॥

उक्थप्रतिगरमाह[6] —

उक्थसंपत्सु ओम् उक्थशा उक्थशा[7] यज उक्थशाः इति ॥क॥[8]

शस्त्वा उक्थं[9] वाचि (वैता २१,५) इत्यादिषु [10]ओम् उक्थशाः इति प्रातःसवने प्रतिगरः। उक्थशा यज[10] इति माध्यन्दिने, उक्थशाः इति तृतीयसवने ॥क॥

साम्ना शस्त्रम् उपसंतनोति ॥ख॥

अध्वर्य्वाह्वानाद् अनन्तरं साम्ना संततं शस्त्रं शंसति ॥ख॥

शस्त्रस्य शंसने विधिमाह —

अर्द्धर्चशो मन्द्रया वाचा ॥ग॥

तत् शस्त्रम् अर्द्धर्चशः अर्द्धर्चम् अर्द्धर्चं शंसति मन्द्रया प्रथमस्वरया[11] वाचा[12] ॥ग॥

बलीयस्या माध्यन्दिने ॥घ॥

प्रसङ्गादत्र गुणविधिः। माध्यन्दिने सवने बलीयस्या वाचा शंसति।

१-१. ओमोथा° वा. २. नास्ति पू भा[1]. ३. °र्द्धर्चतो मूको. ४. तु. वैता २१, ४. ५. तु. काश्रौ ९, १३, २९-३१; आपश्रौ १२, २७, १२-१४. ६. °माह ओथामोदैव मूको, ७. नास्ति G. ८. तु. गोब्रा २, ३, १०; काश्रौ ९, १३, ३३; आपश्रौ १२, २७, १९. ९. उच्छस्तच्छ मूको. १०-१०. नास्ति मूको. ११. तु. वैता १७,४; प्रथमया भा[1] A. १२. प्रातः-

मन्द्राऽपेक्षया[1] बलीयस्या[2] ॥घ॥

बलिष्ठतमया तृतीयसवने ॥ङ॥

बलिष्ठतमया वाचा तृतीयसवने[3] शंस्तव्यम्। बलिष्ठतमयोत्तमस्वरया ॥ङ॥

उत्तरिण्योत्तारिण्योत्सहेद् आ समापनात् ॥च॥ ॥२१॥[4]

शस्त्रशंसने[5] उत्तमयोत्तमया वाचा उत्सहेद् उत्साहं कुर्यात्। नादवृद्धिः सवनस्वरतोऽधिका कर्तव्या, आ शस्त्रसमाप्तेः ॥च॥२१॥

इति वैतानकल्पे तृतीयेऽध्याये दशमी कण्डिका ॥

[२१]

उत्तमात् प्रतीहारात् त्रिर्हिङ्कृत्याऽध्वर्युम् आह्वयते (वैता २०, १५) साम्ना शस्त्रम् उपसंतनोति (वैता २०, २१) इति 'यदुक्तं तदिदानीं[6] स्तोत्रियादि तन्नामोद्देशेन[7] विधीयते —

आ याहि सुषमा हि ते (अ २०,३), आ नो याहि सुतावतः (अ २०,४), इति स्तोत्रियानुरूपौ। अयमु त्वा विचर्षणे (अ २०,५) इत्युक्थमुखम्। उद्घेदभि श्रुतामघम् (अ २०,७, १-२) इति पर्यासः। उत्तमा (अ २०, ७, ३) परिधानीया ॥१-२॥[8]

आ याहि सुषमा हि ते इत्यादि परिधानीयान्तं सूत्रम्। 'स्तोत्रमस्मिन् त्र्यृचे' 'गायन्ति स्तोतार [10]इति स्तोत्रियः। अस्य छन्दोदैवतप्रतिरूपोऽनुरूपः। मुखमिवोच्यते इत्युक्थमुखम्। अस्योपर्यस्यत इति पर्यासः[10]। अस्योत्तमा परिधानीया। परिधीयते समाप्यते शस्त्रम् अनयेति परिधानीया। ब्राह्मणसंज्ञाश्चैताः[11] ॥१-२॥

त्रिः प्रथमां त्रिरुत्तमाम् अन्वाह ॥३॥[12]

---

१. °न्द्रयाऽ° मूको. २. बलीयस्त्वम् भा[1] A. ३. नास्ति भा[1] A. ४. तु. ऐब्रा ३, ४४. ५. शस्त्रात्प्रति (प्रद्वि भा[2]) द्वि च मूको. ६-६. यद् था (उ भा[1]) क्तं नर्दिहानीं भा[1] A. ७. ति (वि भा[2]) द्ग्रामोदेशो न मूको. ८. तु. गोब्रा २,३,१४-१६; आश्रौ ५, १०, २८; शांश्रौ ७,१२,१-४. ९. प्रद मूको. १०-१०. नास्ति भा[1] A. ११. संज्ञास्चेति मूको. १२. तु. गोब्रा २,३,११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शस्त्रस्य प्रथमाम् ऋचम् उत्तमां च त्रिरन्वाह त्रिरावृत्तां शंसति ॥ ३ ॥

अर्द्धर्चशस्य ऋगन्तं प्रणवेनोपसंतनोति स्वरादिम् अपनीय ॥क॥

अर्द्धर्चशस्ये [१]शस्त्रे ऋच अर्द्धान्ते[१]ऽवसायाऽपनीय ऋगन्तं शुद्धेन मकारान्तेन वा[२] प्रणवेनोपसंतनोति उपसंदधाति। अन्त्यम् स्वरादिव्यञ्जनस्य अपनीय अपनयं लोपं कृत्वा ··· स्वरोऽनुस्वारान्तेऽनुस्वारतामेति[३] शस्त्रान्ते मकारान्तेनैवेत्यवधारणाद्[४] अन्यत्र विकल्पः ॥ क ॥

पच्छःशस्येऽर्द्धर्चान्तम् ॥ख॥

पादशस्ये शस्त्रे पादेऽवसाय अर्द्धर्चान्तं प्रणवेनोपसंतनोति ॥ ख ॥

शस्त्रान्तं मकारान्तेनैव ॥ग॥ ॥४॥[५]

शस्त्रस्यान्तं मकारान्तेनैव प्रणवेनोपसंतनोति। एवशब्दोऽवधारणार्थः[६] ॥ग॥

[७]शस्त्वा उक्थं[७] वाचि इत्याह। उक्थं वाचीन्द्राय इति माध्यन्दिने। उक्थं वाचीन्द्राय देवेभ्यः इति तृतीयसवने ॥५॥[८]

शस्त्वा उक्थं वाचि इत्यादि तृतीयसवन इत्यन्तं सूत्रम्। प्रातःसवनमाध्यन्दिनतृतीयसवनादिनियमाद्[९] उक्थसंपत्सु[१०] तत्र तत्र शस्त्रसंस्था[११] सवनक्रमेण यथासंख्यम्, उक्थं वाचीत्यादि[१२] ब्राह्मणाच्छंसी ब्रूते। प्रथमा प्रातःसवने माध्यन्दिनादिनियमात्[१३] ॥ ५ ॥

उक्थसंपदः ॥क॥

एता उक्थं वाचीत्याद्याः [१४]उक्थसंपद उक्ता[१४] भवन्ति ॥ क ॥

परिधानीयोत्तरा याज्या ॥ख॥ ॥६॥[१५]

स न इन्द्रः शिवः सखा (अ २०, ७,३) इति परिधानीया। अस्या उत्तरा इन्द्र क्रतुविदम् (अ २०,७,४) इति याज्या ब्राह्मणाच्छंसिनो भवति ॥ ख ॥ ६ ॥

१-१. शस्त्रश्च अर्धाते मूको. २. नास्ति भा[१] A. ३. °नुस्वरमेवाति भा[१] A; °स्वरं··· भा[२]. ४. °वधायव न्य० भा[१] A. ५. तु. गोब्रा २, ३,१०. ६. °शब्दोच्चार° मूको. ७-७. तु. C.; शस्त्रोक्थं मूको G. ८. वैता २०, २१; गोब्रा २, ३, १०; आश्रौ ५,९,२६; शांश्रौ ७, ९, ६. ९. °सवनेषु नानि नि° भा[२]; °सवनेष्यदिनानि नि° भा[१] A. १०. उक्थसंषु भा[१] A. ११. शास्त्रं संस्था मूको. १२. °चीत्याज्यः मूको. १३. °दिनानि नि° मूको. १४-१४. °सम्पत्यजुका° भा[१]; °सम्पत्स उका A. १५. तु. वैता २०, २१.

अच्छावाकभक्षाद् अग्निः प्रातःसवने (अ ६,४७, १), श्येनोऽसि (अ ६, ४८, १), यथा सोमः प्रातःसवने (अ ९, १, ११) इति यथासवनम् आज्यं जुहोति ॥७॥

अच्छावाकशस्त्रयाज्यानन्तरं भक्षः। भक्षाद् अनन्तरम् अग्निः प्रातःसवने इत्यादीनां त्रयाणां तृचानां सवनदेवताच्छन्दोलिङ्गैर्मन्त्रैः यथासवनम् आज्यं जुहोति। श्येनोऽसि इति तृचस्य तृतीयया माध्यन्दिने द्वितीयया तृतीयसवने छन्दोदेवतासवनयोगात्। एके न श्येनोऽसि इति ब्राह्मणोक्तं मन्यन्ते सवनपाठक्रमनिरोधात् ॥ ७ ॥

संस्थितहोमान् ॥८॥

सदः पूर्वया द्वारा निष्क्रम्याऽऽग्नीध्रीयं दक्षिणेनाऽऽहवनीयम्[१] अपरेणातिव्रज्य दक्षिणत उपविश्य संस्थितहोमाञ्जुहोति। पुरस्ताद्धोमेऽप्यस्यैव संचरस्याऽऽम्नानाद् इति भगवता वाचस्पतिना भाष्यकारेण[२] व्याख्यातम् ॥ ८ ॥

संस्थिते संस्थिते सवने वाचयति मयि भर्गो मयि महो मयि यशो मयि सर्वम् इति ॥९॥[३]

यजमानं वाचयति। वीप्सावचनं [४]सर्वत्र वाचनार्थम्[४] ॥ ९ ॥

प्रेषिता माध्यन्दिनायौदुम्बरीम् अभ्यपरया द्वारा निष्क्रम्याऽऽग्नीध्रीयात्[५] सर्पन्ति ॥क॥

अध्वर्युणा सर्पत इति प्रैषेण प्रेषिता माध्यन्दिनसवनार्थम् औदुम्बरीम् अभिमुखाः सन्तः सदसोऽपरया द्वारा निष्क्रामन्ति। निष्क्रम्याऽऽग्नीध्रीयसमीपं गत्वा तस्माद् आग्नीध्रीयात् सदः [६]प्रसर्पन्ति। एतेन† सर्पणविधिना[६] ॥क॥

यजमानः पूर्वया ॥ख॥ ॥१०॥[७]

यजमानश्चैष पूर्वया द्वारा निष्क्रामति ॥१०॥

---

१. दक्षिणा भा[१]A. २. नास्ति भा[१]A. ३. तु. गोब्रा २, ५, १५; माश १२,३,४,६; काश्रौ १३,१,१२. ४-४. °त्र नार्थं मूको. ५. =°म्य, आऽऽग्नी° इति (तु. C) पक्षान्तरे C, आऽऽग्नीध्रीयम् इति प्रस्तावुकः। ६-६. प्रसर्पेयुः पुनः सर्प० मूको., †एकेन भा[१]. ७. तु. वैता २३, १०; २४, १७; काश्रौ ९,१४,१९-२०; आपश्रौ १२, २९,१०-१५.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरस्ताद्धोमान् ॥११॥

संस्थितहोमसंचरेण गत्वा पुरस्ताद्धोमाञ्जुहोति ॥११॥

उक्तस् अभिषवादि ॥१२॥[1]

यदुक्तं तदिह भवति : [अनर्थं† लुप्त…मनयोदितं च मथ‡][2] इन्द्र जुषस्व (अ २, ५, १) इत्यादिनोपांश्वन्तर्यामग्रहहोमानुमन्त्रणम्। अर्थलोपात् न च चात्वालदेशोपवेशनसदःप्रसर्पणे प्रवादात्। एवम् अन्यदपि ॥१२॥

पवमानाय सदः प्रसर्पन्ति ॥१३॥[3]

माध्यन्दिने पवमानार्थम् अध्वर्य्वादयः समन्वारब्धा उत्तरेण हविर्धानं गत्वा सदः प्रसर्पन्ति प्रविशन्ति ॥१३॥

आमन्त्रितः प्रसौति विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व इति ॥१४॥[4]

पवमानस्तोत्रार्थं प्रस्तोत्राऽऽमन्त्रितः[5] प्रसौति स्तोमभागेन स्तोमभागविशेषविधानार्थम् ॥१४॥

विहरणे धिष्ण्यवान् बहिश्चेद् धिष्ण्यम् अभ्येत्य परि त्वाग्ने (अ ७, ७४ [७१],१) इति जपति ॥१५॥

धिष्ण्यानां विहरणे क्रियमाणे धिष्ण्यवान् बहिः 'सदस उपविष्टो यदि स्यात्'[6] धिष्ण्यं स्वम् आगत्याऽभिमुखो मन्त्रं जपति ॥१५॥

ब्रह्मा च ॥१६॥

ब्रह्मा च विहरणे सदसो यदि बहिः स्यात् वर्देताम् एवचं जपति ॥१६॥

दीक्षितो बहिर्वेद्यभ्याश्रावणेऽस्तमयेऽभ्युदये वा अग्नय उपाह्वयध्वम् इति ॥१७॥[7]

दीक्षितो यजमानो यद्याश्रावणे क्रियमाणे बहिर्वेदि स्याद् आदित्यास्तमयकालेऽभ्युदयकाले वा। ततो वेदिमध्य एतद् यजुर्जपति ॥१७॥

---

१. तु. वैता १६, ११-१४. २. †अमर्थ भा[1] A; ‡चम भा[2]. ३. तु. काश्रौ ९,१, १७; आपश्रौ १३,२, ७. ४. तु. वैता १७,३-४; गोब्रा २,२, १३. ५. °स्तोताम° मूको.। ब्रह्मा इति शेषः (तु. आपश्रौ १४, ८, १-२), ६-६. सदस्योपविस्पात् मूको. ७. तु. आश्रौ १२,८,२०.

श्रातं मन्ये (अ ७, ७६ [७२], १ [३]) इति दधिघर्महोमम् ॥१८॥[1]

दधिघर्महोमम् अनुमन्त्रयते ॥१८॥

घर्मवद्भक्षो रसप्राशन्या ॥१९॥

घर्मवत् घर्मेण तुल्यः। मन्त्रस्तु[2] प्रत्याम्नायकः ॥१९॥

पशुपुरोडाशस्य ॥२०॥

पशुदेवताकस्य पुरोडाशस्य होमं पारिभाषिकेण[3] अनुमन्त्रयते ॥२०॥

एवा पाहि (अ २०, ८, १-३) इति प्रस्थितयाज्याः[4] ॥२१॥[5]

यथाप्रैषं ब्राह्मणाच्छंसिपोत्राग्नीध्राणाम् एताः प्रस्थितयाज्या भवन्ति ॥२१॥

प्रस्थितहोमान् ऐन्द्रान् ॥२२॥

ऐन्द्रान् इन्द्रदेवतान्[6] प्रातःसवने। अत्र विधानम् एकदेवतात्वात्। तेनेन्द्रदेवत्येनाऽनुमन्त्रणं भवति ॥२२॥

गार्हपत्ये दाक्षिणहोमौ उदु त्यम् (अ १३, २, १६), चित्रं देवानाम् (अ १३, २, ३५) इति ॥२३॥[7]

गार्हपत्ये शालाद्वार्ये[8] अध्वर्युणा हूयमानौ दक्षिणानिमित्तौ होमावनुमन्त्रयते। द्वितीये द्वाभ्यां लिङ्गानुवृत्तित्वाद् आग्रयणपरिभाषया ॥२३॥

हिरण्यहस्तो यजमानो बहिर्वेदि दक्षिणा आयतीः आ गावः (अ ४, २१,१) इति प्रत्युत्तिष्ठति ॥२४॥

दक्षिणा[9] गावः। ता बहिर्वेद्यागच्छन्तीः हिरण्यहस्तो[10] यजमानः प्रत्युत्तिष्ठति ॥२४॥

हिरण्यम् आत्रेयाय ददाति ॥क॥

---

१. तु. काश्रौ ९, १०, २१-२३; आपश्रौ १३, ४,२. २. = अ ५, २, ३ (तु. कौसू २१, २१). ३. परिभा° मूको. ४. नास्ति पू; G °तयाज्या; C °ज्यायाः. ५. तु. गोब्रा २,२, २१. ६. °तान् वा मूको. ७. तु. काश्रौ १०, २,४-५; आपश्रौ १३,५,७. ८. °र्यें च भा[2]. ९. दक्षिणे मूको. १०. नास्ति मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गवां प्रत्युत्थाने यद् धिरण्यं हस्ते भवति तद् आत्रेयाय अत्रिसगोत्राय[1] ददाति ॥क॥

आग्नीध्रायोपबर्हणम् ॥ख॥ ॥२५॥

कौशेयाच्छादनं तद् आग्नीध्राय ददाति ॥ख॥२५॥

अग्रेण गार्हपत्यं जघनेन सदोऽन्तराऽऽग्नीध्रीयं च सदश्च चात्वालं चोदीचीर्दक्षिणा उत्सृज्यमानाः सं वः सृजतु (अ ३, १४,२-३) इति द्वाभ्याम् अनुमन्त्रयते ॥२६॥[2]

[शालामुखीयं सदश्चान्तरेण] ? चात्वालं चोत्करं च चकारस्योत्करार्थत्वात् । अनेन मार्गेण '[3]उदीचीर्दक्षिणा उत्सृज्यमानाः सं वः सृजतु' इति द्वाभ्याम् अनुमन्त्रयते । दक्षिणाग्रहणं[4] मन्थादिपरिग्रहणार्थम् ॥२६॥

इति वैतानकल्पे तृतीयेऽध्याय एकादशी कण्डिका ॥

[२२]

यस्यां पूर्वे भूतकृतः (अ १२, १, ३९) इति भागलिः ॥क॥

भागलिराचार्योऽनुमन्त्रणम् आह ॥ क॥

इहेदसाथ (अ ३, ८, ४) इति कौशिकः ॥ख॥ ॥१॥

कौशिक आचार्योऽनया मन्यते स्म ॥ख॥१॥

अन्ततः प्रतिहर्त्रे देयम् ॥२॥[5]

सदःप्रसर्पकेभ्योऽपि दत्त्वाऽन्ते प्रतिहर्त्रे दक्षिणादानं कर्तव्यम् ॥२॥

मरुत्वतीयहोमम् इन्द्रो मा मरुत्वान् (अ १८, ३,२५) इति ॥३॥[6]

मरुत्वतीयग्रहस्य याज्याहोमम् अनुमन्त्रयते ॥३॥

शस्त्रयाज्यायाः ॥क॥

१. आत्रेयसगो० भा[1]. २. तु. गोब्रा २, ३, १७; काश्रौ १०, २, ६-९; आपश्रौ १३,६,८; ... ३-३. °ची मृज्यं तु. मूको. ४. दक्षिणादग्र° भा[1] A; °णादिग्र° भा[1]. ५. तु. गोब्रा २, ३, १९; काश्रौ १०, २, ३६. ६. तु. काश्रौ १०, ३, १-५; आपश्रौ १३,८,२.

मरुत्वतीयशस्त्रयाज्याहोमम् 'इन्द्रो मा मरुत्वान् इति[1] अनुमन्त्रयते ॥क॥

होत्रादिभ्यः प्रसौति प्रवाऽस्यह्ने[2] त्वा अहर्जिन्व । अनुवाऽसि रात्र्यै त्वा रात्रिं जिन्व । उशिगसि वसुभ्यस्त्वा वसून् जिन्व । प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व (तैसं ४, ४, १,२) इति ॥ख॥ ॥४॥[3]

होतृमैत्रावरुणब्राह्मणाच्छंस्यच्छावाकस्तोत्रार्थं प्रस्तोत्राऽऽमन्त्रितो यथाक्रमं वेन स्तोमभागेन प्रसौति ॥ख॥४॥

निष्केवल्यस्य माहेन्द्रम् ॥५॥[4]

एष सस्तस्य (?) होतुरेव याज्याहोमम् अनुमन्त्रयते ॥५॥

प्रशास्त्रादीनाम् ऐन्द्रान्[5] ॥६॥

प्रशास्तृब्राह्मणाच्छंस्यच्छावाकशस्त्रयाज्याहोमानैन्द्रान्[6] पारिभाषिकैरनुमन्त्रयते[7] ॥६॥

तं वो दस्ममृतीषहम् (अ २०, ९, १), तत् त्वा यामि सुवीर्यम् (अ २०,९, ३) इति स्तोत्रियानुरूपौ ॥७॥[8]

उत्तमात् प्रतीहारात् (वैता २०,१५) इत्यादयः शस्त्रसाधारण्येन पुनर्माचित्राः(?)। साधारण्यं च माध्यन्दिनतृतीयसवननिर्देशेन[9] धर्माऽविशेषात् त्रिर्हिङ्कृत्याध्वर्यो शंसावोम् इत्यध्वर्युम् आहूय साम्ना शस्त्रम् उपसंतनोति इत्यादिकं[10] सविशेषं भवति । तदिदानीं शस्त्रम् उच्यते "[11]विभागशो विशिष्टधर्मसंयुक्तम्[11]" । तत्र तं वो दस्मम् इति द्वयृचः स्तोत्रियः । उत्तरश्चानुरूपो भवति ॥७॥

द्वे तिस्रः करोति पुनरादायम् ॥क॥

१-१. नास्ति भा[1] A. २. प्रावोऽस्य० भा[1-2] A; प्रवोऽस्य° वा पू. ३. तु. गोब्रा २,२,१३; वैता १७,४. ४. तु. काश्रौ १०, ३, ११-१२; आपश्रौ १३, ८, ४-७. ५. °ऐन्द्रान C. ६. °होमर्मैन्द्रा ... A. होमनैन्द्रा भा[2]. ७. परिभाषिके र० मूको. ... काश्रौ ७, २३, ३. ९. °संवने दे... १०. तु. वैता २०,१५-२०; ... ११. °गसोऽवसिष्ट° भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]कथं तद्[1] इत्याह—

[2]प्रथमां शस्त्वा तस्या उत्तमं पादम् अभ्यस्याऽवसायोत्तरस्या अर्द्धर्चेन द्वितीयां शस्त्वा तस्या उत्तमं पादम् अभ्यस्योत्तरेणाऽर्धर्चेन तृतीयां शंसति[2] ॥ख॥ ॥८॥[3]

सूक्तप्रथमाम् ऋचम् अर्द्धर्चशः [मा प्रतीहारा वृनोतु नोग्रासस्य] ? । तस्याः प्रथमाया अन्त्यं पादम् इन्द्रं गीर्भिर्नवामहे (अ २०, ९, १ d) इत्यभ्यस्या-ऽऽवृत्त्या द्विः प्रयुज्य अभ्यासस्य [कृतार्थत्वानं त्रिष्वयोगः एतभ्यसामप्रगाय सामप्रगाथः]? एवम् अभ्यस्तपादसिद्धधर्मम् अर्द्धर्चम् अवसाय विरम्योत्तरस्या ऋचः प्रथमेनाऽर्द्धर्चेन द्वितीयां शंसतीति । शस्त्वा तस्या एव ऋचः पुनरादानप्रग्रथितायाः अन्त्यपादं गिरिं न पुरु भोजसम् (अ २०, ९, २b) इति पूर्ववद् उत्तमं पादम् अभ्यस्याऽवसाय उत्तरेणार्द्धर्चेन[4] तृतीयां शंसत्युक्तेन[5] शंसनविधिना । एवम् अनुरूपे द्वे तिस्रः करोति पुनरादायम् इति ॥८॥

एवं बार्हतानां स्तोत्रियानुरूपाणां प्रग्रथनम्[6] ॥९॥

एवम् अनेन[7] प्रकारेण बृहतीसंपत्त्यर्थं प्रग्रथनं कर्तव्यं प्रदेशेषु ॥९॥

मध्यमोच्चैस्तरया वाचा शंस्तव्यौ ॥१०॥[8]

मध्यमस्वरस्[9] किञ्चिदुच्चैस्तरया वाचा शंस्तव्यावेतौ स्तोत्रियानुरूपौ ॥१०॥

उदु त्ये मधुमत्तमाः (अ २०, १०) इति सामप्रगाथः स्वरवत्या ॥११॥[10]

[11]अनेन प्रग्रथनं भवति[11] । [12]ब्राह्मणसंज्ञया तृचोऽयम्, अतो द्वयृचो[12] भवति । स्वरवत्या अनुरूपस्वरवत्या[13] वाचा शंसितव्यः । एष बार्द्धर्चशस्यः उपरिष्टाद् पृष्ठ्ये[14] विधानाद् ॥११॥

१-१. कथं चित्त° मूको. २-२. नास्ति भा[१] A. ३. तु. गोब्रा २, ३, २०; कौब्रा १५,४; आश्रौ ५, १५, ५-६; शांश्रौ ७, २५, ६. ४. यदुत्तरे° भा[१] A. ५. शस्त्वा मासत्यु° मूको. ६. °न्यनं भा[१] A. ७. अन्येन भा[१] A. ८. तु. गोब्रा २, ३, २२. ९. मध्यस्य स्वर° भा[१] A. १०. तु. गोब्रा २, ३,२२; ४,२; आश्रौ ५,१५,६; शांश्रौ ७, २३, ५. ११-११. अनेन (ना भा[१]) प्रथमं न म° मूको. १२-१२. °सया वयं अतो यचो मूको. १३. अनुरूपन्सन्द (दे भा[१]) वत्या मूको. १४. पष्ठ्ये मूको.

इन्द्रः पूर्भिदाऽतिरत् (अ २०,११) इत्युक्थमुखं पच्छः प्रतिवीततमया ॥१२॥[1]

उक्थमुखम् एकादशर्चं सूक्तं पादं पादं पच्छः प्रतिवीततमया [2]प्रतिविविक्ततमया[2] वाचा शंसितव्यम् उत्तरिण्योत्तरण्योत्सहेत (वैता २०,२१) इति सर्वं शस्त्रार्थम् । अत्रोक्थस्तोत्रियादिषु[3] विशेषविधिः ॥१२॥

उदु ब्रह्माण्यैरत श्रवस्य (अ २०, १२) इति पर्यासः ॥१३॥[4]

षडर्चः पर्यासः पच्छः शस्यः । उत्तरिण्योत्तरिण्या वाचा शंसितव्यः ॥१३॥

एवेद् इन्द्रम् (अ २०, १२) इति परिदधाति ॥क॥

अस्यैव पर्यासस्योत्तमया एवेद् इन्द्रम् इति परिदधाति शस्त्रं परिसमापयति ॥क॥

परया यजति ॥ख॥ ॥१४॥[5]

परया ऋचा ऋजीषी वज्री (अ २०,१२,७) इत्येतया यजति ॥ख॥१४॥

अच्छावाकभक्षाद् आदित्यग्रहहोमं यद्देवा देवहेडनम् (अ ६, ११४; ११५) इति द्वाभ्याम् ॥क॥[6]

अच्छावाकभक्षाद् अनन्तरम् आदित्यग्रहहोमम् अनुमन्त्रयते ॥क॥

पवमानसर्पणान्तम् ॥ख॥ ॥१५॥[1]

अच्छावाकभक्षाद् अग्निः प्रातःसवने (वैता २१,७) इत्यादि पवमानसर्पणान्तं पदार्थजातम् अत्र भवति । [7]आदित्यग्रहहोमानुमन्त्रणानन्तरं व्यवधानवचनात्[7] । एवं चाच्छावाकभक्षाद् [8]आदित्यग्रहहोमानुमन्त्रणे अग्निः[8] प्रातःसवने (अ ६,४७,१) इत्यादीनां माध्यन्दिनसवनलिङ्गैः[9] त्रीन् होमान् हुत्वा

१. तु. गोब्रा २, ३, २२; ४, २; शांश्रौ ७, २३, ६. २-२. प्रति प्रति° भा[२] A. ३. उष्णोत्र (त्रि भा[२]) या° मूको. ४. तु. गोब्रा २, ४, ३; आश्रौ ५,१५,६; शांश्रौ ७,२३,८,९. ५. तु. काश्रौ १०,४,११-१३; आपश्रौ १३,९,१; १०,२३; ६. तु. वैता २१, ७-१३. ७-७. नास्ति A. °होममनुमंत्रणो नत (णानत् भा[१]) व्यवधानं वच° भा[१]. ८-८. °मन्त्रणाभिः मूको. ९. माध्यन्दिनलिं° भा[१] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्थितहोमांश्च हुत्वा मयि भर्गः, (वैता २१, ९) इति वाचने[1] कृते तृतीयसवनाय सर्पणविधानात् सर्पणे कृते हुतेषु पुरस्ताद्धोमेषु इन्द्र जुषस्व (अ २,५,१) इत्यादि पवमानाय सदः प्रसर्पन्ति (वैता २१, १३) एवमन्तं पूर्ववद् एव भवति ॥१५॥

आशिरं पूतभृत्यासिच्यमानम् आशीर्णं ऊर्जम् (अ २, २९, ३) इत्यनुमन्त्रयते ॥१६॥[2]

आशिरं दधि, आध्वर्यवसंस्कारसंस्कृतम् [3]तदाग्रयणग्रहणाद् उत्तरं पत्न्या पूतभृत्यासिच्यमानम्[3] अनुमन्त्रयते ॥१६॥

पवमानाय प्रसौति सुदितिरस्यादित्येभ्यस्त्वाऽऽदित्यान्[4] जिन्व इति ॥१७॥[5]

आर्भवपवमानार्थं[6] प्रस्तोत्राऽऽमन्त्रितः प्रसौति स्तोमभागेन ॥१७॥

अवदानहोमम् आग्नेयम् ॥१८॥[7]

पश्ववदानहोमम् आग्नेयं पारिभाषिकेणानुमन्त्रयते[8] ॥१८॥

ऐन्द्राग्नम् उक्थ्ये ॥क॥

उक्थ्यसंस्थक्रतौ[9] पश्ववदानहोमम् ऐन्द्राग्नं पारिभाषिकेणानुमन्त्रयते[8] ॥क॥

ऐन्द्रं षोडशिनि ॥ख॥

षोडशिसंस्थे ऐन्द्रं पारिभाषिकेणानुमन्त्रयते[8] ॥ख॥

सारस्वतम् अतिरात्रे ॥ग॥ ॥१९॥

अतिरात्रे होता सारस्वतं पश्ववदानहोमं पारिभाषिकेणानुमन्त्रयते[8] ॥ग॥१९॥

पश्वेकादशिन्याम् आग्नेयं सौम्यं वैष्णवं सारस्वतं पौष्णं बार्हस्पत्यं वैश्वदेवम् ऐन्द्रम् ऐन्द्राग्नं सावित्रं वारुणम् ॥२०॥

---

१. वचने भा[2]. २. तु. काश्रौ १०,५,३-४; आपश्रौ १३, १०, ८-१०. ३-३. °आग्रहणादुत्कन्त्रक्ष्या पुनर्वसूत्यासि° मूको. ४. सुवीतिर° तैसं ४,४,१,२. ५. तु. गोब्रा २,२,१३. ६. °मानार्थः मूको. ७. तु. काश्रौ १०, ५, ७; आपश्रौ १३,११,३-४; ८. परिभा° मूको. ९. उच्छ सर्वक्रतौ मूको.

पश्वेकादशिन्यामित्यादि वारुणमित्येवमन्तं सूत्रम्। एकादशिनी प्रायेण सत्राहीनेषु। तस्याम् आग्नेयादिपश्ववदानहोमान् पारिभाषिकेणानुमन्त्रयते[1]। सर्वत्राऽनिर्दिष्टदेवताके[2] होमेऽन्यदैवत्यमन्त्राऽप्रतिभाने पारिभाषिको मन्त्रः, देवतानिर्देशस्याऽर्थवत्त्वाय ॥२०॥

सवनीयहोमादि[3] ॥क॥

सवनीयपुरोडाशहोमानुमन्त्रणादि पूर्ववद् यथाप्राप्तम् इह भवति॥क॥

इन्द्रश्च सोमं पिबतं बृहस्पते (अ २०, १३, १-३) इति प्रस्थितयाज्याः ॥ख॥

ब्राह्मणाच्छंसिपोत्राग्नीध्राणाम् एतास्तिस्रो यथाक्रमं प्रस्थितयाज्या भवन्ति ॥ख॥

होमान् ऐन्द्रं मैत्रावरुणम् ऐन्द्राबार्हस्पत्यं मारुतं त्वाष्ट्रम् ऐन्द्रावैष्णवम् आग्नेयम् ॥ग॥ ॥२१॥

होत्रादीनां प्रस्थितयाज्याहोमान् ऐन्द्रादीन् यथाक्रमं पारिभाषिकैरनुमन्त्रयते ॥ग॥२१॥

हविर्धाने यथाचमसं दक्षिणतः स्वेभ्य उपासनेभ्यः[4] त्रींस्त्रीन् पुरोडाशसंवर्त्तान् एतत्ते प्रततामह (अ १८, ४, ७५) इति निपृणन्ति ॥२२॥[5]

हविर्धाने गत्वा यो यथा चमसः तस्य[6] दक्षिणतः स्वेभ्य उपासनेभ्यः पितृभ्यः त्रींस्त्रीन् एकैकस्मै पुरोडाशधानापिण्डान्[7] निपृणन्ति प्रयच्छन्ति ॥२२॥

अत्र पितरः (कौसू ८८, १८) इति जपित्वा एतं भागम् (अ ६,

---

१. परिभा° मूको. २. सर्वत्र निर्दि° मूको. ३. °होमात् वा पू G C. ४. ?C औपा° इति पाठ इतीव (तु. शांश्रौ ७, ७,९; शांब्रा १६, १; बौश्रौ २१, २२:३३-३५). ५. तु. काश्रौ १०, ५,११; आपश्रौ १३,१२,९. ६. तस्मा मूको. ७. पुरोडाशधानानि पि° भा[2]; °शधाना न भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२२, १), एतं सधस्थाः (अ ६, १२३, १), श्येनो नृचक्षाः (अ ७, ४३ [४२],२) इत्यनुमन्त्रयते ॥२३॥

तदा पिण्डान् अपित्वाऽनुमन्त्रयते ॥२३॥

इति वैतानकल्पे तृतीयेऽध्याये द्वादशी[1] कण्डिका ॥

[२३]

आग्नीध्रीये हविरुच्छिष्टं भक्षयन्ति ॥१॥[2]

आग्नीध्रशरणे[3] सवनीयपुरोडाशाऽऽदि[4] हविर्हुताऽवशिष्टं भक्षयन्ति ॥१॥

सावित्रग्रहहोमम् ॥२॥[5]

पारिभाषिकेणाऽनुमन्त्रयते[6] ॥२॥

वैश्वदेवयाज्यायाः ॥क॥

होमं पारिभाषिकेणाऽनुमन्त्रयते[7] ॥क॥

धिष्ण्यहोमात् ऐभिरग्ने (अ २०, १३, ४) इत्युपांशु पात्नीवतस्याऽऽग्नीध्रो यजति ॥ख॥ ॥३॥[8]

[8]धिष्ण्यहोमाद् अनन्तरं[8] पात्नीवतस्य ग्रहस्योपांश्वाग्नीध्रो यजति ॥ख॥३॥

तस्य होमम् ॥४॥[9]

तस्य पात्नीवतस्य होमं पारिभाषिकेणाऽनुमन्त्रयते[9] ॥४॥

नेष्टुरुपस्थे धिष्ण्यान्ते वाऽऽसीनो भक्षयति ॥५॥[10]

तस्यैव पात्नीवतग्रहस्य नेष्टुरुपस्थे भक्षयति धिष्ण्यसमीपे वा ॥५॥

---

१. द्वादशमी भा[२]; एकादशी भा[१] A. २. तु. वैता १९,२२; काश्रौ १०, ५, १३. ३. आग्नीध्रस्तरण° मूको. ४. पुरो° मूको. ५. तु. काश्रौ १०, ६,१; आपश्रौ १३,१३, १-३. ६. परिभा° मूको. ७. तु. गोब्रा २, ४, ५; काश्रौ १०, ६, १८-१९; आश्रौ ५, १९,७; शांश्रौ ८, ५,१; आपश्रौ १३, १४,८. ८-८. होमानन्तरं भा[२]. ९. तु. काश्रौ. आपश्रौ (टि. १० द्र.). १०. तु. गोब्रा २,४,५; काश्रौ १०,६,२३-२४; आपश्रौ १३,१४,१३-१४.

अग्निष्टोमसाम्ने[1] होत्रे प्रसौति ओजोऽसि पितृभ्यस्त्वा पितॄन् जिन्व इति ॥६॥[2]

अग्निष्टोमसामस्तोमार्थं[3] प्रस्तोत्राऽऽमन्त्रितः प्रसौति ॥६॥

ध्रुवं ध्रुवेण (अ ७,९९ [९४], १) इति ध्रुवम् अवनीयमानम् अनुमन्त्रयते ॥७॥[4]

[5]एवा न[5] इन्द्रो मघवा (ऋ ४,१७,२०) इति होत्रा शस्यमाने अध्वर्युर्ध्रुवम् अवनयति। तम् अवनीयमानं ध्रुवं ध्रुवेणेत्यनुमन्त्रयते ॥७॥

[6]आग्निमारुतयाज्याहोमं प्रति त्यं चारुम् अध्वरम् (कौसू १२७,७) इति संप्रेषित आग्नीध्र इत्युक्तम् ॥८॥[7]

आग्निमारुतस्य याज्याहोमं प्रति त्यं चारुम् अध्वरम् इत्यनुमन्त्रयते। [8]संप्रैषः पश्वधिकारे उक्तः[8]। संप्रेषित आग्नीध्रः शामित्रादौपयजान् अङ्गारान् होतुः (वैता १०, २१) इति। तद् अत्रापि प्रत्येतव्यं विकृतत्वात्। प्राप्तसंप्रैषसमयबोधार्थम् इदम् उक्तम् ॥८॥

हारियोजनहोमम् आ मन्द्रैः (अ ७,१२२ [११७], १) इति ॥९॥[9]

अनेन मन्त्रेणानुमन्त्रयते ॥९॥

तेनैव निष्क्रामन्ति[10] ॥१०॥

आ मन्द्रैर् इति मन्त्रपाठतः ब्रह्मादयो निष्क्रामन्ति ॥१०॥

आग्नीध्रीये सर्वप्रायश्चित्तीयान् जुहोति[11] ॥११॥[12]

निष्क्रम्य ब्रह्मा आग्नीध्रीये सर्वप्रायश्चित्तीयान् जुहोति ॥११॥

---

१. °मसाम्नः वा पू. २. तु. गोब्रा २, २, १३; वैता २०, १३; १७,४. ३. °मार्थे भा[१]. ४. तु. काश्रौ १०,७,६; आपश्रौ १३,१६,१. ५-५. नास्ति मूको. ६. इतः प्रभृति २३, २०(क) भागान्तं नास्ति भा[२]. ७. तु. ऋ १,१९,१; आश्रौ ५,२०,८; काश्रौ १०, ७,९; शांश्रौ ८,६,१७; आपश्रौ १३, १६, १२; नास्ति भा[२] A. ८-८. संपत्यधिकारे उक्त भा[२] A. ९. काश्रौ १०,८,१३; आपश्रौ १३,१७,३. १०. नास्ति भा[१,२] A. ११. होमान् जु° वा पू. १२. तु. कौसू ५,१२-१३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्नौ शाकलान् सर्वे ॥क॥

सर्वे ब्रह्माद्य आहवनीयेऽग्नौ शाकलान् जुह्वति ॥क॥

तत्र मन्त्राः—

देवकृतस्यैनसोऽवयजनमसि स्वाहा। पितृकृतस्य, मनुष्यकृतस्य, आत्मकृतस्याऽनाज्ञाताज्ञातकृतस्य। यद्वो देवाश्चकृम जिह्वया गुरु मनसो[1] वा प्रयुती[2] देवहेडनम्। [3]अरावा यो नो अभि दुच्छुनायते[3] तस्मिंस्तदेनो वसवो नि धेतन[4] (ऋ १०,३७,१२) इति। [5]देवहेडनस्य सूक्ताभ्यां[5] च (अ ६, ११४-११५)॥ ख ॥१२॥[6]

यद्देवा देवहेडनम् इति सूक्तद्वयम् इति भाष्यकारः ॥ख॥१२॥

द्रोणकलशाद्[7] धाना हस्त आदाय भस्मान्ते निवपन्ते[8] ॥१३॥[9]

द्रोणकलशाद्[10] दीर्घचमसाद् धाना हस्त आदाय गृहीत्वा भस्मान्ते भस्मनि निवपन्ते मुञ्चन्ति ॥१३॥

चात्वालाद् अपरेणाध्वर्य्वासादितान् अप्सुसोमचमसान्[11] वैष्णव्यर्चा निनयन्ति ॥१४॥[12]

[13]विष्णुदेवत्येन तानूनप्त्रेण[13] मन्त्रेण चमसिनो निनयन्ति। अप्सुसोमचमसान् इति हलदन्तात्सप्तम्याः संज्ञायाम् (पा ६,३,९) इत्यलुक् ॥१४॥

उभा कवी युवाना सत्यादा धर्मणस्परि।
सत्यस्य धर्मणा वि सख्यानि सृजामहे[14] ॥

१. मनसा वा. २. प्रसूती भा[1] A; प्रयूती वा. ३-३. आरा वा यो ना अभिस्दुना° भा[1] A. ४. धत्तन वा पू भा[1] A G. ५-५. °हेडनसू° भा[1] A. ६. तु. गोब्रा २,४,६; काश्रौ १०,८,७; आपश्रौ १३.१७,९. ७. °कलशे मूको. ८. निवपन्ति भा[1] A. ९. तु. गोब्रा २,४,६; काश्रौ १०, ८, ६; आपश्रौ १३, १७,८; शांश्रौ ८,८,११. १०. नास्ति मूको. ११. सोमे चम° मूको. १२. तु. गोब्रा २,४, ६; काश्रौ १०,८,८; आपश्रौ १३, १७,९. १३-१३. विष्णुदेवत्ये तानूनप्त्रेणतं मूको. १४. सृजामहे वा पू भा[1] A शांश्रौ ८,१०,१.

इति सख्यानि विसृजन्ते[1] ॥१५॥[2]

तानूनप्त्रिणः[3] प्रतीतानि सख्यानि विसृजन्ते[4] अनेन मन्त्रेण ॥१५॥

सं सख्यानि इति संसृजन्ते[4] अहर्गणे प्राग् उत्तमात् ॥१६॥

सं सख्यानि सृजामहे[5] इत्येव भवति[6]। अनेन विकृतेन मन्त्रेण सख्यानि संसृजन्ते अहर्गणे अहःसमूहे प्राग् उत्तमात्। [7]वृत्ते उत्तमे च[7] प्रकृतितो विसर्ग एवेति ॥१६॥

आग्नीध्रीये दधि भक्षयन्ति दधिक्राव्णः[8] (अ २०, १३७, ३) इति ॥१७॥

आग्नीध्रशरणे भक्षयन्ति ॥१७॥

पत्नीसंयाजेभ्यः शालामुखीयम् उपविशति ॥१८॥[9]

[10]सवनीयस्य पशोः श्रपणार्थं[10] शालामुखीयं करोति। अधः विधिवद् उपविशति ॥१८॥

दक्षिणासंचरेणाऽऽहवनीयम् अपरेणातिव्रज्य[11] सामिष्टयजुर्भ्यः संस्थितहोमान् जुहोति ॥१९॥

अग्रेण गार्हपत्यं जघनेन सद उत्तरेणाग्नीध्रीयं च सदश्चेति दक्षिणासंचरः। एतेन गत्वाऽऽहवनीयम् अपरेणातिव्रज्य समिष्टयजुर्होमेभ्योऽनन्तरं संस्थितहोमान् जुहोति ॥१९॥

अप्स्ववभृथेष्ट्याम् अप्सु ते (अ ७, ८८ [८३], १) इति पुरस्ताद्धोमान् ॥क॥

[12]जुहोतीति शेषः। अप्सु इति अप्स्वेव †यथा स्यान् नाऽऽहवनीये†[12] ॥क॥

१. विसृज्यन्ते वा भा[1] A. २. तु. आगौ ६, १२, १२; शांश्रौ ८, १०,१; आपश्रौ १३,१८,२; हिश्रौ ९,४,५८; माश्रौ २ ५,४,१३. ३. तानूनप्त्रा मूको. ४. संसृज्यन्ते वा. ५. सृजामहै वा पू भा[1] A. शांश्रौ [२ टि. द्र.]. ६. भवन्ति मूको. ७-७; उत्त उत्तमेव भा[1] A. ८. °व्ण अकारिषम् भा[1] A. ९. तु. काश्रौ १०, ८, ११; आपश्रौ १३, १८,३. १०-१०. सवनस्य पशोपसद्यार्थं मूको. ११. एव नि भा[1] A. १२-१२. नास्ति भा[1]. †-†. यथाभ्यर्नोऽग्नि भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सावित्रान् संस्थितहोमान् ॥ख॥

सावित्रान् एतं भागम् (अ ६, १२२, १), एतं सधस्थाः (अ ६, १२३,१), उद्वले (अ १०,९,२६) इत्येतान् संस्थितहोमान् (तु. कौसू ६३,२९) ॥ख॥

वारुणम् त्वं नो अग्ने (अ ३,२०, ५), स त्वं नः (अ २०, ४६, ३) इति ॥ग॥ ॥२०॥[1]

वारुणम्[2] एककपालं सर्वं हुतहोमम् अनुमन्त्रयते ॥ग॥२०॥

इडान्ताऽनुयाजान्तैके ॥२१॥[3]

इयम् इष्टिर्भवति । अन्तवचनं संस्थितहोमदेशविध्यर्थम् ॥२१॥

सोमलिप्तानि दध्नाऽभिजुहोति अभूद्देवः (वैता १६,१५), द्रप्सवत्यः[4], यत्ते ग्रावा (वैता २४,१) इत्येतैः ॥२२॥[5]

सोमलिप्तानि सोमपात्राणि अध्वर्युणाऽप्सु प्रक्षिप्तानि[6] अभिजुहोति तेषाम् उपरि दध्ना जुहोति । अप्स्वित्यग्न्यभावात् । "एतैरिति मन्त्रसमुच्चयार्थम्" ॥२२॥

इति वैतानकल्पे तृतीयेऽध्याये त्रयोदशी कण्डिका ॥

[२४]

यत्ते ग्रावा बाहुच्युतो अचुच्यवोन्नरो यद्वा ते हस्तयोरधुक्षन् ।
तत्त आप्यायतां तत्ते निष्टयायतां सोम राजन् ॥
यत्ते ग्राव्णा चिच्छिदुः सोम राजन्प्रियाण्यङ्गा सुकृता पुरूणि ।
तत्संधत्स्वाऽऽज्येनोत वर्धयस्वानागसो यथा सदमित्संक्षियेम ॥
यां ते त्वचं बिभिदुर्यां च योनिं यद्वा स्थानात्प्रच्युतो यदि वासुतोऽसि ।
त्वया सोम क्लृप्तमस्माकमेतदुप नो राजन् सुकृते ह्वयस्व ।
सं प्राणापानाभ्यां समु चक्षुषा सं श्रोत्रेण गच्छस्व सोम राजन् ।
यत्ते विरिष्टं समु तत्त एतज्जानीतान्नः संगमने पथीनाम् ॥

१. तु. कौसू ६३,२९; वैता २,१०; काश्रौ १०, ८, २१-३२; आपश्रौ १३, २०,६-७. २. नास्ति भा[1] A. ३. तु. आश्रौ ६,१३,४; शांश्रौ ८,११,१०. ४. °वत्योः G; °त्या C. शोधः. ५. तु. गोब्रा २,२,१२;४,७; आपश्रौ १३,२०, ८;९; तैब्रा ३,७,१३,१;४. ६. प्रयततानि मूको. ७-७. °रेतिमन्त्रैः समु° मूको.

अह्नाः शरीरं पयसा समेत्यन्यो अन्यो भवति वर्णो अस्य ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥
अभिक्षरन्ति जुह्वो घृतेनाङ्गा परूंषि तव वर्धयन्ति ।
तस्मै ते सोम नम इद्वषट् चोप नो राजन् सुकृते ह्वयस्व ॥१॥[1]

कृष्णाजिनं निधाय संप्रोक्षति ॥२॥

कृष्णाजिनं भूमौ निधाय तूष्णीं संप्रोक्षति यजमानस्तत्संबन्धात् ॥२॥

अपां सूक्तैरित्याद्युपस्पर्शनान्तम् ॥३॥

अपां सूक्तैराप्लुत्य प्रदक्षिणम् आवृत्याऽप उपस्पृश्य (कौसू ७, १४) इत्येवमन्तम् अनुभवति ॥३॥

उद्वयम् (अ ७, ५५[५३], ७) इत्युत्क्रामन्ति ॥४॥

आचम्य तीर्थाद् उत्क्रामन्ति ॥४॥

अपाम सोमम् (ऋ ८,४८,३; तै ३,२,५,४), अगन्म स्वः (अ १६, ९, ३) इत्याव्रजन्ति ॥५॥[2]

यज्ञगृहानागच्छन्ति । प्रथमो 'ब्रह्मवेदे मन्त्रो न पठ्यते[3] ॥५॥

अपो दिव्याः (अ ७, ९४[८९],१)इत्याहवनीयम् उपतिष्ठन्ते ॥६॥[4]

विमुञ्चामि (कौसू ६,११-१३) इत्यादि मार्जनान्तम् ॥७॥[5]

आहवनीय एव विमुञ्चामि इत्यादिभिः तिसृभिः ऋग्भिस्तिस्रः समिध आधाय तेजोऽसीति मुखमार्जनान्तं भवति ॥६-७॥

उदयनीया प्रायणीयावत् ॥क॥

उदयनीया नामेष्टिः । सा प्रायणीयेष्टिवद् भवति ॥क॥

पथ्यायाश्चतुर्थम् ॥ख॥ ॥८॥

प्रायणीयावद् इत्यतिदेशविधेर्[1] विशेषविधानार्थं सूत्रम् । तेनोदयनीयायां पथ्यायाः स्वस्तेश्चतुर्थं हविर्विधीयते ॥ख॥८॥

१. तु. तैब्रा ३. ७, १३,१; नास्ति भा[1] [2] A. २. तु. काश्रौ १०, ९,८; आपश्रौ १३, २२, ५. ३-३. ब्रह्मवेदाना पठ्यंते भा[1] A; ब्रह्मवेदान्मं पठ्यंते भा[2]. ४. तु. आपश्रौ १३,२२,६. ५. इति दे° मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तसंस्था[1] ॥९॥[2]

इयम् उदयनीयाऽऽख्येष्टिर् अन्तसंस्था व्रतविसर्जनान्ता शंय्वन्ता ॥९॥

अनूबन्ध्यायाम् अपराजितायां तिष्ठन्त्यां सपत्नहनम् (अ ९,२,१) इति कामं नमस्करोति ॥१०॥[3]

अनूबन्ध्या वशा बन्ध्या गौः। तस्याम् अपराजितायां पूर्वोत्तरायां[4] दिशि तिष्ठन्त्यां सूक्तोक्तां[5] कामदेवतां[6] नमस्करोति ब्रह्मा ॥१०॥

यूपैकादशिनी चेद् वपामार्जनात्[7] त्वाष्ट्रः पशुः ॥११॥[8]

यदि यूपैकादशिनी भवेद् वपामार्जनाद् अनन्तरं त्वष्टृदेवत्यः पशुर्भवति। यूपैकादशिनी चेयं[9] प्रायेण सत्राहीनेष्वादावन्ते ॥११॥

पर्यग्निकृतस्योत्सर्गः ॥१२॥[10]

एतस्य त्वाष्ट्रस्य पशोः पर्यग्निकृतस्योत्सर्गो भवति ॥१२॥

अस्याऽऽज्यावदानहोमम् ॥क॥

अस्योत्सृष्टस्य पशोराज्यावदानहोमं संपातवन्तं[11] त्वष्टृदेवत्येन मन्त्रेणानुमन्त्रयते। [वसान्तस्तं हुत्वानेन दर्वतया] ? पुरस्ताद्धोमसंस्थितहोमाः ॥क॥

वशापशुपुरोडाशाद् देविकाहवींषि[12] ॥ख॥ ॥१३॥[13]

वशापुरोडाशहोमाद् अनन्तरं देविकाहविषां[14] होमान् अनुमन्त्रयते। अनुमती राका सिनीवाली कुहूस्ताभ्यक्षरवः, धात्रे द्वादशकपाल इति ॥ख॥१३॥

---

१. अन्तः सं° भा[२] G. २. तु. आपश्रौ १०, २१,४. ३. तु. काश्रौ १०, ९, १३-१७; आपश्रौ १३, २३, ६-१७. ४. पूर्वात° मूको. ५. सूक्तं मूको. ६. कामं दे° भा[१]. ७. तु. C G; °र्जना मूको. ८. तु. काश्रौ ८, ९,१-२; आपश्रौ १४, ७,१२-१३; शांश्रौ ९,२७,४. ९. चे च भा[१] A; चेत्भा[१]. १०. तु. काश्रौ ८,९,३; आपश्रौ१४,१२,१३; शांश्रौ ९,२७,५. ११. संपातयन्ति मूको. १२. तु. शांश्रौ ९, २८,१;२; आपश्रौ १३, २४, १; C; G °हविषा; देविका A. १३. तु. काश्रौ ८,९,३; वैता २२,१८. १४. हविषा मूको.

अयं ते योनिः (अ (३,२०,१) इत्यरण्योरग्निं समारोप्यमाणम् अनुमन्त्रयते ॥क॥[1]

अध्वर्युणा समारोप्यमाणम् अग्निम् अनुमन्त्रयते ॥क॥

या ते अग्ने यज्ञिया तनूस्तया मे ह्यारोह तया मे ह्याविश। अयं ते योनिः इत्यात्मन् (गोब्रा २, ४, ९) ॥ख॥ ॥१४॥[1]

आत्मनि[2] समारोपणम्[3] अनुमन्त्रयते ॥ख॥१४॥

अपमित्यमप्रतीत्तम्[4] (अ ६, ११७,१) इति वेदिम् उपोष्यमाणाम् ॥१५॥[5]

वेदिम् आदीप्यमानाम् अनुमन्त्रयते ॥१५॥

सक्तुहोमे[6] विश्वलोप विश्वदावस्य त्वाऽऽसञ्जुहोमि (तैसं ३,३,८,२ गोब्रा २,४,८) इत्याह ॥१६॥[7]

सक्तुहोमे क्रियमाणे विश्वलोपेत्यादिकं[8] मन्त्रम् आह ॥१६॥

यो अग्नौ (अ ७,९२[८७],१) इति नमस्कृत्य तेनैव निष्क्रामन्ति ॥१७॥[9]

मन्त्रोक्तां देवतां नमस्कृत्य येनैव[10] प्रथमं प्रविष्टास्तेनैव निष्क्रामन्ति ॥१७॥

उपावरोह (कौसू ४०,१३) इति मथ्यमानम् अनुमन्त्रयते ॥१८॥

उपारूढं निर्मथ्यमानम् अग्निम् अनुमन्त्रयते ॥१८॥

इत्यग्निष्टोमः ॥१९॥

इतिः[11] कर्मसमाप्त्यर्थः। अग्निष्टोम इति कर्मनामधेयम् ॥१९॥

---

१. तु. गोब्रा २, ४, ९; तैसं ३, ४, १०, ५; आपश्रौ ६, २८,१०-११. २. नास्ति मूको. ३. °णं द्वाभ्याम् भा[१] A. ४. नास्ति भा[१२] A. ५. तु. तैसं ३, ३,८, ३-४; गोब्रा २. ४,८; काश्रौ १०,९,२६; आपश्रौ १३,२४,१५. ६. सक्तुलोपे भा[१] A. ७. तु. गोब्रा २, ४, ८; आपश्रौ १३, २४, १६. ८. °पेत्युदकं मूको. ९. तु. वैता २३,१०. १०. तेनैव मूको. ११. नास्ति भा[१] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अल्पस्व एकगुनाऽपि[1] यजेत यजेत[2] ॥२०॥

इत्यथर्ववेदे वैतानसूत्रे तृतीयोऽध्यायः समाप्तः ॥

अल्पधन एकगुनाप्यग्निष्टोमेन यजति । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥२०॥

इति कौशिकीये वैतानकल्पे[3] सोमादित्यस्याऽऽक्षेपानुविधौ[4]

तृतीयेऽध्याये चतुर्दशी कण्डिका ॥

तृतीयोऽध्यायः समाप्तः ॥

पुस्तकालय

१. एकप्रगु° भा¹ A. २. नास्ति भा¹ ² A G. ३. वैतानसूत्रभाष्ये भा². ४. नास्ति भा².

अथ चतुर्थोऽध्यायः

[२५]

अग्निष्टोमसाम्नो होत्रे षोडशिस्तोत्रेणाऽत्यग्निष्टोमः[1] ॥क॥

अग्निष्टोमस्यान्त्यं स्तोत्रम् अग्निष्टोमः समाख्यानात् । तत्संस्थितो ह्यग्निष्टोमः । तस्मात्साम्नोऽनन्तरं होत्रर्थं षोडशिस्तोत्रं स्तुवन्ति । तेन त्रयोदशेन षोडशिस्तोत्रेणाऽग्निष्टोमसंस्थाम् अतीत्य प्रयुज्यमानेनाऽत्यग्निष्टोमो भवति । षोडशिस्तोत्रातिदेशे[2] तत्स्तोत्रसंतन्वत्स्तोमभागादि सर्वं तद्वदेव भवति । द्वितीया चेयं संस्था ॥क॥

उक्थ्ये मैत्रावरुणादिभ्यः प्रसौति—तन्तुरसि प्रजाभ्यस्त्वा प्रजा[3] जिन्व । रेवदस्योषधिभ्यस्त्वौषधीर्जिन्व । पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व इति ॥ख॥ ॥१॥[4]

उक्थ्ये मैत्रावरुणादिभ्यः प्रसौति तन्तुरसीत्यादि [5]पशुभ्यस्त्वा पशून् जिन्वे[5]-त्यन्तं सूत्रम् । अत्र ब्राह्मणम्— यदभ्युत्थायासुरानहोरात्रयोः सन्धेर्निर्जघ्नुस्तस्मादुक्थानि[6] (तु. गोब्रा २, ४, ११) तैः संतिष्ठत उक्थ्यः । तस्मिन्नुक्थ्यक्रतौ मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकेभ्यः प्रस्तोत्राऽऽमन्त्रितः[7] यथाक्रमं तन्तुरसि इत्यादिभिः स्तोमभागैः ओं भूर्भुवः स्वद् (वैता १७,६) इत्याद्यनुक्रमैः प्रसौति ॥ख॥१॥

१. °ष्टोमे G C. २. षोडशस्तोत्रादिदेश मूको. ३. तु. तैसं ३. ५, २,३; तां १, १०, १; गोब्रा २,२, १३; C. च; वैतु G K. [JRAS १९१० ९३८], मूको. च प्रजाम्. ४. तु. गोब्रा २,२,१३. ५-५. प्रजाभ्यस्त्वा प्रजां जि° मूको. ६. °दुत्थाः (?) गोब्रा. ७. °स्तोताऽऽम° मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेषां याज्याहोमान् इन्द्रावरुणा सुतपौ (अ ७, ६० [५८], १), बृहस्पतिर्नः (अ ७, ५३ [५१]), उभा जिग्यथुः (अ ७, ४५ [४४]) इति ॥२॥

एतेषां मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां शस्त्रयाज्याहोमान् यथाक्रमम् अनुमन्त्रयते ॥२॥

वयमु त्वामपूर्व्य (अ २०, १४, १), यो न इदमिदं पुरा (अ २०, १४, ३) इति स्तोत्रियाऽनुरूपौ ॥३॥[1]

उत्तमात् प्रतीहारात् त्रिर् हिङ्कृत्य[2] शंसावोम् इत्यध्वर्युमाह्वयते (वैता २०, १५), साम्ना शस्त्रम् उपसंतनोति (वैता २०, २१) इत्यादिकं सविशेषाद् भवति द्वे तिस्रः करोति (वैता २२, ८) इति स्तविष्यमाणलक्षणम्[3] ॥३॥

स्तोत्रियस्य प्रथमां शस्त्वा तस्या उत्तमं पादं[4] द्वितीयस्याः पूर्वेण संधायाऽवसाय द्वितीयेन द्वितीयां शंसति ॥क॥

वयमु त्वा (अ २०, १४, १) इति द्वयृचस्य स्तोत्रियस्य प्रथमाम् ऋचं शस्त्वा तस्या उत्तमं पादं वाजे चित्रं हवामहे (२०, १४, १ᶜ) इति द्वितीयस्या ऋचः पूर्वेण पादेन उप त्वा कर्मन्नूतये (अ २०, १४, २ᵃ) इति संधायाऽवसाय विरम्य द्वितीयेन स नो युवोग्रश्चक्राम यो धृषत् (अ २०, १४, २ᵇ) इति द्वितीयाम् ऋचं शंसति ॥क॥

तस्या एव[5] उत्तमम् उत्तरेण संधायाऽवसायोत्तमेन तृतीयायाम् ॥ख॥ ॥४॥[6]

तस्याः अप्रथमीकृतायाः । एवशब्दाद् अनाम्नायपठिताया[7] उत्तमं पादं स नो युवा इति उत्तरेण पादेन त्वामिद्धयवितारं ववृमहे (अ २०, १४, २ᶜ) इति संधायाऽवसाय उत्तमेन पादेन[8] सखाय इन्द्र सानसिम् (अ २०, १४, २ᵈ) इति तृतीयां शंसति । एवम् अनुरूपेऽपि प्रग्रथनम्[9] उपरितनस्य सूत्रस्य

१. तु. वैता २०, १४; २५, ३-११; गोब्रा २, ४, १७; आश्रौ ६, १, २; शाश्रौ ९, ३, २. २. °हिंकृत्वाऽध्वर्यो भा[१]. A.; °हिंकृत्याप्यध्वर्यो भा[२]. ३. भविष्य° मूको. ४. नास्ति वा. ५-५. नास्ति भा[१ २] A. ६. तु. आश्रौ ५, १५, ८-९. ७. अनाम्ना प° मूको. ८. नास्ति मूको. ९. प्रथमं भा[१]; प्रमथमं भा[२] A.

सर्वस्तोत्रियाऽनुरूपार्थत्वात् ॥ख॥४॥

एवं काकुभानां स्तोत्रियाऽनुरूपाणां प्रग्रथनम्[1] ॥५॥[2]

एवम् अनेन प्रकारेण ककुप्संपत्त्यर्थं प्रग्रथनं[1] कर्तव्यम् । प्रदेशेषु यथास्तुतम् अनुशंसति (वैता ३५, १) इत्येतदर्थं चैतत् ॥५॥

इतः पच्छः शंसति ॥६॥[3]

इतः स्तोत्रियानुरूपशंसनाद् ऊर्ध्वं पच्छः पादशः परिधानीयान्तं शंसति ॥६॥

प्र मंहिष्ठाय बृहते बृहद्रये (अ २०, १५) इत्युक्थमुखम्[4] ॥७॥[5]

प्र मंहिष्ठाय इति सूक्तं षडर्चम् ऐन्द्रम् उक्थमुखम् ॥७॥

उदप्रुतो न वयो रक्षमाणाः (अ २०, १६) इति बार्हस्पत्यं सांशंसिकम् ॥८॥[6]

उदप्रुतो न वयो रक्षमाणाः इति द्वादशर्चं बार्हस्पत्यम् । इन्द्रेण [7]संशंसनात् सांशंसिकम्[7] इति । एवम् ऐन्द्राबार्हस्पत्याभ्याम् एकम् ऐन्द्राबार्हस्पत्यं सूक्तं भवति ॥८॥

अच्छा म इन्द्रं मतयः स्वर्विदः (अ २०, १७, १) इति पर्यासः ॥९॥[8]

अच्छा म इन्द्रं मतयः स्वर्विदः इति द्वादशर्चः पर्यासः ॥९॥

इत्यैकाहिकानाम् उत्तमया परिदधाति ॥१०॥

इत्येतेषाम् [9]उक्थमुखादीनां त्रयाणाम्[9] ऐकाहिकसंस्थानाम्[10] । उत्तमया ऋचा बृहस्पतिर्नः परि पातु पश्चात् (अ २०, १७, ११) इति परिदधाति शस्त्रं समापयति । परिदधातिग्रहणम् आह्वावार्थम् ॥१०॥

परया यजति ॥११॥[11]

परिधानीयायाः परया बृहस्पते युवमिन्द्रश्च वस्वः (अ २०, १७, १२) इति । तृतीया चेयं संस्था ॥११॥

१. प्रग्रन्थनं भा[१] A. २. तु. वैता २२, ८. ३. तु. वैता २१, ४; २२, १२. ४. नास्ति पू भा[१ २] A. ५. तु. गोब्रा २, ४, १६; आश्रौ ६ १, २; शाश्रौ ९, ३, ३-४. ६. नास्ति भा[१ २] A. ७-७. शंसता शंसिकम् मूको. ८. तु. गोब्रा २, ४, १६; आश्रौ ६, १, २; शाश्रौ ९, ३, ३-४ नास्ति भा[१]. ९-९. मुखादनात्रयणं भा[१ २]. १०. °हिकेशांस्थानाम् मूको. ११. तु. गोब्रा २, ४, १६; आश्रौ ६, १, २; शाश्रौ ९, ३, ३-४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षोडशिनि ग्रहम् उपतिष्ठन्ते —

य आबभूव भुवनानि विश्वा यस्मादन्यन्न परं किंच नास्ति ।
प्रजापतिः प्रजाभिः संविदानस्त्रीणि ज्योतींषि सचते[२] स षोडशी इति ॥१२॥[३]

य आबभूव इति षोडशिसंस्थे क्रतौ षोडशिनं ग्रहं गृहीतम् उपतिष्ठन्ते समाख्यानात् । बहुवचनं सर्वार्थम् ॥१२॥

होत्रे प्रसौति अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्व (तैसं ३, ५, २, ४) इति ॥१३॥[३]

होत्रर्थ प्रस्तोत्राऽऽमन्त्रितः[४] स्तोत्राय स्तोमभागेन ओं भूर्भुवः स्वर्जनदोम् (वैता १७, ६) इत्येवमादिविकृतेन प्रसौति ॥१३॥

षोडशिग्रहस्य इन्द्र जुषस्व (अ २, ५, १) इति ॥क॥

षोडशिग्रहहोमं सूक्तेनाऽनुमन्त्रयते ॥क॥

इन्द्र षोडशिन् ओजस्वांस्त्वं[५] देवेष्वसि । ओजस्वन्तं मामायुष्मन्तं मनुष्येषु कृणुहि[६] । तस्य त उपहूतस्योपहूतो भक्षयामि इति भक्षयन्ति ॥ख॥

इन्द्र षोडशिन् इति भक्षयन्ति[७] ॥ख॥

द्वौ द्वौ त्रयश्छन्दोगाः ॥ग॥ ॥१४॥[८]

षोडशिग्रहस्य तिसृणां होत्राणां[९] द्वौ द्वौ ऋत्विजौ सह भक्षयतः । छन्दोगास्तु त्रयो[१०] भक्षयन्ति ॥ग॥ १४॥

घर्मवत् सत्रे ॥१५॥

---

१. यनि. C शोधः (तु. मा ८, ३६)। दधते मूको. G. २. तु. तैब्रा ३, ७, ९, ५; काश्रौ १२, ५, २३; आपश्रौ १४, २, १३. ३. तु. गोब्रा २, २, १३; वैता २०, १३. ४. °ताम° मूको.. ५. यनि. C शोधः (तु. सप्र. मा ८, ३९ ओजिष्ठस्त्वम् इति), पक्षे च ओजस्विस्त्वम् इति (तु. आश्रौ ६, ३, २२)। ओजः संस्थं मूको. G. ६. मृणीहि वा पू. ७. °न्तीत्यन्तेन भा.[१] ८. तु. आपश्रौ १४, ३, ५-६; लाश्रौ ३, १, २३. ९. होतृणां A. १०. त्रयस्त्रयः भा[१].

सत्रे गवामयनादौ घर्मवत् षोडशिग्रहस्य भक्षो भवति । घर्मवदित्यतिदेशः कर्तृकमार्थः । छन्दोगास्त्रयो भक्षयन्ति । मन्त्रस्त्वयमेव लिङ्गात् । चतुर्थी चेयं संस्था ॥१५॥[१]

इति वैतानकल्पे चतुर्थेऽध्याये प्रथमा कण्डिका ॥

[२६]

अतिरात्रे होत्रादिभ्यः प्रसौति अधिपतिरसि प्राणाय त्वा प्राणं जिन्व । धरुणोऽस्यपानाय त्वाऽपानं जिन्व । संसर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्व । वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व (काठ १७, ७) इति ॥१॥[१]

अतिरात्रे होत्रादिभ्यः प्रसौत्यधिपतिरसीत्यादि श्रोत्रं जिन्वेत्यन्तं सूत्रम् । अतिरात्रसंस्थे क्रतौ होतृमैत्रावरुणब्राह्मणाच्छंस्यच्छावाकेभ्यः प्रस्तोत्राऽऽमन्त्रितः अधिपतिरसि इत्यादिभिः स्तोमभागैर्यथाक्रमं स्तोत्राय प्रसौति । अहरतीत्य रात्रौ वर्तत इत्यतिरात्रः ॥१॥

होमान् ऐन्द्रान् ॥क॥

होत्रादेः शस्त्रयाज्याहोमान्[३] यथाक्रमं पारिभाषिकैः[४] अनुमन्त्रयते ॥क॥

आश्विनाद् आश्विनम् ॥ख॥ ॥२॥[५]

आश्विनशस्त्रादनन्तरं होतुर्याज्याहोमम् आश्विनम् । अश्विना ब्रह्मणा यातम् (अ ५, २६, १२^a-b) इत्यर्धर्चेनानुमन्त्रयते । शस्त्रयाज्याहोमानुमन्त्रणं प्रसङ्गात् ॥ख॥२॥

अत्र विधिः —

स्तोत्रियानुरूपयोः प्रथमानि पदानि पुनरादायम् अर्द्धर्चशस्यवच्छंसति ॥क॥

---

१. तु. वैता १४, ७; ८. २. तु. तैसं ३, ५, २, ४; गोब्रा २, २, १४. ३. °देशस्तु याज्या° मूको. ४. परिभा° मूको. ५. तु. काश्रौ १२, ६, ४; आपश्रौ १४, ४, १०.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमे पर्याये वक्ष्यमाणस्तोत्रियानुरूपयोः[1] प्रथमानि पदानि इति[2] बहुवचनात्सर्वासाम् ऋचां प्रथमानि पदानि पुनः पुनरादायाभ्यासं कृत्वाऽर्द्धर्चशस्यवद् अर्द्धर्चम् अर्द्धर्चं शंसति । एवं च वयमु त्वा तदिदर्थाः (अ २०, १८, १a) इति पादम् अभ्यस्याऽवसायोत्तराभ्यां पादाभ्यां संहताभ्यां प्रणौति ॥क॥

मध्यमे पर्याये मध्यमान्युत्तम उत्तमानि ॥ख॥ ॥३॥[1]

मध्यमे पर्याये स्तोत्रियानुरूपयोः सर्वासामृचां मध्यमानि पदानि पुनरादायम् अर्द्धर्चशस्यवच्छंसति । एवं च अभि त्वा वृषभा (अ २०, २२, १a b) इत्यर्द्धर्चम् अवसाय सुतं सृजामि पीतये (अ २०,२२, १b) इति पुनरादाय तृम्पा व्यश्नुही मदम् (अ २०,२२,१c) इत्युत्तरेण संधाय प्रणौति ।

ततं उत्तमे पर्याये स्तोत्रियानुरूपयोरुत्तमानि पदानि पुनरादायम् अर्द्धर्चशस्यवच्छंसति । एवं च योगेयोगे (अ २०, २६, १a-b इत्यर्द्धर्चम् अवसाय सखाय इन्द्रमूतये (अ २०, २६,१c) इत्युत्तमं पादं[4] पुनरादाय प्रणौति ॥ख॥३॥

प्रातःसवनवद् आहावोक्थसंपदावस्वरौ[5] ॥४॥[6]

शंसावोम् इत्याहावः । उक्थं वाचि इत्युक्थसंपत् । एतौ प्रातःसवनिकाविह भवतः सवनस्वरवार्जितौ[7] । तृतीयसवनशेषत्वात्तु तार्तीयः स्वरः ॥४॥

वयमु त्वा तदिदर्थाः (अ २०,१८,१-३), वयमिन्द्र त्वायवः (अ २०, १८,४) इति स्तोत्रियानुरूपौ ॥५॥[8]

'प्रथमे पर्याये'[9] एतौ स्तोत्रियानुरूपौ भवतः उक्थशंसनधर्मकौ[10] ॥५॥

ऊर्द्ध्वं सर्वत्र त्रीणि सूक्तानि ॥क॥[11]

अनुरूपाद् ऊर्ध्वं सर्वेषु पर्यायेषु[12] त्रीणि सूक्तानि भवन्ति । तत्र प्रथमे पर्याये वार्त्रहत्याय शवसे (अ २०,१९), शुष्मिन्तमं न ऊतये (अ २०, २०),

---

१. वक्षमाणे स्तो° मूको. २. नास्ति भा[1] A. ३. तु. गोब्रा २,५,२; ऐब्रा ४, ६; तां ९, १, ४; १६; १९; आश्रौ ६, ४, २-५. ४. नास्ति भा[1]. ५. °दावत्स्वरौ वा पू भा[1 2] A. ६. तु. वैता २०, १९-२१; २१, ५. ७. सवनस्य स्व° भा[1] A. ८. तु. आश्रौ ६, ४, १०; शांश्रौ ९, ९, १. ९-९. °मपर्या° भा[1] A. १०. उक्थ्यशंसनधर्मः मूको. ११. तु. आश्रौ ६,४, १०; शांश्रौ ९, ९, १. १२. नास्ति मूको.

न्यू३षु वाचम् (अ २०,२१) इति । मध्यमे आ तू न इन्द्र मद्रयक् (अ २०, २३), उप नः सुतमा गहि (अ २०,२४), अश्वावति प्रथमः (अ २०,२५) इति । उत्तमे यदिन्द्राहम् (अ २०, २७), व्यन्तरिक्षमतिरन् (अ २०, २८), प्र ते महे विदथे (अ २०,३०) इति ॥क॥

अन्त्यं पच्छः पर्यासः ॥ख॥ ॥६॥

अन्त्यं तृतीयं[1] सूक्तं सर्वेषु पर्यायेषु पच्छः पादं पादं शंसति । पच्छोग्रहणात् पूर्वे सूक्ते अर्द्धर्चशः शंसति । पर्यास इति[2] ब्राह्मणसंज्ञा ॥ख॥६॥

य उद्दचि (अ २०,२१, ११) इति परिधानीया । अप्सु धूतस्य (अ २०, ३३, १) इति याज्या ॥७॥

परिधानीयाग्रहणम् आहावार्थम्[3] ॥७॥

मध्यमे त्रिवृदसि त्रिवृते त्वा त्रिवृतं जिन्व । प्रवृदसि प्रवृते त्वा प्रवृतं जिन्व । स्ववृदसि स्ववृते त्वा स्ववृतं जिन्व । अनुवृदस्यनुवृते त्वानुवृतं जिन्व इति ॥८॥[4]

मध्यमे त्रिवृदसीत्यादि अनुवृतं जिन्वेत्यन्तं सूत्रम् । मध्यमे पर्याये होत्रादिभ्यः प्रस्तोत्राऽऽमन्त्रितः स्तोमभागैर्यथाक्रमं प्रसौति ॥८॥

अभि त्वा वृषभा सुते (अ २०, २२, १-३), अभि प्र गोपतिं गिरा (अ २०,२२,४-६) इति स्तोत्रियानुरूपौ ॥९॥[5]

मध्यमे पर्याये एतौ स्तोत्रियानुरूपौ उक्थशंसनधर्मकौ भवतः ॥९॥

बर्हिर्वा यत्स्वपत्याय (अ २०, २५, ६) इति परिधानीया ॥क॥

परिधानीयाग्रहणम् उक्तार्थम् ॥क॥

प्रोग्रां पीतिम् (अ २०,२५,७) इति याज्या ॥ख॥ ॥१०॥

एषा शस्त्रयाज्या ॥ख॥१०॥[6]

उत्तमे आरोहोऽस्यारोहाय त्वाऽऽरोहं जिन्व । प्ररोहोऽसि प्ररोहाय त्वा

---

१. सत्रितीयं भा[1] A. २. नास्ति मूको. ३. °वार्थे भा[1] A. ४. तु. गोब्रा २, ३,१४; मा १५. ९. ५. तु. आश्रौ. ६, ४,१०; शांश्रौ ९, १३, १-३. ६. नास्ति प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्ररोहं जिन्व । संरोहोऽसि संरोहाय त्वा संरोहं जिन्व । अनुरोहोऽस्यनुरोहाय त्वाऽनुरोहं जिन्व इति ॥११॥[1]

उत्तम आरोहोऽसीत्यादि अनुरोहं जिन्वेत्यन्तं सूत्रम् । उत्तमे पर्याये होत्रादिभ्य एव प्रस्तोत्राऽऽमन्त्रितः स्तोमभागैर्यथाक्रमं प्रसौति ॥११॥

योगेयोगे तवस्तरम् (अ २०,२६,१-३), युञ्जन्ति ब्रध्नमरुषम् (अ २०,२६,४-६) इति स्तोत्रियानुरूपौ ॥१२॥

उत्तमे पर्याये एतौ तृचौ स्तोत्रियानुरूपौ उक्थशंसनधर्मकौ भवतः ॥१२॥

[2]अपाः पूर्वेषाम् (अ २०, ३२, ३) इति परिधानीया[2] ॥क॥

ऊती शचीवः (अ २०, ३३, ३) इति याज्या ॥ख॥ ॥१३॥

एषा शस्त्रयाज्या भवति ॥ख॥१३॥

होत्र आश्विनाय प्रसौति वसुकोऽसि वस्यष्टिरसि वेषश्रीरसि वसुकाय त्वा वस्यष्टयै त्वा वेषश्रियै त्वा वसुकं जिन्व वस्यष्टिं जिन्व वेषश्रियं जिन्व इति ॥१४॥[3]

होत्र आश्विनाय प्रसौति वसुकोऽसीत्यादिना । होत्रर्थं प्रस्तोत्राऽऽमन्त्रित आश्विनस्तोत्राय स्तोमभागेन प्रसौति । पञ्चमी चेयं संस्था ॥१४॥

एवं चतुःसंस्थो ज्योतिष्टोमोऽत्यग्निष्टोमवर्जम् ॥क॥

एवम् उक्तप्रकारः चतुःसंस्थोऽपि ज्योतिष्टोमसंज्ञो भवति अत्यग्निष्टोमसंज्ञावर्जम् ॥क॥

एष सोमानां प्रकृतिः ॥ख॥ ॥१५॥

एष चतुःसंस्थो ज्योतिष्टोमः सर्वेषाम् एकाहाऽहीनसत्रसोमानां प्रकृतिर्भवति । एतदेव संज्ञायाः प्रयोजनम् ॥ख॥१५॥

इति वैतानकल्पे चतुर्थेऽध्याये द्वितीया कण्डिका ॥

---

१. तु. गोब्रा २,२,१४. २-२. नास्ति भा[१२] A. ३. तु. गोब्रा २,२, १४; आश्रौ ६, ५,१ प्रभृ.; शांश्रौ ९, २०,१ प्रभृ.

[२७]

वाजपेयः शरदि ॥१॥[1]

वाजपेय इति क्रतोराख्या । स शरदि ऋतौ प्रयोक्तव्यः ॥१॥

सर्वः[2] सप्तदश ॥२॥[3]

सर्वः सप्तदशस्तोमको भवति । सर्वग्रहणाद् दीक्षायूपारत्निवासांसि पशवोऽश्वरथादि सर्वं[4] सप्तदशसंख्याकं भवतीति भगवान् वाचस्पतिः ॥२॥

हिरण्यस्रज ऋत्विजः ॥३॥[5]

ऋत्विजः सर्वे हिरण्यस्रजाऽलंकृता[6] भवन्ति ॥३॥

मरुत्वतीयाद् बार्हस्पत्येष्टिराज्यभागादीडान्ता ॥४-५॥[7]

मरुत्वतीयशस्त्रयाज्याहोमादनन्तरं बार्हस्पत्येष्टिर्नीवारेण चरुणा भवति । सा चाऽऽज्यभागादीडान्ता भवति । आज्यभागेडान्तवचनं पुरस्ताद्धोमसंस्थितहोमदेशविध्यर्थम्[8] ॥४-५॥

यूपमारोक्ष्यमाणो यजमान आह देवस्य सवितुः सवे स्वर्गं वर्षिष्ठं नाकं रुहेयम् (गोब्रा २,५,८), पृष्ठात् पृथिव्या अहम् (अ ४, १४, ३-५) इति ॥६॥[9]

वाजपेयपशोर्यूपम् अध्वर्य्वादिभिर्यजमान आरोक्ष्यमाणः देवस्य सवितुः सवे स्वर्गं वर्षिष्ठं नाकं रुहेयम् । पृष्ठात् पृथिव्याः इति तृचं च ब्रूते ॥६॥

आरूढः यावत्ते (अ १२,१,३३) इति वीक्षते ॥७॥[10]

यूपमारूढो यजमानो यावत्ते इत्यृचा भूमिमीक्षते ॥७॥

---

१. तु. काश्रौ १४, १, १; आपश्रौ १८, १, १. २. नास्ति वा. ३. तु. गोब्रा २,५,८; आपश्रौ १८,१,५. ४. नास्ति मूको. ५. तु. गोब्रा २, ५,८; काश्रौ १४, १, २३; आश्रौ ९, ९,४. ६. °ण्य सद्दालालं° भा[१]. ७. तु. आश्रौ ९, ९, ६-७; काश्रौ १४,२, २६;५,१९; आपश्रौ १८, २, १७; ६, १०. ८. °शनिवृत्यर्थम् भा[१] A. ९. काश्रौ १४, ५, १०; आपश्रौ १८, ४, १२. १०. तु. काश्रौ १४,५, ११; आपश्रौ १८, ३,१७.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवरुह्य भूमे मातः (अ १२, १, ६३) इति ॥क॥

यूपादवतीर्य [1]भूमे मातः इति[1] भूमिम् अवेक्षते ॥क॥

यूपवासांसि ब्रह्मणे ददाति ॥ख॥ ॥८॥[2]

सप्तदश यूपवासांसि भवन्ति । तानि[3] यजमानो ब्रह्मणे ददाति ॥ख॥८॥

तीर्थदेशे रथचक्रम् आरुह्य अपराजिताऽभिमुखोऽश्वरथान् ईक्षमाण[4] आसीनो वाजिसामाऽभिगायति[5] त्रिः —

आविर्मर्या आ वाजं वाजिनो अग्मन् देवस्य सवितुः सवे । स्वर्गमर्वन्तो जयेम इति ॥९॥[6]

तीर्थदेशे चात्वालोत्करयोः समीपे अध्वर्युभिरारोपितं रथचक्रं ब्रह्माऽऽरुह्य अपराजितादिङ्मुखोऽश्वरथान् ईक्षमाण आसीनो वाजिसामाख्यं[7] साम गायति त्रीन् वारान् पुराणकल्पदृष्ट्या गीत्या ॥ आविर्मर्याः इत्यस्यामृचि ब्रह्मणः[8] सामगानं ब्रह्मा कर्मणि (वैता १,१) इति परिभाषणात् । ब्रह्मा रथचक्रं सर्पति इत्युपक्रम्य वाजिसामाऽभिगायति (गोब्रा २, ५, ८) इति श्रुतेश्च । पूर्वसूत्रे तु दानयोगाद् यजमानाऽनुवृत्तिः । आसीनग्रहणम् उपवेशनधर्मनिवृत्त्यर्थम् । त्रिर्ग्रहणं नियमार्थम् ॥९॥

तद्वो गाय (अ २०, ७८, १) इति स्तोत्रियः ॥१०॥

उपरि माध्यन्दिनवचनात्[9] प्रातःसवने प्राकृतस्य[10] प्रत्याम्नायक एकः स्तोत्रियो भवति । अनुरूपस्तु प्राकृत[11] एव ॥१०॥

अभिप्लवस्तोत्रियान् आवपते ॥११॥

अभिप्लवषडहप्रातःसवने स्तोत्रियाः आ याहि सुषुमा हि ते (अ २०, ३८, १-३), इन्द्रमिद्गाथिनो बृहत् (अ २०,३८,४-६), इन्द्रेण सं हि दक्षसे (अ २०, ४०, १-३), इन्द्रो दधीचो अस्थभिः (अ २०,४१,४-६), वाचमष्टापदीमहम् (अ २०,४२,

१-१. नास्ति भा[2]. २. तु. काश्रौ १४, ५, ३५. ३. नास्ति मूको. ४. वीक्ष° वा पू ब. ५. वाजसामा° भा[12] A G. ६. तु. कौ १,४३५; गोब्रा २,५,८; काश्रौ १४, ३;१२;४.१; आश्रौ ९,९,८; आपश्रौ १८,४,८-११; लाश्रौ ५,१२, ८-१८. ७. वाजसा° मूको. ८. ब्राह्मण भा[1] A. ९. तु. वैता २७,१२; °दिनवचन मूको. १०. प्राक्कृतस्य मूको. ११. प्रकृतय मूको.

१-३), भिन्धि विश्वा अप द्विषः (अ २०,४३,१-३) इत्येतान् तृचान् अनुरूपान् आवपते । एकाहेपूर्ब्वम् अनुरूपाद् आवापः (वैता ३५, ६-७) इति परिभाषणात्[1] ॥११॥

माध्यन्दिने इन्द्र क्रतुं न आ भर (अ २०, ७९, १-२) इति स्तोत्रियः । इन्द्र ज्येष्ठम् (अ २०,८०,१-२), उद्धु त्ये मधुमत्तमाः (अ २०,५९, १-२) इति वा ॥१२॥

माध्यन्दिने सवने एतेषाम् अन्यतमो विकल्पेन स्तोत्रियो भवति । अनुरूपस्तु प्राकृतः ॥१२॥

कन्नव्यो अतसीनाम् (अ २०,५०,१-२) इति सामप्रगाथः ॥१३॥

प्राकृतस्य प्रत्याम्नायकः प्रगाथो भवति स्तोत्रियवत् ॥१३॥

अहीनसूक्तम् आवपते ॥१४॥

प्रगाथान्माध्यन्दिने (वैता ३५, ८) इति परिभाषणात्[2] प्रगाथादनन्तरम् अस्मा इदु प्र तवसे तुराय (अ २०, ३५) इत्यहीनसूक्तम् आवपते । उक्थमुखेन सह प्रयोगात् समानच्छन्दस्त्वाच्च पच्छः शंसनम्[2] ॥१४॥

तृतीयसवने य एक इद्विदयते (अ २०, ६३, ४-६), य इन्द्र सोमपातमः (अ २०,६३,७-९) इति स्तोत्रियानुरूपौ ॥१५॥

प्राकृतयोः स्तोत्रियानुरूपयोः एतौ प्रत्याम्नायकौ भवतः ॥१५॥

ऊर्ध्वं षोडशिनो होत्रे नाभुरसि सप्तदशः प्रजापतिरसि [3]प्रजापतये त्वा[3] प्रजापतिं जिन्व इति ॥१६॥[4]

ऊर्ध्वं षोडशिशस्त्रयाज्याहोमात् शस्त्रार्थं[5] प्रस्तोत्राऽऽमन्त्रितो होत्रे नाभुरसि इत्यादिना स्तोमभागेन प्रसौति ॥१६॥

बृहस्पतिसवं परियज्ञमेके ॥१७॥[6]

बृहस्पतिसवो नाम क्रतुः । तं वाजपेयस्य परितः उभयतः एके शाखिन आमनन्ति । षष्ठी चेयं संस्था ॥१७॥

१. °भाषात् मूको. २. तु. वैता २२, १२. ३-३. तु. C. (तु. वैता १७, ४; २७, २७); वैतु. वा पू G BC प्रजापतिष्ट्वा. ४. तु. गोब्रा २, २, १३. ५. होत्रर्थं मूको. ६. तु. काश्रौ १४, १, २; शांश्रौ १५, १८, १; लाश्रौ ८, ११, १३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्तोर्याम्णि गर्भकारं शंसति ॥१८॥[१]

अप्तोर्याम्णि क्रतौ गर्भकारं गर्भप्रतिरूपं शंसति। यथा गर्भो मध्ये भवत्येवं स्तोत्रियो मध्ये भवत्यनुरूपयोः ॥१८॥

तं गर्भकारं दर्शयन्नाह —

युञ्जन्ति ब्रध्नमरुषम् (अ २०, २६, ४-६) इति स्तोत्रियम् अभितः आ याहि (अ २०, ३, १-३) इति ॥१९॥

उपरिष्टान्माध्यन्दिनवचनात् प्रातःसवने युञ्जन्ति ब्रध्नम् इत्येनं स्तोत्रियम् अभितः उभयतः आ याहि इत्ययं प्रातःसवने स्तोत्रियो भवति ॥१९॥

भिन्धि विश्वा अप द्विषः (अ २०, ४३, १-३) इत्यनुरूपम् अभितः आ नो याहि (अ २०, ४, १-३) इति ॥२०॥

अस्य स्तोत्रियवद् व्याख्या ॥२०॥

वाजपेयवद् आवापः ॥२१॥

[२]वाजपेयेऽभिप्लवस्तोत्रियाणाम् आवापो य[३] उक्तः[१] स इहापि तद्वद् भवति ॥२१॥[२]

माध्यन्दिने यद् द्याव इन्द्र ते शतम् (अ २०, ८१, १-२), यदिन्द्र यावतस्त्वम् (अ २०, ८२, १-२) इति स्तोत्रियानुरूपावभितः स्तोत्रियानुरूपौ ॥२२॥

माध्यन्दिने सर्वतः यद् द्याव इन्द्र ते शतम् इति स्तोत्रियम् अभितः प्राकृतः स्तोत्रियो भवति। यदिन्द्र यावतस्त्वम् इत्यनुरूपम् अभितः प्राकृतोऽनुरूपः ॥२२॥

सामप्रगाथात् इन्द्र त्रिधातु शरणम् (अ २०, ८३, १-२) इति सामप्रगाथः ॥२३॥

उदु त्ये मधुमत्तमाः (अ २०, १०) इति प्राकृतात् सामप्रगाथाद् अनन्तरम् एष च सामप्रगाथो भवति ॥२३॥[५]

१. तु. आश्रौ ९, ११, ४. २-२. तु. वैता २७, ११; वाजपेयेणाभिप्लवस्तो- ... ३ ... ४. ... वैता २७, ११. ५. तु.

सुकीर्तिर्वृषाकपी सामसूक्तम् अहीनसूक्तम् आवपते ॥२४॥

प्रगाथान्माध्यन्दिने (वैता ३५, ८) इति परिभाषणात् प्रगाथाद् ऊर्ध्वं सुकीर्त्यादीन्यावपते। अपेन्द्र प्राचः (अ २०, १२५) इति सुकीर्तिः। वि हि सोतोः (अ २०, १२६) इति वृषाकपिः। शंसनधर्मः षष्ठे उक्तः[१]। समासकरणं सहचरणत्वात्। तथाहि— यदि नाभानेदिष्ठं शंसेत्तदा ब्राह्मणाच्छंसी सुकीर्तिवृषाकपी शंसति। यो जात एव प्रथमो मनस्वान् (अ २०, ३४) इति साम-सूक्तम्। उत्तरम्[२] अहीनसूक्तम्। एते पच्छः शंसति स्थानात् ॥२४॥

तृतीयसवने सुरूपकृत्नुमूतये (अ २०, ५७, १-३), शुष्मिन्तमं न ऊतये (अ २०, ५७, ४-६) इति स्तोत्रियानुरूपौ [३]अभितः स्तोत्रियानुरूपौ[३] ॥२५॥

माध्यन्दिनवद् व्याख्यातम् ॥२५॥

शेषं पृष्ठ्यषष्ठवत् साऽतिरात्रम् ॥२६॥

स्तोत्रियानुरूपयोरन्यत् पृष्ठ्यषष्ठेनाऽह्ना तुल्यं भवति। षष्ठस्योक्थसंस्थत्वात् साऽतिरात्रं विधीयते ॥२६॥

अतिरिक्तोक्थेषु होत्रादिभ्यः प्रसौति आक्रमोऽस्याक्रमाय त्वाऽऽक्रमं जिन्व। संक्रमोऽसि संक्रमाय त्वा संक्रमं जिन्व। उत्क्रमोऽस्युत्क्रमाय त्वोत्क्रमं जिन्व। उत्क्रान्तिरस्युत्क्रान्त्यै त्वोत्क्रान्तिं जिन्व इति ॥२७॥

आक्रमोऽसीत्यादि उत्क्रान्तिं जिन्वेत्यन्तं सूत्रम्। अतिरिक्तोक्थेषु होत्रादिभ्यः प्रसौति अतिरात्रादतिरिक्तोक्थेषु[४] होत्रादिभ्यश्चतुर्भ्यः प्रस्तोत्राऽऽमन्त्रितः स्तोमभागैः यथाक्रमं[५] प्रसौति ॥२७॥

तमिन्द्रं वाजयामसि (अ २०, ४७, १-३), महाँ इन्द्रो [६]य ओजसा (अ २०, १३८, १-३) इति स्तोत्रियानुरूपौ[६] ॥क॥

अतिरिक्तोक्थेषु[७] एतौ स्तोत्रियानुरूपौ भवतः ॥क॥

१. तु. वैता ३२, १३-१४. २. तु. अ २०, ३५. ३-३. नास्ति भा[१] A. ४. °त्रावतिरि° भा[१] A. ५. यथा मूको. ६-६. नास्ति वा. ७.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तरौ वा[१] ॥ख॥ ॥२८॥[१]

एतत्प्रत्याम्नायकौ तद्वो गाय (अ २०,७८,१-३), इन्द्राय मद्वने सुतम् (अ २०, ११०,१-३) इत्येतौ वा[१] भवतः ॥ख॥२८॥

आ नूनमश्विना युवम् (अ २०, १३९), तं वां रथम् (अ २०, १४३) इति सूक्ते ॥क॥

स्तोत्रियानुरूपयोरनन्तरम् एते सूक्ते शंसति ॥क॥

[४]पूर्वस्य दशमीं द्वादशीम् उत्तरं च पच्छः[४] ॥ख॥ ॥२९॥[५]

सूक्तयोः पूर्वस्य सूक्तस्य दशमीम् ऋचं द्वादशीं च, उत्तरं सूक्तं तं वा रथम् इति च पच्छः शंसति ॥ख॥२९॥

मधुमतीरोषधीः (अ २०,१४३,८) इति परिधानीया ॥क॥

परिधानीयाग्रहणं समाप्त्यर्थम्[६]। आहावोक्थसंपदौ पर्यासवद्[७] भवतः। स्वरादि तु तार्त्तीयसवनिकं तच्छेषत्वात् ॥क॥

उत्तरा याज्योत्तरा याज्या ॥ख॥ ॥३०॥[८]

इत्यथर्ववेदे वैतानश्रौतसूत्रे चतुर्थोऽध्यायः समाप्तः।

परिधानीयोत्तरा पनाय्यं तदश्विना (अ २०, १४३, ९) इति शस्त्रयाज्या भवति। अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ख॥३०॥

इति कौशिकीये वैतानकल्पे सोमाविस्यस्याऽऽक्षेपानुविधौ चतुर्थेऽध्याये तृतीया कण्डिका

चतुर्थोऽध्यायः समाप्तः ॥

---

१. नास्ति भा[१२] A. २. तु. आश्रौ ९,११,१७; २१; शाश्रौ १५,८,७;१०. ३. नास्ति भा[१] A. ४-४. नास्ति भा[१] A. ५. तु. आश्रौ ९, ११, १६. ६. मात्यार्थे मूको. ७. पर्यायवद् मूको. ८. तु. आश्रौ ९, ११, १६; शाश्रौ १५,८,१३;१७;१८.

अथ पञ्चमोऽध्यायः

[२८]

कामम् अप्रथमयज्ञेऽग्निः ॥१॥[१]

कामम् इच्छया[२]। अप्रथमयज्ञे [३]द्वितीयाद्याहारे। आहारनिमित्तत्वाद्[३] प्रथमयज्ञशब्दस्य। तस्मिन् [४]द्वितीयादिप्रयोगेऽग्निर्भवति। अग्निशब्देन[४] अत्र अग्नेरधिकरणस्थलमुच्यते लक्षणया। ब्राह्मणसंज्ञा[५] चेयम् ॥१॥

समहाव्रते नित्यम् ॥२॥[६]

महाव्रतं स्तोत्रम्। तेन[७] सहितः क्रतुः [८]समहाव्रतः क्रतुस्तस्मिन्[८] समहाव्रते क्रतौ नित्यम् अग्निर्भवति। [९]तत् समहाव्रत एव क्रतावग्निः[९] ॥२॥

फाल्गुन्याम् ॥क॥

पौर्णमास्याम् अग्निकर्मण आरम्भः ॥क॥

[१०]सत्रे पौष्यां तद्गुणानुरोधात्[१०] ॥ख॥ ॥३॥

[११]सत्रे पौष्यां[११] पौर्णमास्याम् अग्निकर्माऽऽरभ्यते सत्रगुणस्य कालस्याऽनुरोधात्। सत्रे हि माघ्याः पुरस्तात् एकादश्याम् (वैता ३१, १) दीक्षणमाम्नातम्। तथा अह्नां विधान्यामेकाष्टकायाम् (वैता ३१,४) इत्यादि ॥ख॥३॥

प्राजापत्ये पशौ समिध्यमानवतीमनु समास्त्वाग्ने (अ २,६) इति जपति ॥४॥[१२]

---

१. तु. काश्रौ १६,१, २-३. २. °च्छया तम् मूको.. ३-३. °हरे आध (धा भा[२]) रनिर्मि (निमि भा[२]) तत्वात् मूको. ४-४. °यादिशब्देन भा[१] A. ५. °णसंज्ञया भा[१]. ६. तु. काश्रौ १२, १, १७; १६,१,२. ७. नास्ति भा[१] A. ८-८. महाव्रतक्तुस्त° भा[२]; महाव्रतस्त° भा[१] A. ९-९ ता कामं व्रत एव च क्रतुगमग्निः मूको. १०-१०. नास्ति भा[१२] A. ११-११. नास्ति भा[१] A. १२. तु. माश ६,२,२, १८-२२; काश्रौ १६, १, ११; ३३-३४; आपश्रौ १६, ७,१-२; वैता १०,१३;१४.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राजापत्येष्टकापशौ सामिधेनीष्वनूच्यमानासु समिध्यमानवतीं समिध्यमानो अध्वरे (ऋ० ३,२७,४) इति एतां सामिधेनीम् ऋचम् अनु पञ्चर्चं सूक्तं[1] (अ २,६) जपति ।

ऊर्ध्वा अस्येतीष्टकापशौ (वैता १०, १३) इति प्रयाजानुमन्त्रणम् उक्तम् ॥४॥

य आत्मदाः (अ ४, २, १) इत्यवदानानाम् ॥५॥[2]

पश्ववदानानां होमम् अनुमन्त्रयते ॥५॥

अष्टम्याम् उखासंभरणीया ॥६॥[3]

फाल्गुन्यां[4] अनन्तरायाम् [5]अष्टम्याम् उखासंभरणप्रयोजनाम्[5] इष्टिम् उखासंभरणीयां क्रियाम् आहुः केचिद् बाह्वृचाः[6] ॥६॥

अष्टगृहीतस्य ऋचा स्तोमम् (कौसू ५,७) इति ॥७॥[7]

अष्टगृहीतस्याऽऽज्यस्य होमम् अनुमन्त्रयते ॥७॥

परि त्वाग्ने (अ ७,७४[७१],१) इति मृत्पिण्डं परिलिख्यमानम् ॥८॥[8]

उखार्थं मृत्पिण्डम् अध्वर्युणा परिलिख्यमानम् अनुमन्त्रयते ॥८॥

पुरीष्योऽसि (तैसं ४, १, ३,२; वैता ५,१४) इत्यभिमृश्यमानम् ॥९॥[9]

मृत्पिण्डम् अनुमन्त्रयते ॥९॥

त्वामग्ने (अ २, ६, ३) इति पुष्करपर्णे निधीयमानम् ॥१०॥[10]

मृत्पिण्डमेव ॥१०॥

आपो हि ष्ठा (अ १, ५,१-४) इति पलाशफाण्टेन[11] अभिषिच्यमानम् ॥११॥[1]

पलाशकषायेण[2] अभिषिच्यमानं मृत्पिण्डम् अनुमन्त्रयते ॥११॥

पृथिवीं त्वा पृथिव्याम् (अ १२, ३, २२; २३) इत्युखां क्रियमाणाम् ॥क॥

यस्याम् अग्निं धारयिष्यन् स्याद् यजमानस्तोम्[3] उखां क्रियमाणाम् [4]अनेन मन्त्रद्वयेनानुमन्त्रयते[4] ॥क॥

पुनःकरण इति भागलिः ॥ख॥ ॥१२॥[5]

नाशादिदोषनिमित्तेन पुनरुखाकरणे भागलिराचार्यः तथाऽनुमन्त्रणं[6] मन्यते ॥ख॥१२॥

तृतीयया पच्यमानाम् ॥१३॥[7]

अग्निः पचन् (अ १२, ३, २४) इति तृतीयया ऋचा पच्यमानाम् अनुमन्त्रयते ॥१३॥

आमावास्येनेष्टिः[8] । दीक्षणीयायां वैश्वानराऽऽदित्ययोश्च ॥क॥[9]

अनन्तरायाम् अमावास्यायां याऽऽमावास्येन कर्मणा इष्टिः दीक्षणीयेष्टिभंवति। तस्यां वैश्वानरद्वादशकपालस्य आदित्यचरोश्च होमौ यथाक्रमं पारिभाषिकाभ्याम्[10] अनुमन्त्रयते। चकारः पूर्वेणाऽऽग्नावैष्णवेन सहाऽन्वाचयार्थः ॥क॥

यदग्ने यानि कानि चित् (अ १९, ६४, ३) इत्युख्ये समिध आधीयमानाः ॥ख॥ ॥१४॥[11]

उखासंतापसंभवे अग्नौ समिध आधीयमाना अनुमन्त्रयते ॥ख॥१४॥

संशितं मे (अ ३,१९) इत्युख्यम् उन्नीयमानम् ॥१५॥[12]

---

१. नास्ति मूको. २. तु. आपश्रौ १६,७, ११. ३. तु. काश्रौ १६,२, १; आपश्रौ १६,१,९. ४. °न्या याः मूको. ५-५. °ष्टम्यां वरण प्रयो° मूको. ६. तु. आश्रौ ४, १, २१; शांश्रौ ९, २२, ७; वाहुतौ भा°. वाहुते भा° A. ७. तु. तैसं ३,१०,१,१; काश्रौ १६,२, ७; आपश्रौ १६, १, ७. ८. तु. काश्रौ १६, २,२३; आपश्रौ १६, ३,१. ९. तु. काश्रौ १६,२,२४-२८; आपश्रौ १६, ३,४. १०. तु. काश्रौ १६,२,२९;३,१; आपश्रौ १६,३,४. ११. °शपाटेन G.

१. तु. काश्रौ १६, ३, १५; आपश्रौ १६, ४, १. २. °शकाष्ठेन भा°; °कष्टेन भा° A. ३. °नस्तां मूको. ४-४. अनेनानु° मूको. ५. तु. काश्रौ १६, ३, २२-२८; ७, ८-११; आपश्रौ १६, ४, ५; ६. ६. संतर्पानु° भी° A. ७. तु. काश्रौ १६; ४; १७-१९; आपश्रौ १६, ४, ५; ६. ८. °स्येनेष्टे G; अमावा° वा पू. ९. तु. काश्रौ १६, ४, २७-२९; आपश्रौ १६, ८, ११. १०. परिभा° मूको. ११. तु. काश्रौ १६,४,३३-४४; आपश्रौ १६,१०, १-५. १२. तु. आपश्रौ १६,१०,७;१२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उख्यम् अग्निम् उत्क्षिप्यमाणम् अनुमन्त्रयते । ऋग्ग्रहणं[1] सूक्तादित्वात्[2] ॥१५॥

आ त्वाऽहार्षम् (अ ६,८७,१) इत्युन्नीतम् ॥१६॥[3]

उख्यमेवोत्क्षिप्तम् अनुमन्त्रयते ॥१६॥

उदुत्तमम् (अ ७,८८[८३],३) इति पाशानुन्मुच्यमानान् ॥१७॥[4]

उखारज्जुपाशान्[5] उन्मुच्यमानान् अनुमन्त्रयते ॥१७॥

संवत्सरमुख्यं बिभर्ति ॥क॥

संवत्सरं यावद् उख्यम् अग्निं यजमानो धारयति ॥क॥

सद्यो वा ॥ख॥ ॥१८॥[6]

सद्यःकालं वा यावद्धारयति ॥ख॥१८॥

आ नो भर (अ ५,७) इति वनीवाहने वाचयति ॥१९॥[7]

वनीवाहने क्रियमाणे सूक्तं यजमानं वाचयति । वनीवाहनम् ऋत्विजां भृत्यर्थं वचनम् ॥१९॥

गर्भो अस्योषधीनाम् (अ ५, २५, ७) इत्युख्यं भस्माऽप्स्वोप्यमानम् ॥२०॥[8]

उख्यं भस्माऽप्सु प्रक्षिप्यमाणम् अनुमन्त्रयते द्वितीयानिर्देशात् ॥२०॥

सह रय्या निवर्तस्व (कौसू ७२, १४) इति द्वाभ्यामुत्समादीयमानम्[9] ॥२१॥[10]

प्रसृतं भस्म आदीयमानं गृह्यमाणम् अनुमन्त्रयते ॥२१॥

१. तु. आश्रौ १,१; १८. २. सूत्रा° भा[1] A. ३. तु. काश्रौ १६, ५, १६; आपश्रौ १६, १०,४. ४. तु. काश्रौ १६, ५, १७. ५. °खा ऋचापा° भा[1] A; ऋच्यपा° भा[2]. ६. तु. काश्रौ १६,६,९; आपश्रौ १६,९,१. ७. तु. काश्रौ १६, ६, २२; आपश्रौ १६, १२,४ प्रभृ. ८. तु. काश्रौ १६, ६,२३; आपश्रौ १६,१२, ११. ९. °नीयमानां वा. १०. तु. काश्रौ १६, ६, ३०; आपश्रौ १६, १२, १२.

पुनस्त्वा (अ १२, २, ६) इत्युख्ये समिध आधीयमानाः ॥२२॥[1]

उख्येऽग्नौ समिध आधीयमाना[2] अनुमन्त्रयते ॥२२॥

दीक्षान्ते वि मिमीष्व (अ १३, १, २७) इति [3]वेद्यग्नि मिमानम्[3] ॥२३॥[4]

दीक्षाणाम् अन्ते वेदिम् अग्निस्थानं च मिमानम् अध्वर्युम् अनुमन्त्रयते । एकवद्भावात् सहानुमन्त्रणम् । कालश्वयर्योऽयं[5] विधिः ॥२३॥

अपेत वीत (अ १८,१,५५) इति गार्हपत्यम् उदुह्यमानम् ॥२४॥[6]

स्वस्थानाद्[7] व्युदुह्यमानम् अनुमन्त्रयते ॥२४॥

अयं ते योनिः (अ ३, २०, १) इति गार्हपत्येष्टका निधीयमानाः ॥२५॥[8]

गार्हपत्यचित्यर्था इष्टका निधीयमाना अनुमन्त्रयते । शालामुखीयोऽयं गार्हपत्यो भाविन्या वृत्त्या ॥२५॥

नमोऽस्तु ते निर्ऋते (अ ६, ६३, २) इति पित्र्युपवीती नैर्ऋतीः ॥२६॥[9]

नैर्ऋत्यां[10] दिशि निधीयन्त इति [11]नैर्ऋत्य इष्टकाः । ता निधीयमाना[11] अनुमन्त्रयते ॥२६॥

यत्ते देवी (अ ६,६३,१) इति शिक्याऽऽसन्दीरुक्मपाशान् नैर्ऋत्यां

१. तु. काश्रौ १६, ७, २; आपश्रौ १६, १२, १३. २. आदीय° मूको. ३-३. °ग्निम् मि° मूको. । वेद्यग्नी मिमानम् इति वा वेद्यग्नि-मानम् (तु. काश्रौ.) इति वा ?G. शोधं प्रस्तावुकः. ४. तु. वैता १५,७; काश्रौ १६, ७,२८; आपश्रौ १६,१७,२; ५; ८; बौश्रौ १०,१९:४. ५. कालन्यर्यो° मूको. ६. तु. काश्रौ १७, १, ३; आपश्रौ १६, १४,१. ७. स्वरानाद् भा[2]; स्वरारनात् भा[1] A. ८. तु. काश्रौ १७, १, ६; ११; आपश्रौ १६, १४, ६. ९. तु. काश्रौ १७, १, २३; आपश्रौ १६,१५,८. १०. नैर्ऋतीः नैर्ऋ° भा[1]. ११-११. नैर्ऋतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रास्तान्[१] ॥२७॥[२]

उखाधिश्रयम् उखाऽऽसन्दीं च रुक्मपाशांश्च नैर्ऋत्यां दिशि प्रतिप्रास्तान्[३] अनुमन्त्रयते ॥२७॥

अनपेक्षमाणा[४] एत्य निवेशनः संगमनः (अ १०, ८, ४२) इति ऐन्द्रया गार्हपत्यम् उपतिष्ठन्ते ॥२८॥[५]

नैर्ऋतीनिधानदेशम् अनपेक्षमाणा एत्य[६] शालामुखीयं गार्हपत्यम् उपतिष्ठन्ते कर्मसंबद्धाः ॥२८॥

प्रायणीयाऽऽदि ॥२९॥[७]

इतः प्रभृति प्रायणीयेष्ट्यादि कर्म प्राकृतं भवति । वैशेषिकं[८] तु वचनात् ॥२९॥

सीरा युञ्जन्ति (अ ३,१७,१-२[a]) इति सीरं युज्यमानम् ॥३०॥[९]

अग्निस्थानकर्षणाय[१०] हलं युगादिभिर्युज्यमानं सपादयर्चाऽनुमन्त्रयते ॥३०॥

लाङ्गलं पवीरवत् (अ ३,१७,३) इति कर्षमाणम् ॥३१॥[११]

सीरं कर्षमाणम् अनुमन्त्रयते ॥३१॥

कृते योनौ (अ ३, १७,२[bcd]) इत्योषधीरावपन्तम् ॥३२॥[१२]

त्रिभिः पादैरोषधीरावपन्तम् अध्वर्युम् अनुमन्त्रयते ॥३२॥

ब्रह्म जज्ञानम् (अ ४,१, १) इति रुक्मं निधीयमानम् ॥३३॥[१३]

[१४]ब्रह्म जज्ञानम् इति[१४] ऋचा रुक्मं निधीयमानम् अनुमन्त्रयते ॥३३॥

---

१. तु. C; प्रास्नात् भा[२ २] A; प्रास्नान् ब्र वा पु; प्रासने G. २. तु. काश्रौ १७,२,३; आपश्रौ १६,१५,८. ३. प्रतिपादिताम् मूको. ४. अनपेक्ष्यमा° वा ब्र. ५. तु. काश्रौ १७, २, ५; आपश्रौ १६, १६, ५. ६. एत्यस्य भा[१]; एत्यस्यधिव्ये A. ७. तु. वैता १३, ३; काश्रौ १७, ३, ६; आपश्रौ १६, १७, १-३. ८. विशेषिकं भा[१]; विशेषकं भा[१] A. ९. तु. काश्रौ १७, २, ७; १०; आपश्रौ १६, १८, ५. १०. °स्थानकर्मणा भा[२]; °स्थापनकर्मणा भा[१] A. ११. तु. काश्रौ १७, २, ११-२०; आपश्रौ १६, १८, ३ प्रभृ. १२. तु. काश्रौ १७, ३, ८; आपश्रौ १६, १९, ११. १३. तु. काश्रौ १७,४,२; आपश्रौ १६, २२, २. १४-१४. नास्ति मूको.

हिरण्यगर्भः (अ ४, २, ७) इति हिरण्यपुरुषम् ॥३४॥[१]

निधीयमानम् अनुमन्त्रयते ॥३४॥

इति वैतानकल्पे पञ्चमेऽध्याये प्रथमा कण्डिका ॥

[२९]

मधु वाताः (कौसू ९१,१) इति कूर्मम् अभ्यज्यमानम् ॥१॥[२]

अक्ष्यमाणम् अनुमन्त्रयते ॥१॥

विष्णोः कर्माणि (अ ७, २७ [२६], ६) इत्युलूखलमुसलं निधीयमानम् ॥२॥[३]

उभयं निधीयमानम् अनुमन्त्रयते ॥२॥

अजो हि (अ ४,१४,१) इत्यजशिरः ॥३॥[४]

[५]ऋचा शिरो[५] निधीयमानम् अनुमन्त्रयते ॥३॥

पूर्वाह्णिकीरुपसदोऽनु चितीश्चिन्वन्ति॥४॥[६]

पूर्वाह्णिकीः घर्मोपसदः[७] अनु चितीश्चिन्वन्त्यध्वर्यवः । उपसद्ग्रहणं घर्मग्रहणार्थम्[८] ॥४॥

वार्त्रहत्याय शवसे (अ २०,१९,१), वि न इन्द्र (अ १, २१,२), मृगो न भीमः (अ ७,८९ [८४],३), वैश्वानरो न ऊतये (अ ६,३५,१) इति चितिं चितिं पुरीषाऽऽच्छन्नाम् ॥५॥[९]

चितिम् अनुमन्त्रयते । वीप्सावचनात्‌॰॰॰न्त्रयते[१०] ॥५॥

---

१. तु. काश्रौ १७, ४, ३; आपश्रौ १६, २२, ३. २. तु. काश्रौ १७,४, ३७; आपश्रौ १६, २५,१. ३. तु. काश्रौ १७, ५,३; आपश्रौ १६, २६, १-४. ४. तु. काश्रौ १७,५, १६; आपश्रौ १७,२७,७;१२. ५-५. नास्ति भा[१] A. ६. तु. काश्रौ १७, १, १; आपश्रौ १६, ३५, ८; १७,१,१;११. ७. घर्मोपसदौ भा[१] A. ८. °ग्रहणात् मूको. ९. तु. काश्रौ १७, ७, १; २; आपश्रौ १६, ३४,६; १७,२,८. १०. यथाक्रमं चतस्रः चितीरनुमन्त्रयते इति पाठः स्यात्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]अग्ने जातान् (अ ७,३५ [३४],१; ३६ [३५],१) इति द्वाभ्यां पञ्चम्यां चितावसपत्नेष्टका निधीयमानाः[1] ॥६॥[2]

[3]अनुमन्त्रयत इति शेषः[3] ॥६॥

एकान्नत्रिंशत्स्तोमभागैः स्तोमभागिकीः ॥७॥[4]

रश्मिरसि इत्यादि वसुकोऽसि (तैसं ४, ४, १, १; काठ १७, ७) इत्यन्तैः एकान्नत्रिंशत्स्तोमभागैः स्तोमभागिकीरिष्टका निधीयमाना अनुमन्त्रयते ॥७॥

त्वामग्ने पुष्करादधि[5] (तैसं ४, १, ३,२; वैता ५, १४) इति गायत्रीः ॥क॥

गायत्र्याख्या इष्टका निधीयमाना अनुमन्त्रयते ॥क॥

अबोध्यग्निः (अ १३, २, ४६) इति त्रैष्टुभीः ॥ख॥

त्रैष्टुभीरिष्टका निधीयमाना अनुमन्त्रयते ॥ख॥

[6]सं समिद् (अ ६, ६३,४) इत्यानुष्टुभीः[6] ॥ग॥

[6]आनुष्टुभीरिष्टका निधीयमाना अनुमन्त्रयते[6] ॥ग॥

अग्निं होतारं मन्ये (अ २०, ६७, ३) इत्यातिच्छान्दसीः[7] ॥घ॥[8]

आतिच्छान्दसीरिष्टका[9] निधीयमाना अनुमन्त्रयते ॥घ॥

गार्हपत्य उक्तम्[10] ॥ङ॥ ॥८॥[11]

अत्र इष्टकासमूहमात्रे गार्हपत्यशब्दः । तत्र शालामुखीयगार्हपत्योक्तम् अयं ते योनिः (अ ३, २०, १) इत्यनुमन्त्रणं करोति[12] गार्हपत्यशब्दसामान्यात् ॥ङ॥८॥

अयमग्निः सत्पतिः (अ ७,६४ [६२],१), येना सहस्रम् (अ ९, ५, १७) इति पुनश्चितौ ॥९॥[13]

१-१. नास्ति भा[1,2] A. २. तु. काश्रौ १७,७, १५; आपश्रौ १७, ३, २. ३-३. नास्ति मूको. ४. तु. गोब्रा २,२, १०; काश्रौ १७, ७,१६; ११,९-११; आपश्रौ १७,३,५. ५. तु. ऋ ६, १६, १३. ६-६. नास्ति भा[1]. ७. °त्यति° मूको. ८. तु. काश्रौ १७, १२, ४-१६. ९. छान्द° मूको. १०. उक्थम् G. ११. तु. वैता २८, २५; काश्रौ १७, १२, १७. १२. नास्ति भा[1]; करोतीति भा[1] A. १३. तु. काश्रौ १७,१२,१८

अयमपि पुनश्चितिशब्द इष्टकासमुदायवचन एव । तस्यां पुनश्चितौ इष्टका निधीयमाना अनुमन्त्रयते ॥९॥

मा नो देवाः (अ ६,५६,१), भवाशर्वौ मृडतम् (अ ११,२,१), यस्ते सर्पः (अ १२,१,४६) इति रौद्रान् ॥१०॥[1]

रौद्रान् होमान् अनुमन्त्रयते ॥१०॥

अश्म वर्म मे (अ ५, १०, १-७) इति परिश्रितः ॥११॥[2]

परिश्रितोऽश्मनोऽनुमन्त्रयते ॥११॥

हवनप्रासनाद् आग्नीध्रः या आपो दिव्याः (अ ४,८,५) इति चितिं परिषिञ्चति ॥१२॥[3]

अर्कपर्णाऽर्ककाष्ठे हवनपात्रे[4] । तयोश्चात्वाले प्रासनात् प्रक्षेपणात्[5] अनन्तरम् आग्नीध्रः चितिम् अग्न्याख्यां परिषिञ्चति ॥१२॥

इदं वा आपः (अ ३, १३, ७), हिमस्य त्वा (अ ६, १०६, ३), उप द्यामुप वेतसम् (अ १८, ३,५), अपामिदम् (अ ६, १०६, २) इति मण्डूकाऽवकावेतसैः[6] दक्षिणादि[7] प्रतिदिशं विकृष्यमाणाम् ॥१३॥[8]

मण्डूकादिभिः दक्षिणादिगादि दिशं दिशं प्रति विकृष्यमाणां चितिं यथासंख्यं मन्त्रैरनुमन्त्रयते ॥१३॥

यो विश्वचर्षणिः (अ १३, २, २६) इत्यौपवसथ्ये षोडशगृहीतार्धस्य[9] ॥क॥

षोडशगृहीतार्धस्य अधिहोमम् अनुमन्त्रयते ॥क॥

---

१. तु. काश्रौ १८, १, १-५; आपश्रौ १७, ११, ३-५. २. तु. काश्रौ १८, १, १-५. ३. तु. काश्रौ १८,१,६;२, १; आपश्रौ १७, १२. ४. हतपात्रे भा[1] A; हतरपात्रे भा[2] ५. प्रतित्याटकात् भा[1] A; प्रतिपाटकात् भा[2]. ६. मण्डूकावकवे° भा.[2] वा पू. ७. दक्षिणादिक् मूको C. ८. तु. काश्रौ १८,२,१०-१२; आपश्रौ १७,१२,७. ९. °तस्यार्धस्य भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स नः पिता जनिता (अ २, १,३) इत्युत्तरार्धस्य ॥ख॥[1] ॥१४॥

षोडशगृहीतोत्तरार्धस्य होमम् अनुमन्त्रयते ॥ख॥१५॥

उदेनमुत्तरं नय (अ ६,५,) इति समिध आधीयमानाः ॥१५॥[2]

अनुमन्त्रयत इति शेषः ॥१५॥

संप्रेषितोऽप्रतिरथं जपति ॥१६॥[3]

अध्वर्युणा संप्रेषितो जपति ॥१६॥

क्रमध्वमग्निना (अ ४, १४, २-५) इति चतसृभिश्चितिम् आरोहन्ति ॥१७॥[4]

कर्मसंबन्धाः ॥१७॥

तां सवितः (अ ७, १६ [१५]) इति समिध आधीयमानाः ॥१८॥[5]

अनुमन्त्रयते इति शेषः ॥१८॥

चत्वारि शृङ्गा (ऋ ४,५८,३; मा १७,९१), अभ्यर्चत (अ ७,८७ [८२], १) इति जपति ॥१९॥[6]

ऋग्द्वयं जपति ॥१९॥

अग्ने अच्छा (अ ३, २०,२-४) इति तिस्रः। अर्यमणं बृहस्पतिम् (अ ३,२०,७;८) इति द्वे, वाजस्य नु प्रसवे (अ ७,७[६],४) इति वाजप्रसवीयहोमान् ॥२०॥[8]

षड्भिर्वाजप्रसवीयाख्यान् होमान् अनुमन्त्रयते ॥२०॥

---

१. तु. काश्रौ १८,३, १२-१३; आपश्रौ १७, १४, १-२. २. तु. काश्रौ १८,३, १४; आपश्रौ १७, १४, ५. ३. तु. अ १९,१३; काश्रौ १८, ३, १७; आपश्रौ १७,१४,७. ४. तु. काश्रौ १८,४, १; आपश्रौ १७,५, १. ५. तु. काश्रौ १८,४, ६; आपश्रौ १७, १५, ४-६. ६. तु. काश्रौ १८, ४, २५-२६. ७-७. नास्ति पू. ८. तु. काश्रौ १८, ५, ४; आपश्रौ १७, १९, १-३.

सं मा सिञ्चन्तु (अ ७, ३४ [३३], १) इत्यभिषिच्यमानं वाचयति ॥२१॥[1]

अभिषिच्यमानं यजमानं वाचयति ।२१॥

ये भक्षयन्तः (अ २, ३५), एतं सधस्थाः (अ ६, १२३,१-२) इति द्वे। येना सहस्रम् (अ ९,५,१७) इति वैश्वकर्मणहोमान् ॥२२-२३॥[2]

सूक्तेन, तिसृभिर्ऋग्भिः वैश्वकर्मणाऽऽख्यान् होमान् अनुमन्त्रयते ॥२२-२३॥

इति वैतानकल्पे पञ्चमेऽध्याये द्वितीया कण्डिका ॥

[३०]

अग्निचित् सोमाऽतिपूतः सोमवामी सौत्रामण्याऽभिषिच्यते ॥१॥[3]

एतेषु त्रिषु निमित्तेषु सौत्रामण्याख्येनाऽभिषेकेण यजमानोऽभिषिच्यते ॥१॥

[4]उत्क्रान्तः श्रेयसः श्रैष्ठ्यकामश्च[4] ॥२॥[5]

[6]अपक्रान्तश्रीः अपक्रान्तयशाः[6] श्रैष्ठ्यकामश्च सौत्रामण्याऽभिषिच्यते ॥२॥

नाऽनिष्टसोमः ॥३॥[7]

एतेष्वपि निमित्तेषु 'अनिष्टसोमो नाऽभिषिच्यते' ॥३॥

आदित्येष्टिः ॥४॥[9]

एतस्याम् अदितिर्द्यौः (अ ७, ७ [६] १,) इति चरुहोमान् अनुमन्त्रयते ॥४॥

ऐन्द्रः पशुः ॥५॥[10]

---

१. तु. काश्रौ १८,५,९-१४; आपश्रौ १८, १९, ८-१०. २. तु. वैता ९, ७; माश ९,५,१, ४२-५२; आपश्रौ १७, १४, १. ३. तु. काश्रौ १९, १, २; आपश्रौ १७,२४,१;१९,४, ११. ४-४. श्रेयसा श्रै° वा; °न्त श्रेयसी श्रै° पु°; °न्त (न्तः मा¹) श्रेयसा श्रै° भा¹² A; °न्तश्रेया (°श्रेयान्?) °कामश्च इति ?C. ५. तु. काश्रौ १९, १, ३-४; आपश्रौ १९, ४, ११-१२. ६-६. अपक्रांतश्री अपक्रांत्यशरः मूको. ७. तु. काश्रौ १९, १,२; माश १२, ८, २,२. ८-८. °निष्टहोमाभिषि° मूको. ९. तु. काश्रौ १९, १, ५; आपश्रौ १९, ५, ५. १०. तु. काश्रौ १९, १, १६; आपश्रौ १९, ५, ३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतस्मिन्[1] पारिभाषिकेणाऽवदानहोमान्[2] अनुमन्त्रयते ॥५॥

रसप्राशन्या[3] या बभ्रवः (अ ८, ७) इत्योषधीभिः सुरां संधीयमानाम् ॥६॥[4]

त्वे क्रतुम् (अ ५, २, ३) इति रसप्राशन्या, [5]या बभ्रवः इति[5] सूक्तेन यजुर्वेदविहिताभिः ओषधीभिः[6] सुरां संधीयमानाम् अनुमन्त्रयते ॥६॥

वायोः पूतः (अ ६,५१) इति सोमाऽतिपूतस्य पाव्यमानाम् ॥७॥[7]

सोमविरिक्तस्य यजमानस्य सुरां पाव्यमानाम् अनुमन्त्रयते ॥७॥

सोमवामिनः प्राक् सोमः इति विकृतेन ॥८॥[8]

[9]सोमच्छर्दिनो[9] यजमानस्य [10]पाव्यमानां सुरां[10] वायोः पूतः पवित्रेण प्राक् सोमो अति द्रुतः[11] (अ ६, ५१, १) इत्येवं विकृतेन अनुमन्त्रयते ॥८॥

अध्वर्यो । अद्रिभिः सुतं[12] सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे (ऋ ९,५१,१) इत्यध्वर्युं पावयन्तम् ॥९॥[13]

सुरां पावयन्तम् अध्वर्युम् अनुमन्त्रयते ॥९॥

गृहीतेष्वाज्येषु कुविदङ्ग यवमन्तः[14] (अ २०, १२५, २) इति पयोग्रहान् गृह्णन्तम् ॥१०॥[15]

अध्वर्युम् अनुमन्त्रयते ॥१०॥

वपामार्जनात् युवं सुराममश्विना (अ २०, १२५, ४-७) इति

---

१. तस्मिन् भा[1] A. २. परिभाषिकेणाप्रदा° मूको. ३. प्राशिन्या भा[1 2] A. ४. तु. कौसू २१,२१; काश्रौ १९,१, २०; २१; आपश्रौ १९,५,८; ६, ५. ५-५. नास्ति मूको. ६. मास्ति मूको. ७. तु. काश्रौ १९,२,१०; आपश्रौ १९, १, १९. ८. तु. काश्रौ १९, २, ११; आपश्रौ १९, ६, १२. ९-९. °मं छर्दयतः A. १०-१०. पाव्यमानभ्यस्य मूको. ११. =मासं १९, ३; आपश्रौ १९, १, १९; अतिसुतः इति मासं १०, ३१; अतिद्रवः मूको. १२. सुते वा पु. १३ तु. काश्रौ १९, २,१३. १४. °मन्तः, यवं चित् वा. १५. तु. काश्रौ १९, २, १४; आपश्रौ १९, ६,१५.

चतसृभिः पयःसुराग्रहाणाम् ॥क॥

पयःसुराग्रहाणां होमान् अनुमन्त्रयते ॥क॥

सौराणां न भक्षणम् ॥ख॥ ॥११॥

सुराग्रहाणां न भक्षणं मन्यन्ते ॥ख॥११॥

आश्विनस्यैके—

यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।

इमं तं शुक्रं मधुमन्तमिन्दुं सोमं राजानमिह भक्षयामि (शांश्रौ १५, १५, १३) इति ॥१२॥[1]

आश्विनस्य सुराग्रहस्य एके शाखिनो[2] भक्षणं न मन्यन्ते । एके मन्यन्ते । तत्र मन्त्रविधिः ॥१२॥

पुनन्तु मा (अ ६,१९), गिरावरगराटेषु (अ ६,६९), यद्गिरिषु (अ ९, १, १८) इति शतातृण्णाम् आसिच्यमानाम् ॥१३॥[3]

शतच्छिद्रां स्थालीं दक्षिणस्याग्नेरुपरि सुरयाऽऽसिच्यमानाम् अनुमन्त्रयते ॥१३॥

उदीरताम् (अ १८,१,४४-४५) इति द्वे; बर्हिषदः पितरः (अ १८, १,५१), उपहूता नः पितरः (अ १८,३,४५), अग्निष्वात्ताः (अ १८, ३, ४४) इति पञ्च जपति ॥१४॥[4]

प्रासेकाऽनन्तरं पञ्च[5] मन्त्रान् जपति ॥१४॥

आश्विनसारस्वतैन्द्रपशूनाम् ॥क॥

अवदानहोमान् पशुपुरोडाशहोमांश्च पारिभाषिकैरनुमन्त्रयते ॥क॥

वनस्पतियागाद् अभिषिच्यमानम् ओं भूर्भुवःस्वर्जनदोम् इति वाचयति ॥ख॥ ॥१५॥[6]

---

१. तु. काश्रौ १९. ३, १३; आपश्रौ १९, ८, १०. २. साक्षिणो मूको. ३. तु. काश्रौ १९,३,२३; आपश्रौ १९,३, ६-७. ४. तु. काश्रौ १९, ३, २४; आपश्रौ १९,३,८-१०. ५. अष्टौ मूको. ६. तु. काश्रौ १९, ४,१४; आपश्रौ १९, ६, १३-१०-[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनस्पतियागाद् ऊर्ध्वं वसावशेषेणाऽभिषिच्यमानं यजमानं[1] वाचयति ॥ख॥१५॥

सामगानाय प्रेषितः—

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।

येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि (कौ १, २५८)

इत्यैन्द्र्यां बृहत्यां संशानानि[2] गायति ॥१६॥[3]

सामगानाय प्रेषितः इत्यादि संशानानि गायतीत्यन्तं सूत्रम् । सामगानार्थम् अध्वर्युणा प्रेषितो ब्रह्मा बृहदिन्द्राय [4]गायत इत्येतस्याम् ऋचि[4] ऐन्द्र्यां बृहत्यां पुराणकल्पदृष्ट्या गीत्या संशानानि सामानि गायति । संशानानीति बहुवचनं प्रतिपन्निधनबहुत्वात् ॥१६॥

सं त्वा हिन्वन्ति धाइताइभी३ः[5], सं त्वा रिणन्ति[6], सं त्वा शिशन्ति[7],

सं त्वा ततक्षुः इति प्रतिपदः ॥१७॥[8]

सं त्वा हिन्वन्तीत्यादि प्रतिपदः इत्यन्तं सूत्रम् । एताश्चतस्रः प्रतिपदोऽस्याम् ऋचि भवन्ति । पादं पादं प्रतिपादम् । अन्वर्थिका चेयं संज्ञा । तेन प्रतिपादं यथासंख्यम् आदितो भवन्ति[9] निधनस्य वक्ष्यमाणत्वात् । धाइताइभी३ः[10] इति सर्वासां समानोऽनुषङ्गः । सं त्वा इत्यादिसामान्यात् ॥१७॥

संश्रवसे विश्रवसे सत्यश्रवसे श्रवसे इति निधनानि ॥१८॥[11]

संश्रवसे इत्यादि निधनानीत्यन्तं सूत्रम् । निधनमन्त्राः । अस्यामेव ऋचि संश्रवसे इत्यादीनि पदानां निधनानि भवन्ति । निदर्शनम्— सं त्वा हिन्वन्ति धाइताइभी३ः बृहदिन्द्राय गायत संश्रवसे । सं त्वा रिणन्ति धाइताइभी३ः मरुतो

1. नास्ति भा[1] A. 2. संश्यानानि वा पू. 3. तु. काश्रौ १९, ५, १-२; लाश्रौ ५, ४, १६; द्राश्रौ १३, ४, ९. ४-४. गायतेतस्यामृक् मूको. ५. ध्मइताविभिः वा. ६. ऋण° पू G. ७. यनि. लाश्रौ; शिप° वा पू G. ८. तु. कौ १,२५८ (यत्र सामगीतिः द्र.); लाश्रौ ५,४,१८; ८, ८, १०-१३; द्राश्रौ १३,४,१२. ९. भवति भा[1] A. १०. धायितायिभिः पू; धा३यि° G. ११. तु. काश्रौ १९,५, ३; लाश्रौ ५,४,१९; द्राश्रौ १३,४,१३.

वृत्रहन्तमं विश्रवसे । सं त्वा शिशन्ति धाइताइभी३ः येन ज्योतिरजनयन्न् ऋतावृधः सत्यश्रवसे । सं त्वा ततक्षुः धाइताइभी३ः देवं देवाय जागृवि श्रवसे ॥१८॥

संजित्यै विजित्यै सत्यजित्यै जित्यै इति क्षत्रियस्य ॥क॥

क्षत्रियजातीयस्यैतानि निधनानि भवन्ति ॥क॥

संपुष्ट्यै विपुष्ट्यै सत्यपुष्ट्यै पुष्ट्यै इति वैश्यस्य ॥ख॥ ॥१९॥[1]

वैश्यजातीयस्य यजमानस्यैतानि निधनानि भवन्ति ॥ख॥१९॥

सर्वे निधनम् उपयन्ति ॥२०॥

संश्रवसे इत्यादि यथावर्णं कर्मसंबद्धा गायन्ति ॥२०॥

बर्हिर्होमाद् अवभृथः ॥२१॥[2]

बर्हिर्होमाद् अनन्तरम् अवभृथो भवति ॥२१॥

तस्मिन्नवभृथे वैशेषिकम् आह —

यद्देवाः[3] (अ ६,११४) इति मासरकुम्भं प्लाव्यमानम् ॥२२॥[4]

मासरकुम्भं सुरास्रावशेषकुम्भम् अप्सु विप्लाव्यमानम् अनुमन्त्रयते ॥२२॥

द्रुपदादिव (अ ६,११५,३) इति वासः ॥२३॥[5]

विप्लाव्यमानम् अनुमन्त्रयते ॥२३॥

मैत्रावरुण्यामिक्षेष्टिः ॥२४॥[6]

मित्रावरुणदेवत्यया आमिक्षया इष्टिर्भवति । तस्यां होमम् अनुमन्त्रयते ॥२४॥

इन्द्राय वयोधसे पशुः ॥२५॥[7]

भवतीति शेषः । तस्मिन्नवदानहोमम् अनुमन्त्रयते ॥२५॥

१. तु. काश्रौ १९,५,३-५; लाश्रौ ५,४,१९; द्राश्रौ १३, ४, १२. २. तु. काश्रौ १९,५,११; आपश्रौ १९,१०,३. ३. यद्देवा देवहेडनं वा. ४. तु. काश्रौ १९, ५, १३; आपश्रौ १९,१०,४ [तु. १९,४,७]. ५. तु. काश्रौ १९, ५, १६; आपश्रौ १९, १०, ५. ६. तु. काश्रौ १९, ५,२१. ७. तु. काश्रौ १९,५,२२; आपश्रौ १९, १०, ८.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदित्येष्टिः ॥२६॥[१]

तस्याम् उक्तान्[२] होमान् अनुमन्त्रयते ॥२६॥

दूरे चित्सन्तम् (अ ३,३,२) इति प्रणवान्तया तानेन मन्त्रोक्तम् उपतिष्ठन्ते 'मन्त्रोक्तम् उपतिष्ठन्ते'[३] ॥२७॥

इत्यथर्ववेदे वैतानश्रौतसूत्रे पञ्चमोऽध्यायः समाप्तः ॥

मन्त्रोक्तम् इन्द्रं तानस्वरेण कर्मसंबद्धा उपतिष्ठन्ते । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥२७॥

इति कौशिकीये वैतानकल्पे सोमादित्यस्याऽऽक्षेपानुविधौ

पञ्चमेऽध्याये तृतीया कण्डिका

पञ्चमोऽध्यायः समाप्तः ॥

---

१. तु. काश्रौ १९,१,५; आपश्रौ १९,१०,१०. २. तु. वैता ३०,४ । ३-३. नास्ति भा[१२] A G.

अथ षष्ठोऽध्यायः

[३१]

माघ्याः पुरस्तादेकादश्यां सप्तदशावराः सत्रमुपयन्तो ब्राह्मणोक्तेन दीक्षेरन् ॥१॥[१]

सत्रं गवामयनादि उपयन्तः प्रारभमाणाः सप्तदशावराश्चतुर्विंशतिपरमाः माघ्याः पौर्णमास्याः पुरस्तादेकादश्यां ब्राह्मणोक्तेन[२] दीक्षाक्रमे कर्तृनियमेन[३] दीक्षेरन् । ब्राह्मणे हि अयं वै यज्ञो योऽयं पवते (गोब्रा १, ४, १) इत्यादिना दीक्षाक्रमे कर्तृनियम उक्तः । लाघवार्थं च ब्राह्मणोक्तवचनम् । अध्वर्युकर्तृत्वाच्च व्याख्यायते ॥१॥

इष्टप्रथमयज्ञाः ॥क॥

सर्वे आहारनिमित्ताः । अतस्तेन प्रथमयज्ञेनेष्टवन्तः[४] सत्रम् उपयन्ति इति सप्तदशावरा दीक्षेरन् ॥क॥

गृहपतिर्वा ॥ख॥ ॥२॥[५]

गृहपतिरेव वा इष्टप्रथमयज्ञो भवति । अन्येष्वनियमः ॥ख॥२॥

तस्याऽग्नौ समोप्याऽग्नीन् प्राजापत्येन यजन्ते ॥३॥[६]

तस्य गृहपतेरग्नावन्ये सत्रिणः स्वान् स्वान् अग्नीन् यथाक्रमं समोप्य प्राजापत्येनेष्टकापशुना यजन्ते । सत्रधर्माग्न्यङ्गस्येष्टकापशोरुद्देशोऽग्नेर्नियमार्थः । तेन महाग्नताऽभावेऽपि भवत्येवाऽग्निः ॥३॥

अह्नां विधान्याम् एकाष्टकायाम् अपूपं चतुःशरावं पक्त्वा प्रातरेतेन कक्षम् उपोषेत् अयं नो नभसस्पतिः (अ ६, ७९,१) इति

---

१. तु. काश्रौ १३. १, २-१०; आपश्रौ २१, १५, ४-६; [तु. बौश्रौ १६, १३; आपश्रौ २१, ४, ३]. २. °क्ते मूको. ३. °मे मूको. ४. °यज्ञेष्वंतः भा[१]. ५. तु. आपश्रौ २१,२,१. ६. तु. माश ४,६,८,३; काश्रौ १२, १, १५-१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रोक्तदेवताभ्यः[1] संकल्पयन् ॥४॥[2]

अष्टां विधान्यामित्यादि संकल्पयन्नित्यन्तं सूत्रम् । सत्रस्याष्टां विधानी[3] माघकृष्णाष्टमी एकाष्टका । सा हि द्वादशानां दीक्षाणां पुरस्ताद् आग्रहायणीयाद् अष्टां विधाने भवति । तस्याम् अष्टां विधान्याम् एकाष्टकायाम् अपूपं चतुःशरावं पक्त्वा प्रातःकाल एव एतेनाऽपूपेन सह कक्षं तृणानां समूहम् उपोषेद् उपदहेत् । किं च[4] अग्निवाय्वादित्येभ्यो मन्त्रोक्तदेवताभ्यः संकल्पं कुर्वस्तृचेनोपदहेत्[5] । शरावो निरङ्गुष्ठो हस्तः — निरङ्गुष्ठः शरावः स्यात् साङ्गुष्ठः प्रसृतः स्मृतः इति वचनात् ॥४॥

यदि दहति पुण्यसमं भवति[6], अथ न दहति पापसमं भवति ॥५॥[7]

एतेन अपूपं सकक्षं[8] यद्यग्निर्दहति ततो दीर्घसत्रम् अविघ्नेन समाप्तिं यास्यति, न चेद् दहति विघ्नम् उत्पत्स्यत इति विद्यात् । विज्ञानम् अप्येतत् क्रत्वङ्गत्वेन । एकाष्टकायाः प्रातःकाल एवैतत् कृत्वा ततोऽन्यत् क्रतुसंबन्धं कर्म करोति ॥५॥

अथ गवामयनम् ॥६॥

[9]सत्रसामान्येन धर्मकालविशेषाधिकारार्थं[9] सूत्रम् । गवामयनम् इति सांवत्सरिकस्य सत्रस्य प्रायणीयाद्युदयनीयान्तस्य नामधेयम् ॥६॥

प्रायणीयश्चतुर्विंशम्[10] अभिप्लवाश्चत्वारः पृष्ठ्य इति प्रथमो मासः ॥७॥[11]

एतस्मिन् गवामयनाऽऽख्ये सत्रे द्वादशस्वपि मासेषु [12]प्रायणीयाद्यहःक्लृप्तिः[12] । तत्र प्रायणीयाऽऽख्य एकाहः । चतुर्विंशाऽऽख्यो द्वितीयम् । षडहा

1. देवताभ्यां वा G. 2. तु. गोब्रा २, ४, ९; तैसं ३, ३, ८, ४-६; आपश्रौ १३,२४,१८; बौश्रौ १४,१२; १६,१३. 3. विधीय मूको. 4. नास्ति भा[1] A. 5. तु. अ ६, ७९,१-३. 6. नास्ति वा पू. 7. तु. गोब्रा २,४, ९; तैसं ३,३,८, ५. 8. सकल्कं भा[1] A. 9-9. सत्रसाम्नोऽ (न्ये भा[1] A) न्येन धर्मान् कात्र विशेषाधिका° मूको. 10. °यणीयचतु° G. 11. तु. ऐब्रा ४,१२; काश्रौ १३, २,२-३; आपश्रौ २१, १५, ८-११. 12-12. यनि भा[2]; चतुर्विंशेषु तप्तिः A; °शेषु क्रमिः भा[1].

अभिप्लवाऽऽख्याश्चत्वारः । तथा पृष्ठ्याऽऽख्यः षडह एकः । एवं द्वात्रिंशता प्रथमो मासो भवति ॥७॥

एवं चत्वारः प्रायणीयचतुर्विंशवर्जम् ॥८॥[1]

एवमनेन प्रकारेण द्वितीयतृतीयचतुर्थपञ्चमाश्चत्वारो मासा भवन्ति । प्रायणीयचतुर्विंशाहर्द्वयं वर्जयित्वा । तेन चत्वारस्त्रिंशिनो[2] भवन्ति ॥८॥

त्रयोऽभिप्लवाः पृष्ठ्योऽभिजित्स्वरसामान इति षष्ठः ॥९॥[3]

तेन चत्वारः षडहाः, अभिजिदाख्य एकाहः, त्रयः स्वरसामाऽऽख्या एकाहा इति षष्ठो मासोऽष्टाविंशी भवति ॥९॥

अतिरिक्त आत्मा विषुवान् ॥१०॥[4]

विषुवान् एकाहः संवत्सरांऽशभूतः पक्षद्वयाऽतिरिक्तो मध्ये भवति ॥१०॥ अस्य विषुवतः षण्मासपरिमितं पूर्वपक्षम् उक्त्वाऽधुनोत्तरपक्षम् आह—

आवृत्त उत्तरः पक्षः ॥११॥[5]

तस्य विषुवतः उत्तरो द्वितीयः षण्मासाऽऽख्य आवृत्तः । विषुवन्तम् [6]अन्वावृत्तो भवति[6] । [7]पूर्वपक्षेऽहःक्लृप्तिः प्रतीता[7] एवं चत्वारः (वैता ३१, ८) स्वरसाम्नां प्रथमः तृतीयः, तृतीयः प्रथमो भवति । पृष्ठ्याभिप्लवावेव तु षष्ठादिप्रथमान्तौ । [8]गवायुषोः ज्योतिषस्त्वपूर्वत्वाद्[8] अनावृत्तत्वम् । दशरात्रस्योर्ध्वस्तोमत्वाद् अनावृत्तत्वमेव ॥११॥

स्वरसामानो विश्वजित्पृष्ठ्योऽभिप्लवाश्चत्वार इति सप्तमः ॥१२॥[9]

आवृत्त उत्तरः पक्षः इति वचनात् आवृत्ताः स्वरसामानः, आवृत्तो[10] विश्वजिदेकाहः, आवृत्तः पृष्ठ्यः, आवृत्ता अभिप्लवाश्चत्वारः । एवं चतुस्त्रिंशी सप्तमो

1. तु. काश्रौ १३, २, ४; आपश्रौ २१, १५, १२. 2. °रत्रिंशतो मूको. 3. काश्रौ १३, २, ५-९; आपश्रौ २१, १५, १४. 4. तु. काश्रौ १३, २, ९; आपश्रौ २१,१५,१६. 5. तु. आश्रौ ११,२,५; काश्रौ १३, २, १५; आपश्रौ २१, १५, १९. 6-6. अस्यावृत्तो (°तो भा[1] A.) भवन्ति मूको. 7-7. °पक्षोऽहःक्लृप्तिः पवीतः भा[1] A; °परीतः भा[2]. 8-8. गवायुषि ज्योत्स्त्वपू° मूको. 9. तु. काश्रौ १३, २,१४; आपश्रौ २१,१५,२०-२३. 10. नास्ति मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासः। [1]स्वरसाम्नां प्रदेशादस्वरसाम्नामप्यावृत्तवोक्ता[1] भवति। सप्तमादिसंख्यावचनं संवत्सराभिप्रायेण ॥१२॥

एवं चत्वारः स्वरसामविश्वजिद्वर्जम् ॥१३॥

एवम् अनेन प्रकारेण अष्टमनवमदशमैकादशाश्चत्वारो मासा भवन्ति स्वरसाम्नस्त्रीन् विश्वजितं च वर्जयित्वा। एवं त्रिंशिन[2] एते भवन्ति ॥१३॥

अभिप्लवौ गवायुषी दशरात्र ऊर्ध्वस्तोमो महाव्रतम् उदयनीय इति द्वादशः ॥४१॥[3]

आवृत्तौ अभिप्लवौ, अनावृत्ते[4] गवायुषी। अनावृत्तो दशरात्र ऊर्ध्वस्तोमत्वविधानात्। महाव्रतम् एकाहः। उदयनीयश्च एकाह इति द्वादशो मासोऽष्टाविंशी[5] ॥१४॥

तदेतच्छ्लोकोऽभिवदति —

द्वावतिरात्रौ षट्शतमग्निष्टोमा द्वे विंशतिशते उक्थ्यानाम्।
द्वादश षोडशिनः, षष्टिः षडहा वैषुवतं च इति ॥१५॥[6]

तदेतत् संवत्सरस्याऽह्नां क्लृप्तिविधानं संस्थाऽभिधानैर्ब्राह्मणे पठितः श्लोकोऽभिवदति —

द्वावतिरात्रावित्यादि। प्रायणीयोदयमीयौ आद्यन्तावतिरात्रौ द्वावतिरात्राविति।

द्वावतिरात्रौ [२] इति—प्रायणीयोदयमीयौ आद्यन्ताऽतिरात्रौ द्वावतिरात्राविति।

षट्शतम् [१०६] अग्निष्टोमाः इति—आद्यन्ताऽग्निष्टोमोऽभिप्लवः। अभिप्लवाश्चत्वारिंशत् [८०]। आद्यग्निष्टोमः पृष्ठ्यः[7]। पृष्ठ्या द्वादश [१२]। दशरात्र्या [१०] सह द्व्यधिकं शतम् [१०२]। अभिजिद्, विश्वजिद्, दशमम् अहः, महाव्रतम् इति चतुर्भिः [४] सह षट्शतम् [१०६] अग्निष्टोमाः इति।

द्वे विंशतिशते [२४०] उक्थ्यानाम् इति—[8]विंशतिः शतं च, द्वे विंशतिशते[8]।

1-1. स्वरसामात् प्रदेशादहसस्वहानामाप्यावृ° भा[2]; स्वसामा आदेशादहसस्वहानामाप्यावृ° भा[1] A. 2. त्रिंशत् भा[1] A; त्रिसप्त भा[2]. 3. तु. गोब्रा १, ४, ९-१०; काश्रौ १३, २, १८-२१; आपश्रौ २१, १६, १-४. 4. अनावृत्तौ मुको. 5. मासष्टद्वासी भा[1] A; मासष्टद्वाँ भा[2]. 6. तु. गोब्रा १,५,२३. 7. नास्ति मूको. 8. एवत्या मूको. 9-9. नास्ति भा[2]; विंशतिशतं च द्वे विंशते मूको

मध्योक्थ्योऽभिप्लवः [१६०]। प्रथमचतुर्थवर्जं पृष्ठ्यः [४८]। [सप्तमं चासप्तु][1] द्वे शते अष्टाविंशत्यधिके [२२८]। चतुर्विंशम् अहः, षट् स्वरसामानः, गवायुषी, छन्दोमास्त्र्यहाश्चेति[2] द्वादश [१२]। एवं ते[3] द्वे विंशतिशते [२४०] उक्थ्यानाम् इति।

द्वादश [१२] षोडशिनः इति— पृष्ठ्यानां चतुर्थाः द्वादश षोडशिनः इति।

षष्टिः [६०] षडहाः [३६०] इति— [4]प्रायणीयचतुर्विंशमिति अभिजिद् विश्वजिद् गवायुषी इति षडहः तथा स्वरसामादिषडहः छन्दोमत्र्यहादिषडह एवं त्रयः। सप्तपञ्चाशता† सह षष्टिः। षष्टिः षडहाः[4] इति। उभयोः षण्मासपक्षयोर्मध्यसंवत्सराऽऽगतम्[5] अतिरिक्तम् अहर्विषुवान् इति ॥१५॥

चतुर्विंशे इन्द्रमिद्गाथिनो बृहत् (अ २०, ३८, ४-६) इत्याज्यस्तोत्रियः ॥क॥[6]

गवामयनस्य द्वितीयेऽहनि प्रातःसवने [7]एष स्तोत्रियो भवति[7] आज्यस्तवात्[8] ॥क॥

इन्द्रा याहि चित्रभानो (अ २०, ८४) इति वा ॥ख॥ ॥१६॥

...स्पष्टार्थः[9] ॥ख॥१६॥

आभिप्लविकांस्तृतीयादीन् स्तोत्रियान् आवपते ॥१७॥[10]

इन्द्रो दधीचो अस्थभिः (अ २०, ४१), वाचमष्टापदीमहम् (अ २०, ४२), भिन्धि विश्वा अप द्विषः (अ २०, ४३) इत्येतांस्तृतीयादीन् स्तोत्रियान् आवापस्थान आवपते। सांवत्सरिकेष्वारम्भणीयाया ऊर्ध्वम् आवापस्थानं परिभाषितम्। व्यन्तरिक्षमतिरत् (अ २०, २९,२) इति पर्यासश्च (वैता ३५,११) प्रत्याम्नायकः[11] ॥१७॥

अभि प्र वः सुराधसम् (अ २०, ५१,१-२), प्र सु श्रुतं सुराधसम्

1. सह विंशत्येति प्रतीयते। सप्तमं वा; सप्तु भा[1]. 2. छन्दो मन्त्रा च स्तुति मूको. 3. त्ये भा[1] A. 4-4. नास्ति A; † सप्तपञ्चाशत् मूको. 5. °राशतम् मूको. 6. तु. आश्रौ ७, २, ३; शांश्रौ १२, १, ३. 7-7. एतास्तोत्रिया भवन्ति भा[1] A. 8. आज्यसत्रात् मूको. 9. °र्थः स्त्री स्तोत्रियानुरूपः भा[2]; स्त्री स्तोत्रियोऽनुरूपः भा[1] A. 10. तु. आश्रौ ७, २, ३. 11. पर्यायिकः भा[1] A, प्रत्याम्नाय० भा[2]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अ २०,५१,३-४) इति पृष्ठस्तोत्रियानुरूपौ बार्हतौ प्रगाथौ ॥क॥

पृष्ठशब्दान्माध्यन्दिन एतौ स्तोत्रियानुरूपौ बार्हतौ प्रगाथौ भवतः। एवं बार्हतानां स्तोत्रियानुरूपाणां प्रग्रथनम्[1] (वैता २२,९) इत्यादिष्टं प्रग्रथनम्[1] ॥क॥

मा चिदन्यद्वि शंसत (अ २०, ८५,१-२), यच्चिद्धि त्वा जना इमे (अ २०,८५,३-४) इति वा ॥ख॥ ॥१८॥[2]

एतौ वा पृष्ठस्तोत्रियानुरूपौ बार्हतौ प्रगाथौ भवतः ॥ख॥१८॥

अस्मा इदु प्र तवसे तुराय (अ २०, ३५) इत्यहीनसूक्तम् आवपते ॥१९॥[3]

कन्नव्यो अतसीनाम् (अ २०, ५०, १; वैता ३५, १२) इति प्रत्याम्नायकात् सामप्रगाथादनन्तरम् ब्रह्मणा ते ब्रह्मयुजा युनज्मि (अ २०,८६) इति व्याख्याता[4] आरम्भणीया (वैता ३५,१३)। तस्या अनन्तरमेतत् सूक्तम् आवपते। अहीन-सूक्तसंज्ञाकरणं प्रदेशेषु व्यवहारार्थम् ॥१९॥

अभिजिति विषुवति विश्वजिति महाव्रते च ॥क॥

अभिजिदादिषु चतुर्ष्वहःसु च अहीनसूक्तम् आवपते ॥क॥

य एक इद्विदयते (अ २०, ६३, ४-६), य इन्द्र सोमपातमः (अ २०, ६३,७-९) इत्युक्थस्तोत्रियानुरूपौ ॥ख॥ ॥२०॥

उक्थशब्दात् तृतीयसवने एतौ स्तोत्रियानुरूपौ भवतः ॥ख॥२०॥

अभिप्लवे आ याहि सुषुमा हि ते (अ २०,३८) इति षड् आज्यस्तोत्रिया आरम्भणीयापर्यासवर्जम् ॥२१॥[5]

अभिप्लवे[6] षडहे आ याहि सुषुमा हि ते इत्यादयो[7] यथाक्रमं षड् आज्यस्तोत्रिया भवन्ति। पाठक्रमात् इन्द्रं वो विश्वतस्परि; व्यन्तरिक्षमतिरत् (अ २०, ३९, १-२) इत्येतयोः प्रयोगे प्राप्ते[8] प्रतिषेधमाह—आरम्भणीयापर्यासवर्जम् इति। तेन आ याहि सुषुमा हि ते (अ २०,३८,१-३), इन्द्रमिद्गाथिनो बृहत् (अ २०,३८,४-६),

---

१. प्रग° मूको. २. तु. आश्रौ ७,४,३. ३. तु. आश्रौ ७,४,८. ४. व्याख्यं मूको. ५. तु. आश्रौ ७, २,३; शांश्रौ १२, १, ४. ६. पर्यासवर्जम् अभि° मूको. ७. इत्युक्ते इत्या° मूको. ८. तु. वैता ३५,१०;११.

इन्द्रेण सं हि दृक्षसे (अ २०, ४०); इन्द्रो दधीचो अस्थभिः (अ २०, ४१), वाचमष्टापदीमहम् (अ २०, ४२), भिन्धि विश्वा अप द्विषः (अ २०, ४३) इत्यन्ता[1] भवन्ति श्वःस्तोत्रियानुरूपाः[2] ॥२१॥

वार्त्रहत्याय शवसे (अ २०, १९, १-३), शुष्मिन्तमं न ऊतये (अ २०,२०,१-३), आ तू न इन्द्र मद्र्यग् (अ २०, २३,१-३), उप नः सुतमा गहि (अ २०,२४,१-३), यदिन्द्राहं यथा त्वमीशीय (अ २०, २७,१-३), अपामूर्मिर्मदन्निव (अ २०,२८,४;२९,१-२); [3]इति तृचान्[3] आवपते[4] ॥२२॥

अभिप्लवे षडह एतान् तृचान् यथाक्रमम् इन्द्रं वो विश्वतस्परि (अ २०, ३९, १) इत्यारम्भणीयाया अनन्तरम् आवपते ॥२२॥

तं वो दस्ममृतीषहम् (अ २०,४९,४-७) इति पृष्ठस्तोत्रियानुरूपौ ॥२३॥

अभिप्लवे प्रथमतृतीयपञ्चमेष्वयुक्षु माध्यन्दिने सवने तं वो दस्ममृतीषहम् (अ २०, ४९, ४-५), तत्त्वा यामि सुवीर्यम् (अ २०, ४९, ६-७) इति बार्हतौ प्रगाथौ[5] स्तोत्रियानुरूपौ भवतः। प्रथमादिषु नियमेनायुग्मेष्विति, द्वितीयादिष्वन्ययोर्विधानात् ॥२३॥

अभि प्र वः सुराधसम् (अ २०,५१) इति युग्मेषु ॥२४॥

अभिप्लवे युग्मेष्वहःसु द्वितीयचतुर्थषष्ठेषु अभि प्र वः सुराधसम् (अ २०, ५१,१-२), प्र सु श्रुतं सुराधसम् (अ २०, ५१, ३-४) इति बार्हतौ प्रगाथौ पृष्ठस्तोत्रियानुरूपौ भवतः ॥२४॥

इन्द्रः पूर्भिदातिरद् दासमर्कैः (अ २०, ११), य एक इद्धव्यश्चर्षणीनाम् (अ २०, ३६), यस्तिग्मशृङ्गो वृषभो न भीमः (अ २०, ३७) इति [6]संपातानाम् एकैकम् अहरहरावपते ॥क॥

एतेषां संपातसंज्ञकानां सूक्तानाम् एकैकम् अहरहरावापस्थानत्वाच्चतुर्थादिषु यथासंबन्धम् आवृत्तिः[6] ॥क॥

---

१. इत्येतेन मूको. २. तु. सा. अ २०, ३८. ३-३. इत्यृचान् वा पू आ[1] [2] A; इत्यृचम् C. ४. आवपति G C. ५. °थौ एतौ भा[1] A. ६-६. नास्ति भा[1] A.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१]पृष्ठ्ये छन्दोमेषु दशमे च ॥ख॥ ॥२५॥†

पृष्ठ्यादिषु इन्द्रः पूर्भित् (अ २०, ११) इति त्रयाणाम्[१] संपातानाम् एकैकम् अहरहरावापस्थान आवपते। पृष्ठ्य आवृत्तिः षडहत्वात्। दशमप्रथमातिक्रमणकारणाभावात्[२] ॥ख॥२५॥

मध्यमेषु एवा ह्यसि वीरयुः (अ २०, ६०-६२) इत्युक्थस्तोत्रियानुरूपाः ॥२६॥[३]

अभिप्लवमध्यमेष्वहःसु द्वितीयतृतीयचतुर्थपञ्चमेषु एवा ह्यसि वीरयुः इत्यादयोऽष्टौ तृचाः तृतीयसवने उक्थस्तोत्रियानुरूपा यथाक्रमं भवन्ति। एवं च एवा ह्यसि वीरयुः (अ २०, ६०, १-३), एवा ह्यस्य सूनृता (अ २०,६०,४-६) इति स्तोत्रियानुरूपौ द्वितीये। तं ते मदं गृणीमसि (अ २०, ६१, १-३), तम्वभि प्र गायत (अ २०, ६१,४-६) इति तृतीये। वयमु त्वामपूर्व्य (अ २०,६२,१-२), यो न इदमिदं पुरा (अ २०, ६२, ३-४) इति[४] चतुर्थे। इन्द्राय साम गायत (अ २०,६२,५-७), तम्वभि प्र गायत (अ २०,६२,८-१०), इति[५] पञ्चमे ॥२६॥

पृष्ठ्यषष्ठे वनोति हि सुन्वन् क्षयं परीणसः[६] (अ २०,६७,१-३), विश्वेषु हि त्वा सवनेषु तुञ्जते (अ २०, ७२, १-३) इति पारुच्छेपीरुपदधति[७] द्वयोः सवनयोः पुरस्तात् प्रस्थितयाज्यानाम् ॥क॥[८]

पृष्ठ्य षडहस्य षष्ठेऽहनि प्रातःसवनमाध्यन्दिनयोर्द्वयोः सवनयोः प्राकृतीनां प्रस्थितयाज्यानां पुरस्तात् वनोति हि इत्याद्याः पारुच्छेप्याख्या ऋचः [९]उपदधति संबध्नन्ति[९] ब्राह्मणाच्छंसिपोत्राग्नीध्राः सवनक्रमेण। अनवानं तु प्रकृतितः[१०]। एवं च प्रातःसवने रयिं ददात्याभुवम् (अ २०, ६७, १[b]), इन्द्र त्वा वृषभं वयम् (अ २०,१,१) इति ब्राह्मणाच्छंसी यजति (वैताश्रौ १९,६)। दिधृता[११] यस्य वयम् (अ २०,१,१) इति ब्राह्मणाच्छंसी यजति (वैताश्रौ १९,६)। दिधृता यस्य

१-१. नास्ति मूको; † तु. गोब्रा २,६,१; ऐब्रा ६, १९; आश्रौ ७, ५, २०-२१. २. अतिक्रामणाभा° भा[१] A. ३. तु. आश्रौ ७, ८, २; शांश्रौ १२, १२,१; ७, १२. ४. तु. सा. (अ २०,६०); इत्युक्त्वाविति भा[१,२]; इत्युक्थाविति A. ५. इत्युक्त्व इति भा[१]. ६. परिण° वा. ७. °दधाति वा. ८. तु. गोब्रा २, ६,१०; ऐब्रा ५, १०; आश्रौ ८, १,२-४; शांश्रौ १०, ७, ७; ११. ९-९. उपदधाति सम्बध्नाति मूको. १०. प्रकृततः मूको. ११. दधृ दि° भा[१] A.

माध्यन्दिने स्तोमेभिरिन्द्रमायवः (अ २०, ७२, १[b]), एवा पाहि (अ २०, ८,१) इति ब्राह्मणाच्छंसी। वज्रमिन्द्र सचाभुवम् (अ २०,७२, २[b]), अर्वाङेहि (अ २०,८,२) इति पोता। मन्म श्रुधि नवीयसः (अ २०,७२,३[b]), आपूर्णो अस्य (अ २०,८,३) इत्याग्नीध्रः ॥क॥

यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिः (अ २०, ६७, ४-७) इत्यृतुयाज्यानाम् उपरिष्टात् ॥ख॥ ॥२७॥[१]

पृष्ठ्यषष्ठे प्राकृतीनाम् ऋतुयाज्यानाम् उपरिष्टात् यज्ञैः संमिश्लाः इति चतस्रः पोत्रादय उपदधति। अतश्च ऋतुना सोमं पिबतु (अ २०, २,१-४[b]), यज्ञैः संमिश्लाः इति पोता उपदधाति। एवम् आग्नीध्रः ब्राह्मणाच्छंसी। पुनश्च पोता ॥ख॥२७॥

इति वैतानकल्पे षष्ठेऽध्याये प्रथमा कण्डिका ॥

[३२]

षडहेऽभिप्लववद् आज्यस्तोत्रियाः ॥क॥[२]

पृष्ठ्यषडहे षट्स्वप्यहःसु आभिप्लविकाः आ याहि (अ २०, ३, १-३; २०,४, १-३) इत्यादयः षट् प्रातःसवनस्तोत्रिया यथाक्रमं भवन्ति स्वःस्तोत्रिया[३] आज्यानुरूपाः ॥क॥

प्रथमयोरावापः पृष्ठस्तोत्रियानुरूपौ च ॥ख॥ ॥१॥

पृष्ठ्यस्य प्रथमद्वितीययोरह्नोः अभिप्लवप्रथमद्वितीयवत्[४] प्रातःसवन आवापो भवति। माध्यन्दिने स्तोत्रियानुरूपौ भवतः। एवं च वार्त्रहत्याय शवसे (अ २०,१९,१), शुष्मिन्तमं न ऊतये (अ २०, २०, १) इति यथाक्रमम् आवापः। तथा माध्यन्दिने तं वो दस्मम् (अ २०,४९,४-५), तत्त्वा यामि (अ २०, ४९,६-७) इति स्तोत्रियानुरूपौ प्रथमे। अभि प्र वः सुराधसम् (अ २०,५१,१-२), प्र सु श्रुतं सुराधसम् (अ २०, ५१, ३-४) इति द्वितीये[५]। अहःप्रसङ्गात् प्रातःसवनप्रक्रम एव [६]स्तोत्रियानुरूपयोरयं[६] विधिः ॥ख॥१॥

---

१. तु. गोब्रा २,६,१०; आश्रौ ८,१,८. २. तु. आश्रौ ७,२,३; शांश्रौ १२, १; ४. ३. स्रस्तो° भा[१]; सस्तो° A. ४. °तीय नव मूको. ५. द्वितीयः मूको. ६-६. °त्रियाएं भा[१]. °त्रियायं भा[२]. °त्रियायं A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं अह्नव आवाप उच्यते—

तृतीये वाजेषु सासहिर्भव (अ २०, १९,६; ७,२०,१-३) इति पञ्चर्चः ॥२॥

पृष्ठ्यस्य तृतीयेऽहनि प्रातःसवन आवापस्थाने पञ्च ऋच आवपते ॥ख॥२॥

चतुर्थे पुरुष्टुतस्य धामभिः (अ २०, १९,४-७; २०, १-५) इति नव ॥३॥

चतुर्थेऽहनि प्रातःसवने नव[2] ऋच आवपते[3] ॥३॥

पञ्चमे यदिन्द्राहं यथा त्वम् (अ २०,२७-२९) इति पञ्चदश ॥४॥

पञ्चमेऽहनि पञ्चदश ऋच[1] आवपते ॥४॥

षष्ठे अभि प्र गोपतिं गिरा (अ २०,९२) इत्येकविंशतिः ॥५॥

षष्ठेऽहनि एकविंशतिम् ऋच आवपते ॥५॥

एवं प्रातःसवनविकारम् उक्त्वा माध्यन्दिनविकारम् आह—

तृतीयादीनां वयं घ त्वा सुतावन्तः (अ २०, ५२-५६; ५७,१-६) इति पृष्ठस्तोत्रियानुरूपाः ॥६॥[4]

पृष्ठ्यस्य तृतीयादीनां तृतीयचतुर्थपञ्चमषष्ठानां चतुर्णाम् अह्नां वयं घ त्वा सुतावन्तः इत्यादयोऽष्टौ[5] तृचा यथाक्रमं स्तोत्रियानुरूपा भवन्ति। वयं घ त्वा (अ २०,५२), क ईं वेद (अ २०,५३) इति तृतीयेऽह्नि स्तोत्रियानुरूपौ भवतः। विश्वाः पृतनाः (अ २०,५४), तमिन्द्रम् (अ २०, ५५) इति चतुर्थे। इन्द्रो मदाय (अ २०,५६,१-३), मदे मदे हि (अ २०,५६,४-६) इति पञ्चमे। सुरूपकृत्नुम् (अ २०,५७,१-३), शुष्मिन्तमम् (अ २०,५७,४-६) इति षष्ठे ॥६॥

चतुर्थे तुभ्येदिमा सवना शूर विश्वा (अ २०, ७३) इति षड् पुरस्तात् संपातात्[6]। तिस्रोऽर्धर्चशः ॥७॥[7]

१. पञ्च भा[2]. २. आपति A; आपंति भा[1 2]. ३. नास्ति मूको. ४. तु. आश्रौ ७, ४, ३; शांश्रौ १२, ४, ४. ५. तु. सा. (अ २०, ५२) ६. यनि. [तु. वैता ३१,२५], संपाताः षा पू A G भा[1 2]. ७. तु. आश्रौ ७, ११,३४-३८.

चतुर्थेऽह्नि पुरस्तात् संपातसूक्तात् षड् ऋच आवपते। तासां प्रथमास्तिस्र ऋचोऽर्धर्चशः शंसति ॥७॥

पञ्चमे यच्चिद्धि सत्य सोमपाः[1] (अ २०, ७४) इति पाङ्क्तं सप्तर्चम् ॥क॥[2]

पञ्चमेऽहनि पुरस्तात् संपातात् पङ्क्तिच्छन्दस्कं सूक्तम् आवपते ॥क॥

पाङ्क्तस्य[3] शंसनधर्मम् आह—

द्वौ द्वा अवसाय पञ्चमं संतनोति। त्रयं वाऽवसाय द्वयम् ॥ख॥ ॥८॥

पाङ्क्तस्य एकैकस्य द्वौ द्वौ[4] पादौ संहतौ अवसाय अर्धर्चशस्यवत् पञ्चमं पादं प्रवणेनोपसंतनोति संबध्नाति। पादत्रयं संहतं वाऽवसाय[5] अन्त्यं पादद्वयं संहतं प्रणवेनोपसंतनोति ॥ख॥८॥

षष्ठे वि त्वा ततस्रे मिथुना अवस्यवः (अ २०,७५) इति ॥क॥

षष्ठेऽह्नि पुरस्तात् संपातात् तिस्रः सप्तपदा आवपते ॥क॥

सप्तपदानाम् एकैकम् अवसाय द्वयं संतनोति। द्वयम् अवसाय द्वयम् ॥ख॥ ॥९॥

सप्तपदानां तिसृणाम् ऋचाम् एकैकस्याम् ऋचि एकैकं पदम् अवसाय पदत्रयं प्रणवेनोपसंतनोति। ततः परं पादद्वयम् अवसाय अपरं पादद्वयं प्रणवेनोपसंतनोति ॥ख॥९॥

वने न वा यो न्यधायि चाकन् (अ २०,७६) इत्यष्टर्चं च ॥१०॥[6]

सप्तपदाभ्योऽनन्तरं पुरस्तात् संपाताद् अष्टर्चम् आवपते। प्रकृतिवन्माध्यन्दिने यथावच्छंसति ॥१०॥

मध्यमेष्वभिप्लववद् उक्थस्तोत्रियानुरूपाः[7] ॥११॥[8]

पृष्ठ्यस्य मध्यमेष्वहःसु द्वितीयतृतीयचतुर्थपञ्चमेषु चतुर्ष्वहःसु तृतीयसवने

१. °सोमपातम वा. २. तु. आश्रौ ७,११,३९. ३. पाङ्क्तं तस्य मूको. ४. नास्ति भा[1 1]. ५. वचसा मूको. ६. तु. गोब्रा २,६,२; आश्रौ ७,१२,१. ७. उक्थस्तो° मूको. ८. तु. वैता ३१,२६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवा ह्यसि वीरयुः (अ २०, ६०-६२) इत्यादयोऽष्टौ स्तोत्रियानुरूपा अभिप्लववद् भवन्ति ॥११॥

षष्ठे इमा नु कं भुवना सीषधाम (अ २०, ६३, १; २^{ab}), हत्वाय देवा असुरान् यदायन् (अ २०, ६३, २^{cd}; ३) इति द्वैपदौ[1] पच्छः ॥१२॥[2]

[3]पृष्ठ्यस्य षष्ठेऽहनि इमा नु कं भुवना सीषधाम । हत्वाय देवा असुरान् यदायन् इति द्वैपदौ पच्छः[3] शंसति ॥१२॥

अपेन्द्र प्राचो मघवन्नमित्रान् (अ २०, १२५) इति सुकीर्तिम्[4] । चतुर्थीमर्द्धर्चशः ॥१३॥[5]

सकलसूक्तस्य पच्छः शंसने प्राप्ते चतुर्थीमर्द्धर्चशः शंसति[6], चतुर्थ्यां अर्द्धर्चशंसनविधानात् ॥१३॥

वि हि सोतोरसृक्षत (अ २०, १२६) इति वृषाकपिम् ॥क॥

वृषाकप्याख्यं सूक्तं वक्ष्यमाणशंसनधर्मविधानात् शंसति ॥क॥

पदावग्राहमनवानं द्वितीयेष्ववस्यति ॥ख॥

सर्वासु ऋक्षु [7]प्रथमप्रथमपादम् अवगृह्य[7] अनवानम् अनुच्छ्वासं द्वितीयेषु पादेष्ववस्यति अवसानं करोति ॥ख॥

तृतीयेषु द्वितीयान्त्यस्वरयोः तदाद्योश्च[8] न्यूङ्खनिनर्दान् कृत्वा द्वयं संतनोति ॥ग॥ ॥१४॥[9]

तृतीयेषु पादेषु द्वितीयान्त्यस्वरयोस्तदाद्योश्च स्वराऽऽदिन्यअनशेषयोश्च स्थाने न्यूङ्खाऽऽख्यान् प्रणवान् द्वादश, निनर्दाऽऽख्यांश्च त्रीन् यथाक्रमं कृत्वाऽन्त्यपादद्वयं[10] प्रणवेनोपसंतनोति ॥ग॥१४॥

१. स्तोत्रियानुरूपौ इति शेषः; द्विप° भा[1] A. २. तु. अ २०, १२४, ४-६ (अ २०, ६३); नास्ति मूको. ३-३. तु. सा. गोब्रा २, ६, १२; आश्रौ ८, ३, १; शांश्रौ १२, १२, १४. ४. सुकीर्तिः वा पू. ५. तु. गोब्रा २, ६, १२; आश्रौ ८, ३, २-३; शांश्रौ १२, १३, १. ६. नास्ति मूको. ७-७. प्रथमपादमवगृह्य भा[1] A. ८. तदाद्यौश्च वा पू भा[2] A. ९. तु. गोब्रा २, ६, १२; आश्रौ ७, ११, ९-११. १०. °त्वाऽन्त्यपाद° भा[1] A; त्वान्त्यपाद° भा[2]

न्यूङ्खप्रतिगरेषु प्रथमचतुर्थाऽष्टमद्वादशेषु प्लुतिः ॥क॥

प्रथमादिषु चतुर्षु प्लुतिर्भवति । प्लुतानां चोदात्तत्वात् शेषा अनुदात्ता भवन्ति । द्वादशसंख्योद्देशो[1] न्यूङ्खप्रतिगराणाम् एतावत्त्वार्थः । वक्ष्य निदर्शनम् ॥क॥

निनर्देष्वाद्यतृतीययोः ॥ख॥

निनर्दाऽऽख्येषु प्रणवेषु आद्यतृतीययोर्निनर्दयोः प्लुतिर्भवति । अत्राऽपि तृतीयोद्देशो निनर्दानाम् एतावत्त्वार्थः ॥ख॥

मध्यमः स्वरितः ॥ग॥ ॥१५॥

न्यूङ्खप्रतिगरप्लुतशेषे अनुदात्तत्वे प्राप्ते मध्यमः स्वरितो विधीयते ॥ग॥१५॥

निदर्शनम् ॥१६॥

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत । यत्रो ३ ओ ओ ओ ३ ओ ओ ओ ओ ३ ओ ओ ओ ओ ३ मदद्वृषाकपो ३ ओ ओ ३ अर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरोम् (अ २०, १२६, १), परा हीन्द्र (अ २०, १२६, २) इति ॥१७॥

प्रतिगरे ओ ३ ओ ओ ओ ३ ओ ओ ओ ओ ३ ओ ओ ओ ओ ३ । निनर्दस्य मदेय मदैवो ३ ओ ओ ३ थामो दैव इति ॥१८॥

निदर्शनमित्यादि ओ ३ थामो दैवेत्यन्तं सूत्रम् । निदर्शनम् उदाहरणम् [2]प्रग्रहाऽवसानन्यूङ्खनिनर्दप्रतिगराणाम्[2] ॥१६-१८॥

इदं जना उप श्रुत (अ २०, १२७; १२८) इति कुन्तापम् अर्द्धर्चशः ॥क॥

कुन्तापाः कल्पाः । यदिन्द्रादो दाशराज्ञे (अ २०, १२८, १२-१६) इति पञ्चेन्द्रगाथाः । [3]एवमन्तं कुन्तापाख्यसूक्तम्[3] अर्द्धर्चशः शंसति । रैभ्यादिन्यपदेश्यस्ववादेन[4] वच्यस्व रेभ वच्यस्व (अ २०, १२७, ४-६) इति तिस्रो रैभीः ऋचः

१. द्वादशाख्यादेश्यो मूको. २-२ °वसानं न्यूंखनिर्दर्शन प्र° मूको. ३-३. एवमैतशप्रलापाख्यसू° मूको. ४. °देश्ययत्यवा° भा[1]; °देश्ययत्यावा° भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शंसति। राज्ञो विश्वजनीनस्य (अ २०,१२७,५-१०) इति चतस्रः पारिक्षितीः। इन्द्रः कारुमबूबुधत (अ २० १२७, ११-१४) इति चतस्रः कारव्याः। यः सभेयो विदथ्यः (अ २०,१२८,१-५) इति पञ्च दिशां क्लृप्तीः। योऽनाक्ताक्षो अनभ्यक्तः (अ २० १२८,६-११) इति षट् जनकल्पाः। यदिन्द्रादो दाशराज्ञे (अ २०,१२८, १२-१६) इति पञ्चेन्द्रगाथाः। एवम् [1]ऐतशप्रलापाख्यसूक्तमर्धर्चशः शंसति[1] ॥क॥

चतुर्दश पदाऽवग्राहम् ॥ख॥ ॥१९॥[2]

तस्य कुन्तापस्य प्रथमाश्चतुर्दश ऋचः पादं पादम् अवगृह्याऽर्द्धर्चम् अवस्यति। एवं द्वितीयार्द्धर्चे[3], प्रथमं पादम् अवगृह्य [द्वितीयाम् ऋचम् उत्तमं]? प्रणवेनोपसंतनोति प्राकृतवत्। एवम् इतरास्वृक्षु। अवग्रहेषु चाऽनवानं [4]वृषाकपि-दृष्टत्वात्[4]। चतुर्दश्याम् ऋचि प्रथमस्त्रिपादर्द्धर्चशः। तेन द्वितीयमपि पादम् अवगृह्य तृतीयेऽवस्यति। केचित् पङ्क्तिच्छन्दस्त्वात् पङ्क्तिशंसनधर्मं मन्यन्ते ॥ख॥१९॥

एता अश्वा आ प्लवन्ते (अ २०,१२९-१३२) इत्यैतशप्रलापं पदाऽव-ग्राहम् ॥क॥

ऐतशप्रलापाऽऽख्यं षट्सप्ततिपादसमुदायं[5] पदाऽवग्राहं शंसति। पुनः पदाऽवग्राहग्रहणम् अवग्राहेष्ववसानार्थम्। श्रुतिरप्येवमाह— यथा निविदः (गोब्रा २, ६, १३; ऐब्रा ६,३३) इति ॥क॥

तासाम् उत्तमेन पादेन[6] प्रणौति ॥ख॥ ॥२०॥[7]

तासाम् [8]ऐतशप्रलापाऽऽख्यानां नीलशिखण्डवाहनः इति सर्वासाम् अन्ति-मेनैव[8] पादेन सकृदेव प्रणौति प्रणवं करोति ॥ख॥२०॥

विततौ किरणौ द्वौ (अ २०,१३३) इति प्रवह्लिकाः ॥२१॥[9]

प्रवह्लिकाऽऽख्या ऋचोऽर्द्धर्चशः शंसति। कुन्तापमर्द्धर्चशः (वैता ३२, १९)

१-१. ऐतशप्रलादि मूको. २. तु. गोब्रा २, ६,१२; ऐब्रा ६,३२; आश्रौ ८, ३, ७-१३; शांश्रौ १२, १४-१७, २. ३. ऐतशद्वि° भा[1]. ४. कपि दृष्ट° मूको. ५. °पदस° भा[2]. ६. पदेन G. ७. तु. गोब्रा २,६,१३; ऐब्रा ६, ३३; आश्रौ ८, ३, १४-१७; सा. [अ २०,१२९]. ८-८ °श प्रलापनील सर्वो उत्तिमे° मूको. ९. तु. गोब्रा २, ६, १३; आश्रौ ८, ३-१८; शांश्रौ १२,२३,१.

इति सामान्यविधानात्। तेनान्यत्र वैशेषिकम्[1] ॥२१॥

इहेत्थ प्रागपागुदगधराक् (अ २० १३४) इति प्रतिराधान् न संतनोति ॥२२॥[2]

प्रतिराधाऽऽख्या ऋचोऽर्द्धर्चशः शंसति। अर्द्धर्चशस्त्वेन तासां प्रणवेनोपसं-ताने प्राप्ते निषेधम् आह न संतनोतीति। इहेत्थ प्रागपागुदगधराक् इति पूर्वोऽर्द्धर्चः सर्वासां समानः ॥२२॥

भुगित्यभिगतः (अ २०, १३५,१-३) इत्याजिज्ञासेन्यास्तिस्रः ॥२३॥[3]

आजिज्ञासेन्यास्तिस्र ऋचः शंसति। तिस्र इति स्त्रीलिङ्गनिर्देश ऋक्त्व-प्रदर्शनार्थः। ततश्च ऋगन्तं[4] प्रणवेनोपसंतनोति ॥२३॥

प्रवह्लिकादिषु पञ्चदश प्रतिगराः ॥२४॥

दुन्दुभिमाहननाभ्यां जरितरोथामो दैव। (अ २०,१३५, १ᵇ°)। कोश-बिले, रजनि[5] ग्रन्थेर्धानम्[6], उपानहि पादम्। उत्तमां जनिमां जन्यान्, उत्तमां जनीन् वर्त्मन्यात्, (अ २०,१३५,२)। अलाबूनि, पृषातकानि, अश्वत्थ-पलाशम्। पिपीलिकावटः, श्वसः[7], विद्युत्[8], श्वा, पर्णशदः[9], गोशफो जरितर् (अ २०, १३५, ३) इति ॥क॥[10]

प्रवह्लिकादिष्वित्यादि गोशफो जरितरित्येवमन्तं सूत्रम्। प्रवह्लिकासु प्रति-राधेषु आजिज्ञासेन्यासु च पञ्चदशसु ऋक्षु दुन्दुभिमाहननाभ्याम् इत्यादयः पञ्चदश प्रतिगरा भवन्ति। जरितरोथामो दैव इति समानोऽनुषङ्गः। तथा हि जरितरोथामो दैव इति पुनःसंधानात्[11] ॥२४-२५ क॥

पूर्वासु पूर्वेषु ॥ख॥ ॥२५॥

---

१. वैसिकम् मूको. २. तु. गोब्रा २,६,१३; आश्रौ ८, ३,२०; शांश्रौ १२, २३,१. ३. तु. गोब्रा २,६,१३; ऐब्रा ६, ३३; आश्रौ ८, ३, २२; शांश्रौ १२, २३, २. ४. तत्रागतं भा[1] A. ५. रज्जुनि RW. ६. °र्दानम् RW C. ७. चमसः G. ८. विप्रुट् G. ९. °शफः वा. पू. १०. तु. आश्रौ ८,३, १९;२१. ११. संप्रधानात् भा[1][2].

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वासु ऋक्षु प्रवह्लिकाऽऽख्यासु पूर्वेष्वर्द्धर्चेष्वाथाः प्रतिगरा भवन्ति। प्रतिराधाऽऽदिषु नवसु ऋगन्ते एव ॥ख॥२५॥

वीमे देवा अक्रंसत (अ २०, १३५,.४) इत्यतिवादम् ॥२६॥[१]

अतिवादाऽऽख्याम् ऋचम् अर्द्धर्चशः शंसति सामान्यविधानादेव ॥२६॥

'पत्नी यदृश्यते (?)····जरितरोथामो दैव (अ २०,१३५,५[ab]), होता विष्टीमेन जरितरोथामो दैव (अ २०,१३५,५[cd]) इति प्रतिगरौ[२] ॥२७॥

आदित्या ह जरितर् (अ २०, १३५, ६) इति देवनीथम् ऐतशप्रलापवत्[३] ॥२८॥[४]

[यां देवनीथरित्यमृचां] ? पदावग्राहम्। तासामुत्तमेन पादेन प्रणौति (वैता ३२, २०) इति ऐतशप्रलापवच्छंसति। पदान्यष्टादश[५] ॥२८॥

ओं ह जरितः तथा ह जरितः इति प्रतिगरौ व्यत्यासम् ॥२९॥[६]

देवनीथपदानाम् एतौ व्यत्ययेन प्रतिगरौ[७]। एवं[८] च विषमस्थानेषु ओं ह जरितरोथामो दैव इति। तथा च पुनः तथा ह जरितरोथामो दैव इति ॥२९॥

त्वमिन्द्र शर्म रिणाः[९] (अ २०, १३५, ११-१३) इति भूतेच्छदः ॥३०॥[१०]

भूतेच्छदोऽर्द्धर्चशः शंसति कुन्तापम् अर्द्धर्चशः (वैता ३२,१९) इति सामान्यविधानात् ॥३०॥

यदस्या अंहुभेद्याः (अ २०, १३६, १-१६)[११] इत्याहनस्या वृषाकपिवत् ॥३१॥[१]

आहनस्याः षोडशर्चो वृषाकपिवच्छंसति। तेन पदावग्राहम् अनवानं द्वितीयेष्ववस्यति। तृतीयेषु द्वितीयान्त्यस्वरयोस्तदाद्योश्च न्यूङ्खनिनर्दान् कृत्वा द्वयं संतनोति (वैता ३२, १४) इति, अत्र भवति। आसु पञ्चमपदाभावात् चतुर्थम् एव प्रणवेनोपसंतनोति ॥३१॥

प्रतिगर ईकारः ॥क॥

न्यूङ्खस्य ईकारः प्रतिगरो भवति। वार्षाकपस्य ओकारः[२] प्रत्याम्नायकः न्यूङ्खस्यैव[३] नियम्यते निनर्दस्याऽऽदिश्य[४] विधानात् ॥क॥

निनर्दस्य किम् अयम् इदम् आहो ३ ओ ओ ३ थामो दैव इति ॥ख॥ ॥३२॥[५]

निनर्दस्यैव प्रत्याम्नायकः प्रतिगरो भवति ॥ख॥३२॥

दधिक्राव्णो अकारिषम् (अ २०,१३७,३) इत्यर्द्धर्चशः ॥क॥

दधिक्राऽऽख्याम् ऋचम् अर्द्धर्चशः शंसति ॥क॥

सुतासो मधुमत्तमाः (अ २०, १३७, ४-६) इति पावमानीः ॥ख॥

पावमान्याख्यास्तिस्र ऋचोऽर्द्धर्चशः शंसति प्रकृतवत्[६] ॥ख॥

अव द्रप्सो अंशुमतीमतिष्ठत् (अ २०, १३७, ७-९) इति पच्छः ॥ग॥ ॥३३॥[७]

एवं[८] तृचं पादशः शंसति ॥ग॥३३॥

अस्योत्तमया परिदधाति नित्यया वा ॥३४॥[९]

अव द्रप्सः[१०] इत्यस्य तृचस्योत्तमया ऋचा परिदधाति शस्त्रं परिसमापयति। नित्यग्रहणात् अव द्रप्सः[१०] इत्येतस्मात् तृचाद् अनन्तरम् प्र मंहिष्ठाय (अ २०,

१. तु. गोब्रा २, ६, १३; आश्रौ ८, ३, २३; शांश्रौ १२, २३, ४. २-२. नास्ति भा[१ २] A. ३. °लापं च भा[१ २] A. ४. तु. गोब्रा २, ६,१४; आश्रौ ८, ३, २५; शांश्रौ १२, ९, १-५. ५. ऐब्रा ६, ३५ सप्तदश इति. ६. तु. आश्रौ ८,३,२५. ७. प्रता(ला भा[२])पः मूको. ८. ···एव भा[२]. ९. ऋणा भा[१.२] A. १०. तु. गोब्रा २,६,१४; आश्रौ ८,३, २७; शांश्रौ १२, १६,४-५. ११. वैप ४ यस्था. पाठः? इति कृत्वा °स्याम् अंहुभेद्याम् इति शोधप्रस्तावः द्र.

१. तु. गोब्रा २, ६, १५; आश्रौ ८, ३, २८; शांश्रौ १२, २४, १-८. २. उकारः मूको. ३. °स्यैष भा[२]. ४-४. निदर्शस्यादि (दिस्य भा[२] A) भा[१]. ५. तु. अ २०,१२६,३; आश्रौ ८, ३, ३१; शांश्रौ १२, २४, १-८. ६. प्रकृत (°तः भा[१]) मूको. ७. तु. गोब्रा २,६,१६; आश्रौ ८,३,३२-३३; शांश्रौ १२, २५, १-२. ८. एवं भा[२]; एव भा[१] A. ९. तु. वैता २५,१०; आश्रौ ८, ३, ३४. १०-१०. नास्ति भा[१] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५,१) इत्येवमादि प्रकृतवद्भवति । 'नित्यया च' नित्यशब्दस्योपलक्षणार्थत्वाद् ऐन्द्राजागतस्योत्सर्गविधिश्च तद्वत् ॥३४॥

ऐन्द्राजागतम् उत्सृजन्त्येके ॥क॥

एक आचार्याः प्र मंहिष्ठाय (अ २०,१५) इत्येतद् ऐन्द्राजागतं सूक्तम् उत्सृजन्तीति न तच्छंसति । उद्घुतः (अ २०,१६,१-३) इत्यैन्द्राबार्हस्पत्यं तृचं शंसति[1]। अस्मिन् कल्पे तृचस्योत्तमया परिधानम् इति भगवान् वाचस्पतिः ॥क॥

ऐन्द्राबार्हस्पत्यं तृचम् अन्त्यम् ऐन्द्राजागतं च शस्त्वेत्यपरे ॥ख॥ ॥३५॥[1]

अपर आचार्याः अव द्रप्सः (अ २०,१३७,७-९) इत्येतम् ऐन्द्राबार्हस्पत्यं तृचं प्र मंहिष्ठाय (अ २०, १५,१) इत्येतस्यान्त्यम् ऐन्द्राजागतं च इमे त इन्द्र ते वयं पुरुष्टुत (अ २०१५,४-६) इति शस्त्वा परिदधातीति मन्यन्ते । परिधानीययोस्तु विकल्पः ॥ख॥३५॥

इति वैतानकल्पे षष्ठेऽध्याये द्वितीया कण्डिका ॥

[३३]

नवरात्रेऽभिजिद् विषुवान् विश्वजिच् चतुर्विंशवद् उक्थवर्जम् ॥क॥

नवरात्रेऽह्नां समूहेऽभिजिदादयस्त्रयः क्रतवः चतुर्विंशवद् भवन्ति । "चतुर्विंशो गवामयनस्य द्वितीयम् अहः । सर्वातिदेशे प्राप्ते उक्थस्तोत्रं‡ नाऽतिदिश्यते† । एवं चाऽग्निष्टोमसंस्थं प्रतिपादितं भवति" ॥क॥

आभिप्लविकांस्तु सर्वान् ॥ख॥ ॥१॥[5]

आभिप्लविकांस्तु आ याहि (अ २०, ३८) इत्यादीन् षडपि स्तोत्रियान् 'आवापस्थान आवपते' न चतुर्विंशवत् तृतीयादीन् ॥ख॥१॥

१-१. नास्ति भा[1] A. २. तु. वैता २५, ८. ३. तु. गोब्रा २, ६,१६. ४-४. नास्ति भा[1] A; ‡ उक्थशत्रं मूको.; †अति° भा[1]. ५. तु. वैता ३१, १६-१९; आश्रौ ८,५,९;७,२. ६-६. °स्थानाव° मूको.

अभिं त्वा वृषभा सुते (अ २०, २२, १-३), उद्धेदभि श्रुतामघम् (अ २०, ७, १-३), युञ्जन्ति ब्रध्नमरुषं चरन्तम् (अ २०, २६,४-६) इत्याज्यस्तोत्रियाः ॥२॥

अभिजिदादीनामिति । यथाक्रमं प्रातःसवन आज्यस्तोत्रिया भवन्ति इवःस्तोत्रियानुरूपाः[1] ॥२॥

स्वरसामसु आ याहि सुषुमा हि ते (अ २०, ३८, १-३), इन्द्रमिद्गाथिनो बृहद् (अ २०, ३८, ४-६), इन्द्रेण सं हि दक्षसे (अ २०, ४०,१-३) इति ॥३॥

स्वरसामाऽऽख्येषु त्रिष्वहस्सु यथाक्रमम् आ याहि इत्यादय आज्यस्तोत्रिया भवन्ति इवःस्तोत्रियाश्चानुरूपाः[1] ॥३॥

शेषम् अभिप्लवस्य द्वितीयादित्र्यहवत् ॥क॥[2]

शेषम् अनुक्तम् अभिप्लवषडहस्य द्वितीयतृतीयचतुर्थवद् यथाक्रमं भवति ॥क॥

पञ्चर्चस्त्वावापः ॥ख॥ ॥४॥

'वार्त्रहत्याय शवसे[3]' (अ २०,१९,१), शुष्मिन्तमं न ऊतये (अ २०, २०, १), आ तू न इन्द्र मन्द्रयक् (अ २०,२३,१), उप नः सुतमा गहि (अ २०,२४,१), "यदिन्द्राहं यथा त्वम्[4]" (अ २०,२७,१) इत्येतान् पञ्चर्चान् यथाक्रमम् आवापस्थान आवपते न तृचान् , यथाऽभिप्लवे ॥ख॥४॥

विषुवति सौर्यपृष्ठे[5] उदु त्यं जातवेदसम् इति षट्स्तोत्रियः[6] ॥५॥

विषुवति क्रतौ यदा[7] सौर्यपृष्ठं[8] भवति उदु त्यं जातवेदसम् (अ २०, ४७, १३-१५), तरणिर्विश्वदर्शतः (अ २०,४७,१६-१८), वि द्यामेषि रजस्पृथु (अ २०, ४७, १९-२१) इत्युक्ता इति त्रयः । अभि त्वा वर्चसा गिरः (अ २०,४८,१-३) इति चतुर्थः । आयं गौः पृश्निरक्रमीत् (अ २०,४८,४-६) इत्युक्त इति पञ्चमः । यच्छक्रा वाचमारुहन् (अ २०,४९,१-३) इति षष्ठः । तदा[9] एष षट्स्तोत्रिय आवापः प्रातःसवने भवति । सौर्यपृष्ठत्वं चास्य सामवेदप्रत्ययम् ॥५॥

१. तु. शांश्रौ १२,२,१. २. तु. आश्रौ ८, ५, १०. ३-३. तु. वैता ३१, २२; नास्ति मूको. ४-४. तु. वैता ३१, २२; नास्ति मूको. ५. सूर्यपृ° भा[1,2] A. ६. षट् स्तोत्रियाः भा[2] ?C. ७. तथा मूको. ८. सूर्यं पृष्ठं मूको. ९. नास्ति मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चित्रं देवानामुदगादनीकम् (अ २०, १०७, १४-१५), तत्सूर्यस्य देवत्वं तन्महित्वम् (अ २०,१२३) इति पृष्ठस्तोत्रियानुरूपौ ॥क॥

एतौ माध्यन्दिने[1] स्तोत्रियानुरूपौ भवतः ॥क॥

बण्महाँ असि सूर्य (अ २०,५८,३-४), श्रायन्त इव सूर्यम् (अ २०, ५८, १-२) इति वा[2] ॥ख॥

एतौ वा पृष्ठस्तोत्रियानुरूपौ भवतः ॥ख॥

इन्द्र क्रतुं न आ भर (अ २०, ७९,१-२), इन्द्र ज्येष्ठं न आ भर (अ २०, ८०,१-२) इति वा ॥ग॥ ॥६॥

एतौ वा भवतः ॥ग॥६॥

नित्यौ वोत्तरे पक्षे ॥क॥

गवामयने विषुवत उत्तरे पक्षे नित्यौ वा एतौ स्तोत्रियानुरूपौ भवतः ॥क॥

अनुरूपात् तं वो दस्ममृतीषहम् (अ २०, ४९, ४-५), अभि प्र वः सुराधसम् (अ २०, ५१, १-२) इति नौधसश्यैतयोनी कामम् ॥ख॥ ॥७॥

नौधसस्य[3] श्यैतस्य च एते योनी काममिच्छया शंसति। आरम्भणीयाया ऊर्ध्वम् एतयोर्विधानाद् अर्द्धर्चशः शंसनम्। आज्यस्तोत्रियत्वाच्च न प्रग्रथनम्। प्रयोगक्रमार्थो नौधसशब्दस्य पूर्वनिपातः ॥ख॥७॥

वैश्वानरस्य प्रतिमोपरि द्यौः (अ ८, ९, ६-२६), चित्रश्चिकित्वान् महिषः सुपर्णः (अ १३,२, ३२-४६) इति सूक्तशेषावावपते ॥८॥

एतौ सूक्तशेषावावापस्थान आवपते। आनुष्टुभीरर्द्धर्चशः शंसतीति "केचित्त मन्यन्ते"[4] ॥८॥

विश्वजिति वैराजपृष्ठे यद् द्याव इन्द्र ते शतम् (अ २०, ८१),

1. मध्य° मूको. 2. च भा[1] A. 3. °धसस्यान्तः भा[1]; °धसस्वान्तः A. 4-4. केचिनाम° भा[1] A.

यदिन्द्र यावतस्त्वम् (अ २०, ८२) इति पृष्ठस्तोत्रियानुरूपौ बार्हतौ ॥९॥

यदा विश्वजिद् वैराजपृष्ठो भवति तदा एतौ माध्यन्दिने स्तोत्रियानुरूपौ बार्हतौ प्रगाथौ भवतः। एवं बार्हतानां स्तोत्रियानुरूपाणां प्रग्रथनम् (वैता २२, ९) उक्तम्। वैराजपृष्ठत्वं चास्य सामवेदप्रत्ययम् ॥९॥

उक्ते योनी ॥क॥

विषुवति सौर्यपृष्ठे[1] तं वो दस्ममृतीषहम्, अभि प्र वः सुराधसम् इति नौधसश्यैतयोनी कामम् (वैता ३३,७) इत्युक्ते योनी। ते इह तथैव शंसति ॥क॥

इन्द्र क्रतुं न आ भर (अ २०,७९) इति तृतीयाम् ॥ख॥ ॥१०॥[2]

इमां पूर्वाभ्यां तृतीयाम् अर्द्धर्चशःप्रग्रथनां[3] शंसति। तृतीयामिति वचनात् पूर्वयोर्भावे बाधः। सर्वत्र योनिशंसनमेव मानमभिमतम्[4] ॥ख॥१०॥

इन्द्र त्रिधातु शरणम् (अ २०,८३) इति सामप्रगाथः ॥११॥[5]

एष प्राकृतस्य सामप्रगाथस्य प्रत्याम्नायको भवति ॥११॥

सुकीर्तिर्वृषाकपी[6], यो जात एव प्रथमो मनस्वान् (अ २०, ३४) इति सामसूक्तम्, अहीनसूक्तम्[7] आवपते ॥१२॥[8]

एतानि चत्वारि सूक्तानि स्वेन स्वेन शंसनधर्मेण युक्तान्यावापस्थान आवपते। सामसूक्तसंज्ञा प्रदेशेषु व्यवहारार्था ॥१२॥

दशरात्र उक्तः पृष्ठ्यः[9] ॥१३॥[10]

दशरात्राख्येऽह्नां समूहे प्रथमः पृष्ठ्यः षडहः स इह[11] उक्तविधिक ऊर्ध्वस्तोमो भवति नात्रोक्तदशरात्र ऊर्ध्वस्तोमः इति[12] विशेषविधानात्। एवं पारिशेष्यात् स्वरसामपृष्ठ्या[13] आवृत्ता भवन्ति [छन्दोमेषु गवायुषोस्तु पूर्वत्वात् सात्त्विकमप्य-

1. सूर्यपृ° मूको. 2. तु. आश्रौ ८, ७, ५-७. 3. °शःप्रगथनां मूको. 4. मानभिमितं मूको. 5. तु. आश्रौ ८,७,१० [तु. ७,३,१९]. 6. =अ २०, १२५-१२६. 7. =अ २०,३५. 8. तु. आश्रौ ८,७,११; शांश्रौ १२, ६,१६. 9. तु. C; वैतु. G. उक्तः ॥१३॥ पृष्ठ्यश्छन्दो°. 10. तु. आश्रौ ८, ७, १७-१८; शांश्रौ १०,६,६-७. 11. नास्ति भा[1] A. 12. तु. वैता ३१, १४;

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगम्]१ ॥१३॥

छन्दोमेषु[२] इन्द्रा याहि चित्रभानो (अ २०,८४), तमिन्द्रं वाजयामसि (अ २०,४७,१-३; १३७, १२-१४), महाँ इन्द्रो य ओजसा (अ २०, १३८) इत्याज्यस्तोत्रियाः ॥१४॥

छन्दोमाख्येषु त्र्यहस्सु प्रातःसवन एते आज्यस्तोत्रिया यथाक्रमं भवन्ति। इवःस्तोत्रियाश्चाऽनुरूपाः[२] ॥ख॥१४॥

सुरूपकृत्नुमूतये (अ २०,६८) इति द्वादशर्चः[३]। स घा नो योग आ भुवत् (अ २०, ६९-७०) इति द्वात्रिंशतम्। वीळु चिदारुजत्नुभिः (अ २०,७०-७१) इति षट्त्रिंशतम् आवपते ॥१५॥

छन्दोमानां प्रथमेऽहनि प्रातःसवन आवापस्थाने द्वादश ऋच आवपते। द्वितीये द्वात्रिंशतम्। तृतीये षट्त्रिंशतम् ॥१५॥

वयं घ त्वा सुतावन्तः (अ २०, ५२) इत्यादि बण्महाँ असि सूर्य (अ २०,५८,३-४) इत्यन्ताः पृष्ठस्तोत्रियानुरूपाः[४] ॥१६॥

वयं घ त्वा सुतावन्तः (अ २०,५२), क ईं वेद सुते सचा (अ २०,५३) इति प्रथमेऽहनि माध्यन्दिने एतौ स्तोत्रियानुरूपौ भवतः। क ईं वेद सुते सचा, वयं घ त्वा सुतावन्तः इति द्वितीये। श्रायन्त इव सूर्यम् (अ २०, ५८, १-२), बण्महाँ असि सूर्य (अ २०,५८,३-४) इति तृतीये ॥१६॥

उत्तरयोरष्टर्चम् आ सत्यो यातु मघवाँ ऋजीषी (अ २०,७७) इति चाऽऽवपते ॥१७॥

उत्तरयोर्द्वितीयतृतीययोः छन्दोमयोरह्नोः माध्यन्दिने सवन [५]उपरिष्टात् संपातात्[५] वने न वा यो न्यधायि चाकन् (अ २०,७६) इत्यष्टर्चसंज्ञम्[६], आ सत्यो यातु (अ २०, ७७) इति सूक्तम् आवपते। चकारः सूक्तद्वयसमुच्चयार्थः ॥१७॥

अन्येषु महास्तोत्रेष्वष्टर्चम्[७] ॥क॥[८]

---

१. नास्ति भा[१] A. २. छन्दोमेषु स्तोत्रियाख्यानु° मूको. ३. °र्चम् C. ४. तु. C; °नुरूपौ वा G. ५-५. °रिष्टात् तस्मात् संपाताः मूको. ६. तु. वैता ३२, १०; °र्चसंज्ञा मूको. ७. °र्चेषु G. ८. तु. गोब्रा २,६,१; ऐब्रा ६,१९.

उक्तस्तोमकेभ्यः स्तोत्रेभ्योऽन्येषु अष्टाचत्वारिंशत्स्तोमात् परेषु अष्टर्चम् एवाऽऽवपते। इतिप्रभृति सनीताः?[१] स्तोमा इत्येके। [२]येत्रमसंख्याता इत्युत्तरे ?[२] ॥क॥

य एक इद्विदयते इति षड् उक्थस्तोत्रियानुरूपाः[३] ॥ख॥ ॥१८॥

[४]य एक इद्विदयते (अ २०,६३,४-६), य इन्द्र सोमपातमः (अ २०,६३,७-९) इति छन्दोमप्रथमेऽह्नि तृतीयसवने स्तोत्रियानुरूपौ भवतः। एन्द्र नो गधि प्रियः (अ २०, ६४, १-३) इति। एदु मध्वो मदिन्तरम् (अ २०, ६४, ४-६) इति द्वितीये। एतो न्विन्द्रं स्तवाम (अ २०, ६५,१-३), स्तुहीन्द्रं व्यश्ववत् (अ २०, ६६,१-३) इति तृतीये। एवमेते षड् उक्थस्तोत्रियानुरूपाः[४] छन्दोमेषु भवन्ति ॥ख॥१८॥

द्वितीये अध्वर्यवोऽरुणं दुग्धमंशुम् (अ २०, ८७), यस्तस्तम्भ सहसा वि ज्मो अन्तान् (अ २०, ८८), अस्तेव सु प्रतरं लायमस्यन् (अ २०,८९) इत्यैकाहिकानि ॥१९॥

द्वितीये छन्दोमे ऐकाहिकानि। प्र मंहिष्ठाय (अ २०,१५-१७) इत्यादीनाम् ऐकाहिकानां प्रत्याम्नायकान्येतानि सूक्तानि भवन्ति ऐकाहिकशब्दात्[५] ॥१९॥

तृतीये अध्वर्यवोऽरुणम् (अ २०, ८७), यो अद्रिभित् प्रथमजा ऋतावा (अ २०, ९०), आ यात्विन्द्रः स्वपतिर्मदाय (अ २०, ९४) इति ॥२०॥

तृतीयेऽहनि एतानि प्रकृतानां[६] प्रत्याम्नायकानि भवन्ति। प्रथमे तु प्रकृतान्येव विशेषाऽभावात् ॥२०॥

यो अद्रिभित् (अ २०, ९०), इमां धियं सप्तशीर्ष्णीं पिता नः (अ २०,९१) इत्युभयोरेकैकं मध्यमस्याऽऽदावन्ते[७] वा ॥२१॥[८]

उभयोर्द्वितीयतृतीययोरह्नोः ऐकाहिकानां सूक्तानां मध्यमस्य सूक्तस्यादावन्ते वा यो अद्रिभित्, इमां धियम् इत्येतयोर्यथाक्रमम् एकैकं शंसति ॥२१॥

---

१. सनीता! भा[१] A. २-२. यत्र संख्याता इत्यु° भा[१] A. ३. यनि. C; °रूपौ G. ४-४. नास्ति भा[१] A. ५. तु. वैता. २५, ७-१०. ६. प्रकृतानि भा[१] A. ७. °दावन्त्ये G ८. तु. आश्रौ ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशमं पृष्ठ्यचतुर्थवद् उक्थवर्जम् ॥२२॥

दशरात्रस्य दशमम् अहः पृष्ठ्यषडहस्य चतुर्थेनाह्ना तुल्यं भवति ॥२२॥

[1]उत्त्वा मदन्तु (अ २०,९३,१-३) इत्याज्यस्तोत्रियः[1] ॥२३॥

स्वःस्तोत्रियस्यानुरूपः[2] ॥२३॥

उदु त्ये मधुमत्तमाः (अ २०,५९,१-२), उदिन्न्वस्य रिच्यते (अ २०, ५९, ३-४) इति पृष्ठस्तोत्रियानुरूपौ ॥२४॥

एतौ माध्यन्दिने स्तोत्रियानुरूपौ भवतः ॥२४॥

पत्नीसंयाजेभ्यो मानसस्तोत्राय कृतसंज्ञाः सदोऽभिव्रजन्ति ॥२५॥[3]

पत्नीसंयाजेभ्योऽनन्तरं मानसस्तोत्रार्थं कृतसंज्ञाः कृतसंवादाः कर्मसंबद्धाः सदो व्रजन्ति ॥२५॥

मनसा सर्वम् अप्रैषे ॥२६॥[4]

मानसस्तोत्रसंबद्धं[5] सर्वं मनसैव कर्तव्यम् अप्रैषे । प्रैषे[6] तु "वाचा विप्रष्टे" यज्ञविरिष्टम्[8] ॥२६॥

होत्रे आरोहोऽसि मानसो मनसे त्वा मनो जिन्व इति प्रसौति ॥२७॥[9]

होत्रर्थं मानसस्तोत्राय प्रस्तोत्राऽऽमन्त्रितः[10] अनेन स्तोमभागेन प्रसौति ॥२७॥

आयं गौः (अ ६, ३१) इति चानुमन्त्रयते ॥२८॥[11]

स्तुतस्य स्तुतमसि इति अस्माद् अनन्तरम् अनेन सूक्तेन स्तोत्रम् अनुमन्त्रयते चशब्दात् ॥२८॥

१-१. नास्ति भा[1] [2] A. २. स्वस्तोत्रियस्यानुरूपाः मूको. ३. तु. आश्रौ ८,१२,२७;१३,१-३. ४. तु. तैसं ७,३,१,१-२. ५. मनमास्तो° भा[1] A; ६. नास्ति A. ७-७. वा वापिप्रेष्टो मूको. ८. °विष्टरम् मनसा भा[2]. ९. तु. वैता १७, ४. १०. प्रस्तोत्रार्थं मन्त्रितः मूको. ११. तु. लाश्रौ ३,८,१; आश्रौ ८, १३, ६; आपश्रौ २१, १०,५.

धृतिरसि सुधृतिरसि[1] इत्यौदुम्बरीं मध्येऽन्वालभ्याऽऽसते ॥२९॥[2]

अनेन मन्त्रेणौदुम्बरीं [3]मध्ये देशेऽन्वालभ्य[3] कर्मसंबद्धा आसते नक्षत्रप्रादुर्भावं यावत् । प्रादुर्भावे तु[4] कर्मान्तरविधानात् । अनुशब्दोऽनुक्रमार्थः ॥२९॥

इति वैतानकल्पे षष्ठेऽध्याये तृतीया कण्डिका ॥

[३४]

प्रादुर्भूतेषु नक्षत्रेषु निष्क्रम्य जपन्ति—

युत्रं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तं तमिद्धतं वज्रेण तं तमिद्धतम् । दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत् । अस्माकं शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः (मा ८, ५३) इति ॥१॥[5]

प्रकर्षेणोदितेषु नक्षत्रेषु सदसो निष्क्रम्य मन्त्रं जपन्ति ॥१॥

अध्वर्युपथेन गत्वा दक्षिणपश्चाद् अग्नेरुपविश्य कामान् कामयित्वा यदिहोनम् अकर्म यद् अत्यरीरिचाम प्रजापतिं तत्पितरम् अप्येतु (ऐब्रा ५,२४) इति ॥२॥[6]

अध्वर्युपथेनेत्यादि पितरमप्येतु इत्यन्तं सूत्रम् । अध्वर्युमार्गेण गत्वा दक्षिणाऽपरेणाऽऽहवनीयम् उपविश्य कामान् पुत्रबन्ध्वादीन् कामयित्वा यदिहोनम् अकर्म इत्येतं मन्त्रं जपन्ति यथाऽनुवृत्तौ ॥२॥

तिष्ठन्तो वाचम् आह्वयन्ते वागैतु वागुपैतु वागुप मैतु[7] वाक् इति ॥३॥[8]

---

१. स्वधृति° वा. २. तु. काश्रौ १२, ४, २२-२३; आपश्रौ २१, १३, ७; आश्रौ ८,१३,२२. ३-३. मध्यदेशे° भा[1] A. ४. षु मूको. ५. तु. काश्रौ १२,४,१२; आपश्रौ २१,१२, ९; आश्रौ ८, १३, २३. ६. तु. काश्रौ १२, ४, २५-२६; आश्रौ ८, १३, २८-२६; बौश्रौ १६, ९. ७. नास्ति पू. ८. तु. आश्रौ ८,१३,२७; आपश्रौ २१,१२,९.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानसस्तोत्रे[1] निरुद्धां वाचस् आह्वयन्ते उच्चारयन्ति ॥३॥

सुब्रह्मण्यां च ॥४॥[2]

सुब्रह्मण्यानिगदं सामवेदपठितं चाह्वयन्ते ॥४॥

अनधीयानः सुब्रह्मण्यो३म् इति त्रिः ॥५॥

इमं सुब्रह्मण्यानिगदम् अनधीयानः[3] सुब्रह्मण्यो ३ मित्येतावन्मात्रं त्रिः आह्वयते[4] ॥५॥

महाव्रते सुरूपकृत्नुमूतये (अ २०,५७,१-३) इत्याज्यस्तोत्रियः ॥६॥

एष प्रातःसवने स्तोत्रियो भवति, श्वःस्तोत्रियश्चानुरूपः ॥६॥

ईङ्खयन्तीरपस्युवः (अ २०,९३,४-८) इत्यावपते ॥क॥

पञ्चर्चं सूक्तम् आवापस्थान आवपते ॥क॥

अभिप्लवस्तोत्रियांश्च[5] ॥ख॥ ॥७॥[6]

आवपत इति संबन्धः । चकारः समुच्चयार्थः ॥ख॥७॥

माध्यन्दिने होत्रकाः कूर्चान् कृत्वोपविशन्ति ॥८॥[7]

माध्यन्दिने सवने ब्राह्मणाच्छंस्यादयो होत्रकाः दर्भकूर्चान्[8] कृत्वा तेपूपविशन्ति[9] ॥८॥

कुम्भिनीर्मार्जालीयं परियान्तीरनुमन्त्रयते —

गाव एव सुरभयो गावो गुग्गुलुगन्धयः ।
गावो घृतस्य मातरस्ता इह सन्तु भूयसीरिदं मधु ॥
न वै गावो मङ्गीरस्य गङ्गाया उदकं पपुः ।
पपुः सरस्वत्या[10] नद्यास्ताः प्राच्यः संजिगाहिर इदं मधु ॥

१-१. मनसा स्तोत्रे भा[1] A. २. तु. आश्रौ ८,१३, २८; काश्रौ १२, ४, २७; आपश्रौ २१,१२,१०. ३. ॰याना: A. ४. °ह्वयन्ते A. ५. स्तोत्रियंश्च वा पू. ६. तु. ऐआ ५,१,१;६. ७. तु. काश्रौ १३,३,१; आपश्रौ २१, १७, १५. ८. दर्भ कूर्चं भा[1] A; दर्भकूर्चं भा[2]. ९. भेपूप° भा[1]; दर्भेपूप° भा[1] A. १०. सरस्वत्यां वा पू.

एता वयं प्लवामहे शम्याः प्रतरता[1] इव ।
[2]निकीर्य तुभ्यमभ्य आसं गीः कोश्योष्यौर्यदा गिर[2] इदं मधु ॥
यदा राघटी [3]वरदो व्याघ्रं[3] मङ्गीरदासकौ[4] ।
जनः स भद्रमेधति राष्ट्रे राज्ञः परिक्षित इति ॥९॥[5]

इदं मध्विदं मधु इति ॥१०॥

गृहीतोदकपूर्णकुम्भाः स्त्रियो मार्जालीयं परियान्तीः सर्वतो भ्रमन्तीः चतुर्भिर्मन्त्रैरनुमन्त्रयते ॥९-१०॥

पत्नीशाले भूमिदुन्दुभिम् औक्षेणाऽपिनद्धं[6] पुच्छेनाऽऽघ्नन्ति उच्चैर्घोषः (अ ५,२०), उप श्वासय (अ ६,१२६) इति ॥११॥[7]

भूमिदुन्दुभिं गर्तदुन्दुभिं[8] गोचर्मणाऽपिनद्धं गोपुच्छेनैवाऽऽघ्नन्ति वादयन्ति । बहुवचनात् सर्वे ॥११॥

तीर्थदेशे राजानमन्यं वा मर्माणि ते (अ ७,११८) इति ॥१२॥[9]

संनद्धम् इन्द्रो जयाति (अ ६,९८) इत्यनुमन्त्रयते ॥१३॥

तीर्थदेशे चात्वालोत्करसमीपे महाराजजातीयम्[10] अधिपतिम् अन्यं वा तत्सदृशम् ऋचा संनद्धं सूक्तेनाऽनुमन्त्रयते ॥१२-१३॥

संनद्धाय मधुपर्कम् आहारयति ॥क॥

वर्मणा संनद्धाय राज्ञे उक्तेन विधिना मधुपर्कम् आहारयति ॥क॥

तं स ब्राह्मणेन प्रतिग्राहयति ॥ख॥ ॥१४॥

१. प्रतरताम् आपश्रौ; प्रचरता माश्रौ. २-२. निगीर्य तुभ्यं मध्य आकर्षे कुष्ठो यथा माश्रौ.; निकीर्यं तुभ्यं मध्य आकर्ष्येकर्ष्यो यथा आपश्रौ. ३-३. वदतो प्राम्यं माश्रौ. आपश्रौ. ४. °दासगो: (मदीरदासगौः वा) मूको. ५. तु. काश्रौ १३, ३, १९-२३; आपश्रौ २१, १९, १८; २०, ३; ५; माश्रौ ७, २, ७, १०; बौश्रौ १६, २३; [यत्र पाठान्तराणि च यथायथं द्र]. ६. औष्ट्रेणा° G; औक्षेणा° सा; औश्रोणा° भा[2]; ओश्रोणा° भा[1] A. ७. तु. काश्रौ १३, ३, २०; आपश्रौ २१, १८, २; १९, ८; लाश्रौ ३, १०, १९-११,२. ८. नास्ति भा[1] A. ९. तु. काश्रौ १३, ३, १०-१३; लाश्रौ ३, १०, १; ६.
१०. राजजा° A

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं समाहृतं मधुपर्कं स राजा ब्राह्मणेन प्रतिग्राहयति ॥ख॥१४॥

वनस्पते वीड्वङ्गः (अ ६, १२५) इत्यभिमन्त्रितं रथम् आरोहयति ॥१५॥

सूक्तेनाऽभिमन्त्रितं रथं तं राजानम् आरोहयति ॥१५॥

उद्धर्षन्ताम् (अ ३,१९,६-७) इत्यारूढम् अनुमन्त्रयते ॥१६॥

रथे 'आरूढम् ऋग्भ्याम्'[1] अनुमन्त्रयते ॥१६॥

अवसृष्टा परा पत (अ ३, १९,८) इति चतुर्थीम् इषुम् अवसृष्टाम्[2] ॥१७॥[3]

राजा चतुर्थीम् इषुं चर्मणाऽवसृष्टाम् ऋचाऽनुमन्त्रयते ॥१७॥

स यद्[4] ब्राह्मणधनं गृह्णाति तद् यजमानो निष्क्रीणाति ॥१८॥

स राजा तस्मिन् देशे यजमानसमीपे यद् ब्राह्मणधनं गोहिरण्यादि गृह्णाति तद् यजमानो गृहपतिः स्वेन धनेन निष्क्रीणाति ॥१८॥

त्रिकद्रुकेषु महिषः (अ २०, ९५,१), प्रो ष्वस्मै पुरोरथम् (अ २०, ९५,२) इति स्तोत्रियानुरूपौ ॥१९॥[5]

माध्यन्दिनस्य प्रकृतत्वाद् एतौ पृष्ठ्यस्तोत्रियानुरूपौ भवतः ॥१९॥

तीव्रस्याभिवयसो अस्य पाहि (अ २०, ९६) इति चतुर्विंशतिमावपते ॥२०॥[5]

एताश्चतुर्विंशतिम् ऋचः आवापस्थान आवपते ॥२०॥

अथ ज्योतिष्टोमेनाग्निष्टोमेनात्मनिष्क्रयणेन सहस्रदक्षिणेन पृष्ठशमनीयेन त्वरेत ॥२१॥[6]

अथ गवामयनसत्राद् अनन्तरम् एव त्रिवृत्पञ्चदशसप्तदशैकविंशज्योतिः-

---

१-१. °ढमृचाम् भा[2]; °ढऋचाम् भा[1]; °ढ ऋचाम् A. २. °वसृष्टं भा[1,2], G. ३. तु. काश्रौ १३,३,१६; लाश्रौ ३,१०,१२. ४. यदा G. ५. तु. ऐआ ५, १,१. ६. तु. गोब्रा १, ५,८; काश्रौ १३, ४, ५; आपश्रौ २१, २१,१; बौश्रौ १६, २३.

संज्ञकस्तोमयुक्तेनाऽग्निष्टोमसामसंस्थेन[1] आत्मनिष्क्रयणफलेन गोसहस्रदक्षिणेन पृष्ठशमनीयाख्येन क्रतुना त्वरेत अव्यवधानेन यजेत। नियमार्थं सूत्रम् ॥२१॥

इति वैतानकल्पे षष्ठेऽध्याये चतुर्थी कण्डिका ॥

[३५]

यथास्तुतम् अनुशंसति ॥१॥

स्तोतृभिः स्तोत्रियं यथा स्तुतं तथाऽनुशंसति। अनुशब्दः पश्चादर्थे यथाशब्दसादृश्यवचनात्। प्रगाथार्थे प्रगाथो बार्हतादिः। स्तोमनिमित्तश्च स्तोत्रियशब्दः ॥१॥

एकया द्वाभ्यां वा स्तोमम् अतिशंसेत् ॥२॥[2]

प्रातःसवने एकया ऋचा द्वाभ्यां वा ऋग्भ्यां स्तोमं पञ्चदशादिकम् अतीत्य[3] शंसेत् ॥२॥

न प्राग् द्वादशात् ॥क॥[4]

द्वादशस्तोमात् प्राक् एकया द्वाभ्यां वा स्तोमम् अतिशंसेत् इति नियमो न भवति। एकाद्येकादशान्तान् स्तोमान् अपरिमिताभिरप्यतिशंसति[5] ॥क॥

षडहस्तोत्रियाऽऽवापे च[6] ॥ख॥ ॥३॥[7]

अभिप्लवषडहस्तोत्रियाणां यस्मिन् क्रतावावापो भवति तत्र च नाऽयम् अतिशंसननियमः ॥ख॥३॥

अपरिमिताभिरुत्तरयोः सवनयोः ॥४॥[7]

उत्तरयोर्माध्यन्दिनतृतीयसवनयोरपरिमिताभिः ऋग्भिः स्तोमम् अतिशंसेत्। नाऽत्र नानुवृत्तिः[8]। विकृतिषु चायम् अतिशंसतिनियमः ॥४॥

छन्दोदैवतप्रतिरूपोऽनुरूपः ॥५॥

---

१. °म संगच्छेत् मूको. २. तु. गोब्रा २,६, ५; आश्रौ ७, १२, ४; शाश्रौ १२, २, १०; ११. ३. प्रतीत्य मूको. ४. तु. वैता ३१. १७; ३३, १. ५. तु. वैता ३५,४. ६. वा वा. ७. गोब्रा २,६,५; आश्रौ ७, १२, ५. ८. नाज्ञानात्र°भा[2]. नाज्ञान° भा[1] A.

Nepal.Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यच्छन्दस्को यद्देवत्यश्च[1] स्तोत्रियः तच्छन्दस्कस्तद्देवत्यः[2] अनुरूपोऽपि भवति ॥५॥

अप्रज्ञाने स्तोत्रियं द्विः ॥६॥

अनुरूपस्याऽप्रज्ञानेऽनुरूपार्थं[3] स्तोत्रियमेव पुनः शंसेत् ॥६॥

एकाहेषूर्ध्वम् अनुरूपाद् आवापः ॥७॥[4]

वाजपेयादिषु[5] एकाहेषु प्रातःसवने ऊर्ध्वम् अनुरूपाद् आवापो भवति अनन्तरं माध्यन्दिनवचनात्। अभिप्लवस्तोत्रियान् आवपते (वैता २७, ११) इति। यद्येकाविद्? एकाहेष्विति दीर्घसत्रेष्वेव[6] संबध्नाति[7] ॥७॥

प्रगाथान्माध्यन्दिने ॥८॥

एकाहेषु माध्यन्दिने सवने सामप्रगाथाद् अनन्तरम् आवापो भवति। अहीनसूक्तम् आवपते (वैता २७,१४) इति यथा ॥८॥

संवत्सर आरम्भणीयायाः[8] ॥क॥

गवामयनादौ संवत्सरे प्रातःसवनमाध्यन्दिनयोर् आरम्भणीयायाः ऊर्ध्वम् आवापो भवति आरम्भणीयोद्देशेन विधानात्। आभिप्लविकांस्तृतीयादीन् स्तोत्रियान् आवपते (वैता ३१, १७), अस्मा इदु प्र तवसे तुराय इत्यहीनसूक्तम् आवपते (वैता ३१,१९) इति यथा ॥क॥

श्वःस्तोत्रियोऽनुरूपः[9] ॥ख॥ ॥९॥[10]

संवत्सरे यः श्वःस्तोत्रियः सोऽद्यस्तोत्रियस्याऽनुरूपो[11] भवति ॥ख॥९॥

इन्द्रं वो विश्वतस्परि (अ २०,३९,१) इत्यारम्भणीया ॥१०॥[12]

संवत्सरे प्रातःसवनेऽनुरूपाद् अनन्तरम् एषा ऋग् आरम्भणीया भवति। आरभ्यते उक्थमुखम् अनयेत्यारम्भणीया ॥१०॥

१-१. छन्दस्कायदे (दं भा[1]) वत्य स मूको. २. तच्छन्दोस्तदे° मूको. ३. °रूपार्थः मूको. ४. तु. शांश्रौ १२,९,९. ५. दावापेयदि° भा[1] A मूको. ६. दीर्घसूत्रेव मूको. ७. °ध्नन्ति भा[1] A; ८. °यायाश्च वा G. ९. C यनि; यानु°पू भा[1,2] A; स्तोत्रियोनु° (°या° G) वा. १०. तु. गोब्रा २,५,१५; ऐब्रा ६,१७; आश्रौ ७, ४, ५. ११. तु. गोब्रा २, ५, १५। सद्यः स्तोत्रियानु° भा[1]; सद्यः स्तोत्रियायस्यान° भा[2]. १२. तु. गोब्रा २,५,१२; आश्रौ ७,२,१...

न्यन्तरिक्षम् अतिरत् (अ २०,३९,२-५) इति पर्यासः ॥११॥[1]

संवत्सरे प्रातःसवने एष[2] पर्यासो भवति। पर्यस्यते परिसमाप्यतेऽनेन शस्त्रमिति पर्यासः ॥११॥

माध्यन्दिने कन्नव्यो अतसीनाम् (अ २०, ५०) इति कद्वान् सामप्रगाथः ॥१२॥[3]

संवत्सरे माध्यन्दिने सवने प्राकृतस्य सामप्रगाथस्यैष प्रत्याम्नायकः सामप्रगाथो भवति कशब्दवान्[4] कद्वान् ॥१२॥

ब्रह्मणा ते ब्रह्मयुजा युनज्मि (अ २०, ८६, १) इत्यारम्भणीया ॥१३॥[5]

संवत्सरे माध्यन्दिनसवने सामप्रगाथाद् अनन्तरम् एषाऽऽरम्भणीया भवति ॥१३॥

अतिशंसनाय स्तोमान् व्याख्यास्यामः ॥१४॥

एकया द्वाभ्यां वा स्तोमम् अतिशंसेत् (वैता ३५, १) इत्यादिकस्याऽतिशंसनार्थं त्रिवृदादिस्तोमान् कथयिष्यामः ॥१४॥

गोराज्ये त्रिवृत् ॥क॥

अभिप्लवद्वितीयस्याह्नो गोः प्रातःसवने आज्यस्तोत्रे[6] त्रिवृत् स्तोमो भवति ॥क॥

पञ्चदश आयुषः ॥ख॥

अभिप्लवतृतीयस्याह्न आयुष आज्ये पञ्चदशः स्तोमो भवति ॥ख॥

उभयोः पृष्ठे सप्तदशः ॥ग॥

उभयोर्गवायुषोर्माध्यन्दिनस्तोत्रे सप्तदशः स्तोमो भवति ॥ग॥

उक्थ एकविंशः ॥घ॥ ॥१५॥

उभयोस्तृतीयसवनस्तोत्रे एकविंशः स्तोमो भवति ॥घ॥१५॥

---

१. तु. गोब्रा २,६,५; आश्रौ ७, २, १२. २. एक मूको. ३. तु. गोब्रा २,६,३; आश्रौ ७,४,६,९. ४. कशब्द भा[1]. ५. तु. गोब्रा २,६,४; आश्रौ ७,४,७. ६. स्तोत्रे मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ्ये[1] त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाः ॥१६॥

पृष्ठ्ये षडहे यथाक्रमम् आज्यपृष्ठोक्थस्तोत्रेषु त्रिवृदादयः स्तोमा भवन्ति ॥१६॥

अभिजिद्विश्वजितोराज्ये पञ्चदशैकविंशौ ॥क॥

एतयोः क्रत्वोः प्रातःसवनस्तोत्रे यथाक्रमं पञ्चदशैकविंशौ[1] स्तोमौ भवतः ॥क॥

पृष्ठे त्रिणवत्रयस्त्रिंशौ ॥ख॥ ॥१७॥

माध्यन्दिनसवनस्तोत्रे यथाक्रमं[2] त्रिणवत्रयस्त्रिंशौ स्तोमौ भवतः ॥ख॥१७॥

[3]स्वरसामसु सप्तदशः[3] ॥१८॥

स्वरसामाख्येषु क्रतुषु सप्तदशः स्तोमो भवति ॥१८॥

विषुवत्येकविंशः ॥१९॥

विषुवति[1] एकविंशः स्तोमो भवति ॥१९॥

छन्दोमेषु चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशाः ॥२०॥

छन्दोमाख्येषु क्रतुषु यथाक्रमं चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशाः स्तोमा भवन्ति ॥२०॥

दशम आज्यपृष्ठयोरेकविंशः ॥२१॥

दशरात्रदशमेऽहनि प्रातःसवनमाध्यन्दिनयोः एकविंशः स्तोमो भवति ॥२१॥

महाव्रते पञ्चविंशः ॥२२॥

महाव्रताख्ये क्रतावाज्यपृष्ठयोः पञ्चविंशः स्तोमो भवति । पञ्चविंशाख्यया[4] स्तोमनियमः ॥२२॥

---

१. °ष्ठे भा[1] A वा G. २. नास्ति मूको. ३-३. नास्ति भा[1] A.
४. चतुर्विंशोख्यया मूको.

सर्वत्र संस्थास्तोमस्तोत्रियं सामवेदप्रत्ययं[1] सामवेदप्रत्ययम्[2] ॥२३॥

इत्यथर्ववेदे वैतानश्रौतसूत्रे षष्ठोऽध्यायः समाप्तः ।

संस्था अग्निष्टोमादिः । स्तोमस्त्रिवृदादिः । स्तोत्रियः आ याहि सुषुमा हि ते (अ २०,३) इत्यादिः । एतत् त्रयं सामवेदप्रत्ययमित्यवगन्तव्यम् । सर्वत्र-ग्रहणाद्[3] उक्तेषु संस्थादिष्वनुक्तेषु च सामवेदप्रत्ययमेव । सामवेदसर्वशाखा-परिग्रहणार्थं च सामग्रहणम् । प्रत्यये तस्मिन् स्तोत्रियादिविधानं स्ववेदानु-सरणात्[4] । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥२३॥

इति कौशिकीये वैतानकल्पे सोमादित्यस्याऽऽक्षेपानुविधौ
षष्ठेऽध्याये पञ्चमी कण्डिका ॥
षष्ठोऽध्यायः समाप्तः ॥

---

१. °त्ययः भा[1,2] A. २. नास्ति भा[1,2], A. ३. सर्वप्र° मूको
४. स्वरानुस° A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

अथ सप्तमोऽध्यायः

[३६]

अथ राजसूयः ॥१॥[१]

अथेत्यधिकारे । राजसूय इति पवित्रादिपवित्रान्तस्य कर्मसमुदायस्याऽऽख्या सूय इति समुदायशब्दत्वात् । राजक्रतुश्चायं समाख्यानात् ॥१॥

तैष्याः पुरस्तात् पवित्रः ॥२॥[२]

तत्र राजसूये तैष्याः पौर्णमास्याः पुरस्ताद् पवित्रो नाम क्रतुर्भवति ॥२॥

मासान्तरेषु दश संसृपः ॥३॥[३]

अस्मिन् राजसूये मासानाम् अन्तरालेषु 'संसृपाख्या दश क्रतवो न्ते[४] ॥३॥

फाल्गुन्या अभिषेचनीयः ॥४॥[५]

फाल्गुन्याः पौर्णमास्याः पुरस्ताद् अभिषेचनीयाऽऽख्यः[६] क्रतुर्भवति । तैष्याः भक्तिसामान्यात् ॥४॥

मरुत्वतीयाद् बार्हस्पत्येष्टिः ॥५॥[७]

अस्मिन्नभिषेचनीये मरुत्वतीयग्रहाद् अनन्तरं बार्हस्पत्याऽऽख्ये- ष्टिः ॥५॥

हविर्धानयोः पुरस्ताद् वैयाघ्रचर्मोपबर्हणायाम्[१] आसन्द्याम् भूतो भूतेषु (अ ४,८) इत्यारोहयत्याभिषिञ्चति च[२] ॥६-७॥[३]

हविर्धानयोः सोमप्रवहणयोः[४] पुरस्ताद् पूर्वेण वैयाघ्रेण चर्मणाच्छादितायाम् आसन्द्यां सूक्तेन यजमानम् आरोहयति । तस्याम् आरूढं सूक्ताभिमन्त्रितेनोदपात्रेणाभिषिञ्चति । चकारः क्रियासमुच्चयार्थः ॥६-७॥

फाल्गुन्या[५] दशपेयः ॥८॥[६]

फाल्गुन्याः पौर्णमास्याः पुरस्ताद् दशपेयाख्यः क्रतुर्भवति ॥८॥

सांवत्सरिकाणि चातुर्मास्यानि ॥९॥[७]

दशपेयाद् अनन्तरं सांवत्सरिकाणि चातुर्मास्यानि वैश्वदेवादीनि उक्तविधिकानि[८] भवन्ति ॥९॥

संस्थितेषु चैत्र्याः प्रत्यवरोहणीयः ॥१०॥

संवत्सरेण समाप्तेषु चातुर्मास्येषु पुनरागतायाः चैत्र्याः पौर्णमास्याः पुरस्ताद् प्रत्यवरोहणीयाख्यः क्रतुर्भवति ॥१०॥

वैशाख्या व्युष्टिद्व्यहः ॥११॥[९]

वैशाख्याः पौर्णमास्याः पुरस्ताद् व्युष्ट्याख्यो द्व्यहो गवायुःप्रकृतिको भवति ॥११॥

ज्येष्ठ्याः क्षत्रधृतिः ॥१२॥[१०]

ज्येष्ठ्याः पौर्णमास्याः पुरस्तात् क्षत्रधृत्याख्यः क्रतुर्भवति ॥१२॥

तु. काश्रौ १५, १,१; आपश्रौ १८, ८,१. २. तु. काश्रौ १५,१,३-५; १८, ८,४; बौश्रौ १२,१. ३. तु. काश्रौ १५, ८,१; आपश्रौ १८, २०, श्रौ १२, १७. ४-४. दश संसृपाख्यो (ख्यौ भा[१]) दश संसृपो को. ५. तु. काश्रौ १५, ३, ३५; आपश्रौ १८, ११, ७ प्रभृ. नीयः भा[१] A. ७. तु. काश्रौ १५, ३, २७-३५; ५,१; आपश्रौ , ८-२३; आश्रौ ९,३,१.

१. तु. सा.(अ ४, ८ भू.); °घ्रं च°[१] भा[१,२] A G. २. नास्ति भा[१,२] था A. च. ३. तु. काश्रौ १५, ५, २५; ३०; आपश्रौ १८, १५, ५; १६, ३. ४. तु. आश्रौ ४, ९, २; °मयोस्त्ये (स्ते A) न पिवहणयोः भा[१] A; °नयोस्तेन पिवहणयोः भा[१]. ५. फाल्गुन्या पू भा[१,२] A. ६. तु. काश्रौ १५, ८, १४; आपश्रौ १८, २०, ११. ७. तु. बौश्रौ १२, २; काश्रौ १५, १, १५-१७; आपश्रौ १८, ९, ३-५. ८. तु. वैता ८, ९; °क्तविधिना भा[१] A. ९. तु. काश्रौ १५, ९,१७-१८; आपश्रौ १८, २२, १२-१५. १०. तु. काश्रौ १५, ९, १९; आपश्रौ १८, २२, १८-१९.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैश्रवणः इति पिशाचविद्यावेदाऽऽख्यानान्ते करत् इति । तथा अर्बुदः काद्रवेयः इति सर्पविद्यावेदाऽऽख्यानान्ते वृधत् इति । तथा [1]असुरो धान्वनः[1] इत्यसुरविद्यावेदाऽऽख्यानान्ते रुहत् इति । तथा [2]मत्स्यः सामदः[2] इतीतिहासविद्यावेदाऽऽख्यानान्ते[3] महत् इति । तथा तार्क्ष्यो वैवस्वतः[4] इति पुराणविद्यावेदाऽऽख्यानान्ते तद् इति । तथा धर्म इन्द्रः इति सामवेदाऽऽख्यानान्ते स्वः इति यजमानं वाचयतीति प्रत्यहम् एकैकम् आख्यानं भवति, संवत्सरानुवृत्तेः, संवत्सरं यावत् ॥२४॥

संवत्सरान्ते दीक्षणम् ॥क॥

सावित्र्यादि पारिप्लवान्तं यथोक्तं संवत्सरम् अभ्यस्य संवत्सरान्ते दीक्षणं भवति ॥क॥

एकविंशतिर्दीक्षाः ॥ख॥ ॥२५॥[5]

द्वादशाऽहीनस्य (वैता १३,१) इति प्राप्ते एकविंशतिर्विधीयन्ते ॥ख॥२५॥

अभिप्लवप्रथमवत् प्रथमम् अहः ॥क॥

अश्वमेधस्य प्रथमम् अहः[6] अभिप्लवप्रथमेनाऽह्ना तुल्यं भवति ॥क॥

पृष्ठ्यचतुर्थवद् द्वितीयम् ॥ख॥ ॥२६॥

अश्वमेधस्य द्वितीयम् अहः पृष्ठ्यषडहस्य चतुर्थेनाऽह्ना तुल्यं भवति ॥ख॥२६॥

बहिष्पवमानाद् अश्वं नियुज्यमानम् अनुमन्त्रयते —

सं त्वां गन्धर्वाः समु युञ्जन्त्वापो नद्योः सांवैधे परिवत्सराय ।

ये त्वा रक्षन्ति सदमप्रमादं तेभ्य आयुः सविता बोधि गोपाय इति ॥२७॥[7]

द्वितीयेऽहनि बहिष्पवमानाद् अनन्तरम् अश्वं नियुज्यमानम् आप्लाव्यमानम् अनुमन्त्रयते ॥२७॥

१-१. असितो धान्वः आश्रौ. २-२. मत्स्यः सामवेदः मूको. ३. इतिहास° मूको. ४. वैपश्चितः आश्रौ. ५. तु. काश्रौ २०, ४, १३. ६. नास्ति भा[१२]. ७. तु. काश्रौ २०, ६,२; आपश्रौ २०, १३,११.

दिव्यो गन्धर्वः (अ २,२,१) इत्येतया कौशिकः[1] ॥२८॥

कौशिकाचार्य एतया ऋचा नियुज्यमानम् अनुमन्त्रयत इति मन्यते ॥२८॥

संज्ञप्तं महिषीम् उपवेश्याऽधीवाससा संप्रोर्णुवन्ति ॥२९॥[2]

संज्ञप्तम् अश्वं महिषीं मुख्यां पत्नीम् उपवेश्योपरिवाससा प्रोर्णुवन्ति आच्छादयन्ति अध्वर्यवो मन्त्राम्नानात्[3] ॥२९॥

तौ यजमानोऽभिमेथति —

स्वर्गेण लोकेन संप्रोर्णुवायाम् अधाम सक्थ्योरव गुदं धेहि ।

[4]अर्वाञ्चिम् अञ्जिम् आभर[4] यत् स्त्रीणां जीवभोजनम् इति ॥३०॥[5]

अश्वमहिष्यौ तथाभूते[6] यजमानोऽनेन मन्त्रेण अभिमेथति आक्रोशति ॥३०॥

होत्रभिमेथनाद् एवं वावातां ब्रह्मा —

ऊर्ध्वाम् एनाम् उच्छ्रयताद् गिरौ भारं हरन्निव ।

अथास्यै मध्यम् एधतु शीते वाते पुनन्निव इति ॥३१॥[7]

यजमानाभिमेथनाद्[8] अनन्तरं महिषीमेव स्वेन विधिना होताऽभिमेथति । तस्माद् होत्रभिमेथनाद् अनन्तरं संज्ञप्तम् उपविष्टाम् अधीवाससाऽऽच्छादितां द्वितीयां पत्नीं ब्रह्माऽभिमेथति ऊर्ध्वाम् एनाम् इत्यनेन मन्त्रेण ॥३१॥

ऊर्ध्वम् एनम् इत्यनुचर्यो ब्रह्माणम्[9] ॥३२॥[10]

वावाताऽनुचर्यो ब्रह्माणम्[9] अनेनैव पुंलिङ्गविकृतेनाऽभिमेथन्ति ॥३२॥

---

१. कौशिकिः भा[१] A. २. तु. काश्रौ २०,६,१४-१५; आपश्रौ २०, १७, १७;१८,३. ३. मन्त्रनाम्ना मूको. ४-४. अर्वाचिमंचेमा° वा; अर्वाचिमंचिमा° पू. ५. तु. मा २३,२०;२१; काश्रौ २०,६,१६-१७; आपश्रौ २०, १८,४. ६. °भूतौ मूको. ७. तु मा २३,२६,२७; काश्रौ २०, ६,१८; आश्रौ १०, ८,१३; शांश्रौ १६,४,३. ८. °मानो हि मेथनात् मूको. ९-९. ब्राह्मणम् A. १०. तु. मा २३,३७; काश्रौ २०,६,२० ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आषाढ्याः पवित्रः संस्थित्यै ॥१३॥

आषाढ्याः पौर्णमास्याः पुरस्तात् पुनः पवित्राख्यः क्रतुर्भवति [1]राजसूयस्य संस्थित्यै[1] समाप्त्यर्थम्[2] । इति राजसूयः ॥१३॥

अथाश्वमेधः ॥१४॥[3]

अथेत्यधिकारार्थः । अश्वमेध इति कर्मनाम ॥१४॥

फाल्गुन्या ब्रह्मौदनम् उद्गातृचतुर्थेभ्यो ददाति ॥१५॥[4]

फाल्गुन्याः पौर्णमास्याः पुरस्ताद् उद्गातृचतुर्थेभ्यो ब्रह्मौदनं यजमानो ददाति ॥१५॥

हुतायां प्रातराहुतौ ब्रह्मणे वरम् ॥१६॥[5]

चतुर्दश्यां ब्रह्मौदनं दत्त्वा पौर्णमास्यां प्रातरग्निहोत्राहुतौ हुतायां ब्रह्मणे वरं ददाति ॥१६॥

आग्नेयीष्टिः ॥क॥[6]

भवतीति शेषः ॥क॥

पौष्णी च ॥ख॥ ॥१७॥[7]

इष्टिर्भवतीति शेषः[8] । चकारः समुच्चयार्थः ॥ख॥१७॥

वातरंहा भव (अ ६,९ २) इत्यश्वं नियुज्यमानम् अनुमन्त्रयते ॥१८॥[9]

सूक्तेनाऽश्वम् अध्वर्युणा बध्यमानम् अनुमन्त्रयते ॥१८॥

अभि त्वा जरिमाहित (अ ३,११,८) इत्युन्मुच्यमानम् ॥१९॥

ऋचोन्मुच्यमानम् अनुमन्त्रयते ॥१९॥

१-१ °सूयसं° मूको. २. समाप्त्यर्थः मूको. ३. तु. काश्रौ २०, १, १; आपश्रौ २०, १,१. ४. तु. काश्रौ २०, १,२-४; आपश्रौ २०, २, ३-५. ५. तु. काश्रौ २०, १,१९. ६. तु. काश्रौ २०, १, २१-२३. ७. तु. काश्रौ २०, १, २४. ८. नास्ति मूको. ९. तु. काश्रौ २०, १, २६; आपश्रौ २०,३,५.

आशापालीयेनोत्सृष्टम् ॥२०॥[1]

आशानामाशापालेभ्यः (अ १,३१) इति[2] सूक्तेनोत्सृष्टम् अनुमन्त्रयते ।

संवत्सरं सावित्र्यस्तिस्र इष्टयः ॥२१॥[3]

अस्योत्सर्गाद् अनन्तरं संवत्सरं यावत् प्रत्यहं सावित्र्यस्तिस्र भवन्ति ॥२१॥

पारिप्लवाऽऽख्यानाय[4] दक्षिणेन वेदिं हिरण्मयेष्वासनेषु विशन्ति ॥२२॥[5]

पारिप्लवम् आख्यानं दशमान्तं[6] होताऽऽचष्टे । तस्मै आख[...] तदर्थं सर्वे दक्षिणतो वेदेः[7] हिरण्मयेषु आसनेषु उपविशन्ति संबद्धाः ॥२२॥

कशिपूपबर्हणं ब्रह्मणः ॥क॥

हिरण्मयाऽऽसनाऽऽच्छादनं कशिपुः[8] ब्रह्मणो[9] भवति ॥क॥

कूर्चो यजमानस्य ॥ख॥ ॥२[...]

दर्भकूर्चो यजमानाऽऽसनोपबर्हणं[10] भवति ॥ख॥२३॥

आख्यानेषु यथावेदं व्याहृतीर्वाचयति ॥२४॥[11]

पारिप्लवाऽऽख्यानेषु मनुः प्रजापतिः[12] इत्यादिषु दशसु भूराद्या [...] ऋग्वेदादि यथावेदं वाचयति। यथा—मनुः प्रजापतिः[12] इत्यस्य ऋग्वेदा[...] नस्यान्ते भूः इति वाचयति । यथा—यमो वैवस्वतः इति यजुर्वेदाऽऽख्या[...] भुवः इति । यथा— सोमो वैष्णवः इत्यथर्ववेदाऽऽख्यानस्यान्ते ओम[...] यथा—वरुण आदित्यः इति आङ्गिरसवेदाऽऽख्यानान्ते[13] जनत् इति । यथा-[...]

---

१. तु. काश्रौ २०, २, १२; आपश्रौ २०, ५,९. २. नास्ति [...] ३. तु. काश्रौ २०, २, ६; आपश्रौ २०, ६, १;६. ४. परिप्लवनाख[...] A. ५. तु. काश्रौ २०,२,१८-२२; आपश्रौ २०, ६,७-९. ६. [...] १०, ७; दशाकांत मूको. ७. वेदिः मूको. ८. कसि° भा[1] A. ९[...] मूको. १०. °नासनेपूप° मूको. ११. तु. गोब्रा १, १, ६; १०[...]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदसि होत्रध्वर्य्वोर्ब्रह्मोद्याद् ब्रह्मोद्गातारं पृच्छति ॥३३॥

सदसि होत्रध्वर्य्वोर्मिथो ब्रह्मोद्यं भवति[1]। तस्माद् अनन्तरं ब्रह्मा उद्गातारं पृच्छति पृच्छामि त्वा[2] अनेन मन्त्रेण ॥३३॥

इति वैतानकल्पे सप्तमेऽध्याये प्रथमा कण्डिका ॥

[३७]

पृच्छामि त्वा चितये देवसख यदि त्वं तत्र मनसा जगन्थ ।
केषु विष्णुस्त्रिषु पदेषु जिष्णुः केष्विदं विश्वं भुवनमाविवेश
इति ॥१॥[3]

तस्य प्रतिप्रश्नाद् आह —
पञ्चस्वन्तः पुरुष आविवेश तान्यन्तः पुरुष आर्पितानि ।
एतत्त्वात्र प्रतिमन्वानो अस्मि [4]न यज्ञपा[4] भवस्युत्तरो[5] मत् ॥[6]
न त्वं परोऽवरो मन्त्र पूर्वः किमङ्ग वा मतिमन् क्षम तेन ।
शिक्षेण्या वदसि वाचम् एनां न मया त्वं संसमको भवासि[7]
इति ॥२॥[8]

ब्रह्मप्रश्नाद् अनन्तरम् उद्गातोत्तरम् आह वाकोवाक्यन्यायेन । प्रश्नस्योत्तरम्[9] उक्त्वा प्रतिप्रश्नम् आहोद्गाता । तस्याङ्गाद् प्रतिप्रश्नाद् अनन्तरं ब्रह्मा प्रतिप्रश्नोत्तरम् आह पञ्चस्वन्तः[10] इति ॥१-२॥

निष्क्रम्य सर्वे यजमानं पृच्छामि त्वा परमन्तं पृथिव्याः (अ ९, १०,१३) इति ॥क॥

सदसः सर्वे निष्क्रम्य यजमानमाहुः[11] प्रश्नमन्त्रम् ॥क॥

---

१. भाषति भा[1] A. २. नास्ति मूको. ३. तु. मा २३,४९. ४-४. नपा वा पू. ५-५. भवास्युत्तमो व वा पू. ६. तु. मा २३, ५२. ७. भवामि (°नि वा) वा पू. ८. तु. काश्रौ २०, ७, १०-११; आपश्रौ २०, १९, ६-७; आश्रौ १०, ९, २; शाश्रौ १६, ५,२-६; लाश्रौ ९,१०, ९-१२. ९. प्रश्ने उत्त° मूको. १०. एवं स्वतः मूको. ११. °मानप्राह भा[1] A.

इयं वेदिः (अ ९,१०,१४) इति यजमानः ॥ख॥ ॥३॥[1]

यजमान ऋत्विक्प्रश्नस्योत्तरमाह ॥ख॥३॥

तृतीये चतुर्विंशवद् द्वे सवने ॥४॥

अश्वमेधतृतीयेऽहनि प्रातःसवनमाध्यन्दिने द्वे सवने चतुर्विंशेनाह्ना तुल्ये भवतः ॥४॥

प्राकृतावाज्यस्तोत्रियानुरूपौ ॥५॥

प्राकृतौ ज्योतिष्टोमायनिकौ[2] आ याहि सुषुमा हि ते (अ २०,३, १), आ नो याहि सुतावतः (अ २०, ४,१) इति प्रातःसवने स्तोत्रियानुरूपौ भवतः ॥५॥

तृतीयसवनाद्यतिरात्रवत् ॥६॥[3]

आश्वमेधिकस्य[4] तृतीयस्याह्नः[5] तृतीयसवनादि पदार्थजातम् अतिरात्रेण तुल्यं भवति ॥६॥

संस्थिते पञ्चपशुर्विंशाखयूपः[6] ॥७॥[7]

तृतीयेऽहनि संस्थिते पञ्चपशुर्विंशाखयूपो यागो भवति ॥७॥

प्रत्यृतु षट् पशव आग्नेया ऐन्द्रा मारुता मैत्रावरुणा ऐन्द्रावरुणा आग्नावैष्णवा इति ॥८॥[8]

प्रत्यृतु षट् पशव इत्याद्याग्नावैष्णवा इत्यन्तं सूत्रम् । वसन्तादिषु प्रत्यृतु आग्नेयादयः षट् पशवो यथाक्रमं भवन्ति ॥८॥

---

१. तु. काश्रौ २०, ७,१४-१५; आपश्रौ २०, १९,६-७; बौश्रौ १५, २९,२;
आश्रौ १०, ९,२-३; शाश्रौ १६, ६,२-३; लाश्रौ ९, १०,१३-१४. २. ज्योति-
ष्टोमानि भा[1] A; ज्योतिष्टोमानिकौ भा[2]. ३. तु. आश्रौ १०, १०,८; शाश्रौ
१६, ८,२१; काश्रौ २०, ८, १२-१४; आपश्रौ २०, २२, ३. ४. आसव मूको.
५. नास्ति भा[1] A. ६. °विंशाल्यूपः आपश्रौ, बौश्रौ, हिश्रौ. ७. तु.
शाश्रौ १६, ९, २५; आपश्रौ २०, २२, १४;२३,७; बौश्रौ १५, १४; हिश्रौ १४,
५,११. ८. तु. काश्रौ २०, ८, ३०; आपश्रौ २०, २३, १०-११; बौश्रौ १५,
३८; शाश्रौ १६,९,२६-३२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आषाढ्याः पवित्रः संस्थित्यै ॥१३॥

आषाढ्याः पौर्णमास्याः पुरस्तात् पुनः पवित्राख्यः क्रतुर्भवति [1]राजसूयस्य संस्थित्यै[1] समाप्त्यर्थम्[2]। इति राजसूयः ॥१३॥

अथाश्वमेधः ॥१४॥[3]

अथेत्यधिकारार्थः। अश्वमेध इति कर्मनाम ॥१४॥

फाल्गुन्या ब्रह्मौदनम् उद्गातृचतुर्थेभ्यो ददाति ॥१५॥[4]

फाल्गुन्याः पौर्णमास्याः पुरस्ताद् उद्गातृचतुर्थेभ्यो ब्रह्मौदनं यजमानो ददाति ॥१५॥

हुतायां प्रातराहुतौ ब्रह्मणे वरम् ॥१६॥[5]

चतुर्दश्यां ब्रह्मौदनं दत्त्वा पौर्णमास्यां प्रातरग्निहोत्राहुतौ हुतायां ब्रह्मणे वरं ददाति ॥१६॥

आग्नेयीष्टिः ॥क॥[6]

भवतीति शेषः ॥क॥

पौष्णी च ॥ख॥ ॥१७॥[7]

इष्टिर्भवतीति शेषः[8]। चकारः समुच्चयार्थः ॥ख॥१७॥

वातरंहा भव (अ ६,९ २) इत्यश्वं नियुज्यमानम् अनुमन्त्रयते ॥१८॥[1]

सूक्तेनाऽश्वम् अध्वर्युणा बध्यमानम् अनुमन्त्रयते ॥१८॥

अभि त्वा जरिमाहित (अ ३,११,८) इत्युन्मुच्यमानम् ॥१९॥

ऋचोन्मुच्यमानम् अनुमन्त्रयते ॥१९॥

१-१ °सूयसं° मूको. २. समाप्त्यर्थः मूको. ३. तु. काश्रौ २०, १, १; आपश्रौ २०, १,१. ४. तु. काश्रौ २०, १,२-४; आपश्रौ २०, २, ३-५. ५. तु. काश्रौ २०, १,१९. ६. तु. काश्रौ २०, १, २१-२३. ७. तु. काश्रौ २०, १, २४. ८. नास्ति मूको. ९. तु. काश्रौ २०, १, २६; आपश्रौ २०,३,५.

आशापालीयेनोत्सृष्टम् ॥२०॥[1]

आशानामाशापालेभ्यः (अ १,३१) इति[2] सूक्तेनोत्सृष्टम् अनुमन्त्रयते ॥२०॥

संवत्सरं साविज्यस्तिस्र इष्टयः ॥२१॥[3]

अस्योत्सर्गाद् अनन्तरं संवत्सरं यावत् प्रत्यहं साविज्यस्तिस्र इष्टयो भवन्ति ॥२१॥

पारिप्लवाऽऽख्यानाय[4] दक्षिणेन वेदिं हिरण्मयेष्वासनेषु उपविशन्ति ॥२२॥[5]

पारिप्लवम् आख्यानं दशमान्तं[6] होताऽऽचष्टे। तस्मै आख्यानाय, तदर्थं सर्वे दक्षिणतो वेदेः[7] हिरण्मयेषु आसनेषु उपविशन्ति कर्मसंबद्धाः ॥२२॥

कशिपूपबर्हणं ब्रह्मणः ॥क॥

हिरण्मयाऽऽसनाऽऽच्छादनं कशिपुः[8] ब्रह्मणो[9] भवति ॥क॥

कूर्चो यजमानस्य ॥ख॥ ॥२३॥

दर्भकूर्चो यजमानाऽऽसनोपबर्हणं[10] भवति ॥ख॥२३॥

आख्यानेषु यथावेदं व्याहृतीर्वाचयति ॥२४॥[11]

पारिप्लवाऽऽख्यानेषु मनुः प्रजापतिः[12] इत्यादिषु दशसु भूराद्या व्याहृतीः ऋग्वेदादि यथावेदं वाचयति। यथा—मनुः प्रजापतिः[12] इत्यस्य ऋग्वेदाऽऽख्यानस्यान्ते भूः इति वाचयति। यथा—यमो वैवस्वतः इति यजुर्वेदाऽऽख्यानस्यान्ते भुवः इति। यथा— सोमो वैष्णवः इत्यथर्ववेदाऽऽख्यानस्यान्ते ओम् इति। यथा—वरुण आदित्यः इति आङ्गिरसवेदाऽऽख्यानान्ते[13] जनत् इति। यथा—कुबेरो

---

१. तु. काश्रौ २०, २, १२; आपश्रौ २०, ५,९. २. नास्ति भा[1] A. ३. तु. काश्रौ २०, २, ६; आपश्रौ २०, ६, १;६. ४. परिप्लवनाख्या° भा[1] A. ५. तु. काश्रौ २०,२,१८-२२; आपश्रौ २०, ६,७-९. ६. तु. आश्रौ १०, ७; दशाकांत मूको. ७. वेदिः मूको. ८. कसि° भा[1] A. ९. ब्रह्मणे मूको. १०. °नासनेषूप° मूको. ११. तु. गोब्रा १, १, ६; १०. १२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदसि होत्रध्वर्य्वोर्ब्रह्मोद्याद् ब्रह्मोद्गातारं पृच्छति ॥३३॥

सदसि होत्रध्वर्य्वोर्मिथो ब्रह्मोद्यं भवति[1]। तस्माद् अनन्तरं ब्रह्मा उद्गातारं पृच्छति पृच्छामि त्वा[2] अनेन मन्त्रेण ॥३३॥

इति वैतानकल्पे सप्तमेऽध्याये प्रथमा कण्डिका ॥

[३७]

पृच्छामि त्वा चितये देवसख यदि त्वं तत्र मनसा जगन्थ ।
केषु विष्णुस्त्रिषु पदेषु जिष्णुः केष्विदं विश्वं भुवनमाविवेश
इति ॥१॥[3]

तस्य प्रतिप्रश्नाद् आह—

पञ्चस्वन्तः पुरुष आविवेश तान्यन्तः पुरुष आर्पितानि ।
एतत्त्वात्र प्रतिमन्वानो अस्मि [4]न यज्ञपा[4] भवस्युत्तरो[5] मत् ॥[6]
न त्वं परोऽवरो मन्त्र पूर्वः किमङ्ग वा मतिमन् क्षम तेन ।
शिक्षेर्ण्या वदसि वाचम् एनां न मया त्वं संसमको भवासि[7]
इति ॥२॥[8]

ब्रह्मप्रश्नाद् अनन्तरम् उद्गातोत्तरम् आह वाकोवाक्यन्यायेन । प्रश्नस्योत्तरम्[9] उक्त्वा प्रतिप्रश्नम् आहोद्गाता। तस्याङ्गात् प्रतिप्रश्नाद् अनन्तरं ब्रह्मा प्रतिप्रश्नोत्तरम् आह पञ्चस्वन्तः[10] इति ॥१-२॥

निष्क्रम्य सर्वे यजमानं पृच्छामि त्वा परमन्तं पृथिव्याः (अ ९, १०,१३) इति ॥क॥

सदसः सर्वे निष्क्रम्य यजमानमाहुः[11] प्रश्नमन्त्रम् ॥क॥

१. भाषति भा[1] A. २. नास्ति मूको. ३. तु. मा २३,४९. ४-४. नपा वा पू. ५-५. भवास्युत्तमो य वा पू. ६. तु. मा २३, ५२. ७. भवामि (°नि वा) वा पू. ८. तु. काश्रौ २०, ७, १०-११; आपश्रौ २०, १९, ६-७; आश्रौ १०, ९, २; शाश्रौ १६, ५,२-६; लाश्रौ ९,१०, ९-१२. ९. प्रश्ने उत्त° मूको. १०. एवं स्वतः मूको. ११. °मानप्राह भा[1] A.

इयं वेदिः (अ ९,१०,१४) इति यजमानः ॥ख॥ ॥३॥[1]

यजमान ऋत्विक्प्रश्नस्योत्तरमाह ॥ख॥३॥

तृतीये चतुर्विंशवद् द्वे सवने ॥४॥

अश्वमेधतृतीयेऽहनि प्रातःसवनमाध्यन्दिने द्वे सवने चतुर्विंशेनाह्ना तुल्ये भवतः ॥४॥

प्राकृतावाज्यस्तोत्रियानुरूपौ ॥५॥

प्राकृतौ ज्योतिष्टोमायनिकौ[2] आ याहि सुषुमा हि ते (अ २०,३, १), आ नो याहि सुतावतः (अ २०, ४,१) इति प्रातःसवने स्तोत्रियानुरूपौ भवतः ॥५॥

तृतीयसवनाद्यतिरात्रवत् ॥६॥[3]

आश्वमेधिकस्य[4] तृतीयस्याह्नः[5] तृतीयसवनादि पदार्थजातम् अतिरात्रेण तुल्यं भवति ॥६॥

संस्थिते पञ्चपशुर्विंशाखयूपः[6] ॥७॥[7]

तृतीयेऽहनि संस्थिते पञ्चपशुर्विंशाखयूपो यागो भवति ॥७॥

प्रत्यृतु षट् पशव आग्नेया ऐन्द्रा मारुता मैत्रावरुणा ऐन्द्रावरुणा आग्नावैष्णवा इति ॥८॥[8]

प्रत्यृतु षट् पशव इत्याद्याग्नावैष्णवा इत्यन्तं सूत्रम् । वसन्तादिषु प्रत्यृतु आग्नेयादयः षट् पशवो यथाक्रमं भवन्ति ॥८॥

१. तु. काश्रौ २०, ७,१४-१५; आपश्रौ २०, १९,६-७; बौश्रौ १५, २९,२; आश्रौ १०, ९,२-३; शाश्रौ १६, ६,२-३; लाश्रौ ९, १०,१३-१४. २. ज्योतिष्टोमानि भा[1] A; ज्योतिष्टोमानिकौ भा[2]. ३. तु. आश्रौ १०, १०,८; शाश्रौ १६, ८,२१; काश्रौ २०, ८, १२-१४; आपश्रौ २०, २२, ३. ४. आसव मूको. ५. नास्ति भा[1] A. ६. °र्विंशाल्यूपः आपश्रौ, बौश्रौ, हिश्रौ. ७. तु. शाश्रौ १६, ९, २५; आपश्रौ २०, २२, १४;२३,७; बौश्रौ १५, १४; हिश्रौ १४, ५,११. ८. तु. काश्रौ २०, ८, ३०; आपश्रौ २०, २३, १०-११; बौश्रौ १५, ३८; शाश्रौ १६,९,२६-३२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशाखयूपर्तुपशवो द्विगुणाः पुरुषमेधे, चतुर्गुणाः सर्वमेधे ॥९॥[१]

विशाखयूपे ये पञ्च पशवः, ये च प्रत्यृतु षट् पशवः, ते उभयेऽपि द्विगुणाः पुरुषमेधे भवन्ति । सर्वमेधे चतुर्गुणा भवन्ति ॥९॥

पुरुषमेधोऽश्वमेधवत् ॥१०॥

पुरुषमेधाऽऽख्यः क्रतुः अश्वमेधेन तुल्यो भवति ॥१०॥

चैत्र्याः पुरस्ताद् वरदानान्त इष्टयो अग्नये कामाय दात्रे पथिकृते ॥११-१२॥[२]

चैत्र्याः पुरस्तादित्यादि पथिकृत इत्यन्तं सूत्रम् । अतिदेशाद् आश्वमेधिके सर्वस्मिन् प्राप्ते प्रत्याम्नायकं वैशेषिकं चाह—

चैत्र्याः पौर्णमास्याः पुरस्ताद् वरदानान्ते आश्वमेधिके कर्मणि कृते[३] अग्नये कामायाऽग्नये दात्रेऽग्नये पथिकृते इति तिस्र इष्टय आग्नेय्यः अप्राप्ते[४] प्रत्याम्नायिका भवन्ति ॥११-१२॥

यजमानस्य विजितं सर्वं समैतु इति जनपदम् उच्चैः श्रावयति ॥१३॥

जनपदं देशं यजमानस्य विजितं[५] सर्वं समैतु इति प्रैषमन्त्रेणोच्चैरामन्त्रयते ब्रह्मा ॥१३॥

कस्मै सहस्रं शताश्वं ज्ञातिभ्यो दद्याम्[६] । केन समाप्नुयाम् इति यजमानः ॥१४॥[७]

ब्राह्मणक्षत्रियं जनपदम् इमं 'प्रैषमन्त्रं यजमान उच्चैः[८] श्रावयति ॥१४॥

यदि ब्राह्मणः क्षत्रियो वा प्रपद्येत सिद्धं कर्मेत्याचक्षते ॥१५॥

यदि प्रैषार्थं ब्राह्मणः क्षत्रियजातीयो वा संप्रतिपद्येत[९] ततः सिद्धम् एवत् कर्मेत्याचक्षते कर्मविद आचार्याः ॥१५॥

---

१. तु. शांश्रौ १६, १४, १९-२०. २. तु. शांश्रौ १६, १०, ३-८. ३. ततै A. ४. प्राप्ते मूको. ५. विजितं मूको. ६. दद्यात् वा पू भा[१२]. ७. तु. शांश्रो १६, १०, ९. ८-८. क्षत्रियं प्रैषमंत्रं यथा उच्चैः भा[१]. ९. °पद्योता मूको.

न चेत् प्रतिपद्येत नेदिष्ठं सपत्नं विजित्य तेन यजेत ॥१६॥

यदि ब्राह्मणः क्षत्रियो वा न प्रतिपद्येत, निकटवर्तिनं सपत्नं राजानं समरे जित्वा तेन पुरुषपशुना यजेत ॥१६॥

तस्मै ज्ञातिभ्यस्तद्दद्यात् ॥१७॥

तस्मै सपत्नाय तदर्थं ज्ञातिभ्यः [१]तद् गोसहस्रशताश्वं[१] निष्क्रयार्थं[२] दद्यात् ॥१७॥

यस्य स्त्री संभाषेत तस्य सर्वस्वम् आदाय ताम् अब्राह्मणीं हनिष्य इत्युच्चैः श्रावयेत् ॥१८॥

यस्य[३] जनपदस्य संबन्धिनी स्त्री इमं पुरुषं भाषेत तस्य [४]जनपदस्य सर्वस्वं[४] गोहिरण्यादिकम् आदाय तां कृतसंभाषणां स्त्रीं हनिष्ये ब्राह्मणीवर्जम् इत्युच्चैः श्रावयेद् यजमानः, हनिष्य इत्युत्तमपुरुषनिर्देशात् ॥१८॥

तं ह[५] स्नातम् अलङ्कृतम् उत्सृज्यमानं सहस्रबाहुः पुरुषः (अ १९,६), केन पार्ष्णी (अ १०, २) इत्यनुमन्त्रयते ॥१९॥

तं ह स्नातमलङ्कृतमित्याद्यनुमन्त्रयत इत्यन्तं सूत्रम् । यागार्थं पुरुषं स्नातम् अलङ्कृतम् उत्स्रवद्[६] उत्सृज्यमानं सूक्ताभ्याम् अनुमन्त्रयते । सहस्रबाहुः, केन पार्ष्णी इति चरणम् अनवानं[७] मन्त्रयते[८] ॥१९॥

संवत्सरम् इष्टयः पथ्यायै स्वस्तये, अदित्या अनुमतये ॥२०॥[९]

संवत्सरं यावत् प्रत्यहम्[१०] एतास्तिस्र इष्टयः सावित्रीणां प्रत्याम्नायिका भवन्ति ॥२०॥

संवत्सरान्त ऐन्द्रापौष्णः पशुः ॥२१॥

भवतीति शेषः ॥२१॥

१-१. तं गोसहस्रताश्वं (°हस्रताम्रं भा[२]) भा[१२] A. २. °यार्थे भा[१] A. ३. नास्ति मूको. ४-४. जनपदसर्व° भा[१] A. ५. नास्ति भा[१२] A. ६. उस्त्रपद् भा[२]; उस्रपद् भा[१] A. ७. अन्वानं मूको. ८. मंत्र्यते भा[१] A. ९. तु. शांश्रौ १६, १०, ११. १०. प्रत्यग्रम् मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाव्रतं तृतीयम् ॥२२॥[१]

आश्वमेधिकतृतीयस्याऽह्नः[२] महाव्रतम् अहः प्रत्याम्नायकं भवति ॥२२॥

उदीरताम् (अ १८, १, ४४-४६) इति तिसृभिर्यूपे बध्यमानम् अनुमन्त्रयते[३] ॥क॥

पुरुषं यूपे[४] बध्यमानम् एताभिरनुमन्त्रयते ॥क॥

उत्थापनीभिश्च विमुच्यमानम् ॥ख॥ ॥२३॥[५]

उत्तिष्ठ प्रेहि (१८, ३, ८), [६]प्र च्यवस्व (अ १८, ३,९), उदन्वती (अ १८, २, ४८), इत[६] एते (अ १८, १, ६१), अग्नीषोमा (अ १८, २, ५३), इदं पूर्वम् (अ १८,४,४४) इत्युत्थापन्यः[७] । एताभिः, य ईशे (अ २, ३४,१) च, यूपाद् विमुच्यमानम्[८] अनुमन्त्रयते, चकारस्य समुच्चयार्थत्वात् ॥ख॥२३॥

हरिणीभिः शामित्रं[९] ह्रियमाणम् ॥२४॥

अति द्रव (अ १८, २, ११-१८) इत्यष्टौ हरिणीसंज्ञाः । ताभिः शामित्रे[१०] नीयमानम् अनुमन्त्रयते ॥२४॥

स्योनास्मै भव (अ १८, २, १९-२०) इति द्वाभ्यां निपात्यमानम् ॥२५॥

संज्ञपनार्थं निपात्यमानम् अनुमन्त्रयते ॥२५॥

सहस्रबाहुः (अ १९, ६), यामसारस्वतैः संज्ञप्तम् ॥२६॥[११]

यामाः — परेयिवांसं प्रवतो महीः (अ १८, १, ४९) इति यमो नो गातुं प्रथमो विवेद (अ १८, १, ५०) इति द्वे अङ्गिरसो नः पितरो नवग्वाः (अ १८,१, ५८-६१; २,१-३) इति संहताः सप्त ।[१२]

अथ सारस्वताः[१३]— सरस्वतीं देवयन्तो हवन्ते (अ १८,१,४१), सरस्वतीं पितरो हवन्ते (अ १८,१,४२), सरस्वति या सरथं ययाथ[१४] (अ १८, १,४३), सरस्वति

---

१. तु. वैता ३६,२६. २. द्वितीय° भा[१] A. ३. °मंत्रयन्ते पू. ४. यूपेन भा[२]. ५. तु. शांश्रौ १६, १२, १७. ६-६. प्रथमो देवतात् मूको. ७. तु. कौसू ८०, ३५; °पना मूको. ८. तु. वैता १०,१६. ९. शामित्रे भा[१२] A G. १०. समीपे मूको. ११. तु. शांश्रौ १६,१२,२१. १२. तु. कौसू ८१,३५-३६ १३. सारस्वत्यः मूको. १४. नास्ति भा[२].

व्रतेषु ते (अ ७,६८,१), इदं [१]ते हव्यं घृतवत्[१] सरस्वति (अ ७, ६८,२) इति[२], सूक्तेन, एतैश्च[३] पुरुषं संज्ञप्तम् अनुमन्त्रयते ॥२६॥

इति वैतानकल्पे सप्तमेऽध्याये द्वितीया कण्डिका ॥

[३८]

[४]अथ भैषज्याय यजमानम् अक्षीभ्यां ते (अ २, ३३), मुञ्चामि त्वा (अ १,१०,४), उत देवाः (अ ४, १३), यस्यास्ते (अ ६,८४), अपेत एतु (कौसू ९७,८), वात आ वातु (कौसू ११७,४) इति ॥क॥

अथेति मङ्गलार्थः । भैषज्याय यजमानम् अनुमन्त्रयते[४] अक्षीभ्यां[५] ते इत्यादिभिः । [६]यजमानग्रहणं पुरुषनिवृत्त्यर्थम्[६] ॥क॥

मेथते[७] ब्रह्मा सुप्रपाणा च वेशन्ता (अ २०, १२८, ९) इति ॥ख॥ ॥१॥[८]

मेथनकर्मणि होत्रभिमेथनाद् एवं वावाता ब्रह्मा (वैता ३६, ३१) सुप्रपाणा च वेशन्ता इत्यनेन प्रत्याम्नायकेनाऽभिमेथति[९] ॥ख॥१॥

पूर्वेणाऽनुचर्यः ॥२॥[१०]

सुप्रपाणा च इत्यस्य पूर्वेण अप्रपाणा च वेशन्ता (अ २०, १२८,८) इत्यनेन वावाताऽनुचर्यो ब्रह्माणम् अभिमेथन्ते[११] ॥२॥

उदीर्ष्व नारि (अ १८,३,२) इत्युक्तम् ॥३॥[१२]

उदीर्ष्वेत्युत्थापयति (कौसू ८०, ४५) इत्युक्तं करोति ॥३॥

यन्न इदं पितृभिः (कौसू ८८, २९) इति सर्वे ॥४॥[१३]

१-१. व्ये (ते भा[२]) ह वाद्यभवत् मूको. २. तु. कौसू ८१, ३८-३९. ३. एतौश्च मूको. ४-४. नास्ति A. ५. आख्याभ्य मूको. ६-६. °मानदक्षिणं पुरुषं नि° मूको. ७. तु. C; मेथने भा[१] A G; मैथने पू ब. ८. तु. शांश्रौ १६,१३,३-६. ९. °मेथेतेति भा[१] A. १०. तु. वैता ३६,३२. ११. °मेथंति भा[१] A. १२. तु. शांश्रौ १६, १३,१३. १३ तु. शांश्रौ १६ ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

यत्र इदं पितृभिः सह मनोऽभूत्[१]··· मनः[२] उपाह्वयति इत्युक्तं[३] सर्वे ब्रह्मादयः कुर्वन्ति ॥४॥

ब्रह्मोद्यात् —

गावो यवं[४] प्रयुता अर्यो अक्षन्. ता अपश्यं सहगोपाश्चरन्तीः ।
हवा इदर्यो अभितः समायन् कियदासु स्वपतिश्छन्दयाते (ऋ १०, २७, ८) इत्युद्गातारम् ॥५॥

ब्रह्मोद्यकर्मणि सदसि होत्रध्वर्योर्ब्रह्मोद्याद्[५] ब्रह्मा (वैता ३६, ३३) गावो यवम् इत्यनेन प्रत्याम्नायकेनोद्गातारं पृच्छति ॥५॥

प्रतिप्रश्ने —

यस्याऽनक्षा दुहिता 'जात्वास कस्तां[६] विद्वाँ अभि मन्याते अन्धाम् ।
कतरो मेनिं प्रति तं मुचाते[७] य ईं वहाते य ईं वा वरेयात् (ऋ १०, २७, ११) इति ॥६॥[८]

प्रतिप्रश्नकर्मणि यस्याऽनक्षा इत्यन्तं प्रत्याम्नायकम् आह[९] ॥६॥

पृष्ठ्यचतुर्थं चतुर्थम्[१०] ॥क॥

पृष्ठ्यषडहचतुर्थम् अहः पुरुषमेधस्य चतुर्थं भवति ॥क॥

अतिरात्रः पञ्चमम् ॥ख॥ ॥७॥

"पुरुषमेधस्य अतिरात्रसंस्थं पञ्चमम्"[११] अहः भवति ॥ख॥७॥

मध्यमं चेद् उक्थ्याऽग्निष्टोमा[१२] उत्तमे[१३] ॥८॥[१४]

मध्यमं तृतीयं यद्यतिरात्रसंस्थं भवति तदा उत्तमे चतुर्थपञ्चमे अहनी उक्थ्याऽग्निष्टोमसंस्थे यथाक्रमं भवतः ॥८॥

---

१. °नो भवति मूको. २. येन मूको. ३. तु. कौसू ८८, २९. ४. युवं वा पू. ५. ब्रह्मोष्वत मूको. ६-६. जात्वग्निः कस्तं वा पू ब. ७. मुञ्चाते पू G. ८. तु. शांश्रौ १६, १५, १७-१८. ९. ब्रह्मेति शेषः । १०. नास्ति भा[२] A. ११-११ नास्ति A. १२. उक्थान्यग्नि° वा पू. १३. G C पदमिदम् उत्तरसूत्रेण योजयितुकामौ द्र. १४. तु. काश्रौ २१, १, ३.

साऽश्वमेध ऋत्विक्पत्नीप्रैषकृतो द्वयाः ॥९॥

यद्यश्वमेधेन सह पुरुषमेधो भवति तदा ऋत्विगादय आश्वमेधिकाः पौरुषमेधिका अश्वमेधेन भवन्ति ॥९॥

द्व्यहोऽश्वमेधस्य त्र्यहः पुरुषमेधस्य ॥क॥

सहप्रयोगपक्षे पञ्चाहक्लृप्तिः ॥क॥

सर्वमेधः पुरुषमेधवत् ॥ख॥ ॥१०॥

सर्वमेधाख्यः क्रतुः पुरुषमेधेन तुल्यो भवति ॥ख॥१०॥

अहानि अग्निष्टुद् इन्द्रस्तुत् सूर्यस्तुद् वैश्वदेवस्तुत् पौरुषमेधिकं 'तृतीयं पञ्चमं', वाजपेयोऽप्तोर्यामा ॥११॥[२]

इत्यहानि[३] सर्वमेधे भवन्ति ॥११॥

एतस्मिन् सर्वान् मेधान् आलभन्ते ॥१२॥[४]

एतस्मिन् सप्तमेऽहनि सर्वान् मेधान् "स्थावरजङ्गमान् मेध्यान् प्राणिनः"[५] समालभन्तेऽध्वर्यवः ॥१२॥

पृष्ठ्योत्तमे विश्वजिद् अतिरात्रो दशमम् ॥१३॥[६]

पृष्ठ्यषडहस्योत्तमे पञ्चमषष्ठे अहनी अष्टमनवमे भवतः । विश्वजिदतिरात्रसंस्थो दशमं भवति । एवं दशरात्रः सर्वमेधः ॥१३॥

संवत्सरान्ते गार्हपत्येऽधरारणिं प्रहृत्याऽऽहवनीय उत्तराऽरणिम् अयं ते योनिः (अ ३, २०, १) इत्यात्मन्नग्निं संस्पृश्य[७] अरण्याय प्रव्रजेत् ॥१४॥[८]

१-१. पुरुषमेधे यत्तृतीयमहस्तदिह पञ्चमं भवतीत्यर्थः । २. तु. काश्रौ २१, २, ४; माश १३, ७, १, ३-९; आपश्रौ २०, २५, ६-१३; शांश्रौ १६, १५, ३-७. ३. अश्वानि भा[१]; A; अश्वहानिः भा[२]. ४. तु. काश्रौ २१, २, ४; माश १३, ७, १, ९; आपश्रौ २०, २५, १२; शांश्रौ १६, १५, ८. ५-५. °जंगमान्मेधान् प्राणान् भा[१,२]. ६. तु. काश्रौ २१, २, ११-१२; माश १३, ७, १, १०-१२; आपश्रौ २०, २५, १६-२०; शांश्रौ १६, १५, १२-१३. ७. C समारोप्य इति प्रस्तावुकः (तु. आपश्रौ.). ८. तु. काश्रौ २१, १, १७; शांश्रौ १६, १६, १; माश १३, ६, २, २०; आपश्रौ २०, २४, १६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवत्सरान्त इत्याद्यरण्याय प्रव्रजेदित्यन्तं सूत्रम् । ऋतुपशूनालभ्य[1] संवत्सरान्ते गार्हपत्येऽधरारणिं प्रहृत्य प्रक्षिप्य आहवनीये उत्तरारणिं प्रहृत्यैव अयं ते योनिः इत्यात्मन्यग्निं संस्पृश्य अरण्याय[2] प्रव्रजेदपुनरावृत्तौ ॥१४॥

इति मेधाः क्षत्रियस्य क्षत्रियस्य[3] ॥१५॥

इत्यथर्ववेदे वैतानसूत्रे सप्तमोऽध्यायः समाप्तः ॥

इत्येते मेधसंज्ञाः अश्वमेधादयः[4] क्रतवः क्षत्रियजातीयस्य भवन्ति । [5]इति शब्दः प्रकारवचनः । तेन अन्येऽपि मेधाः क्षत्रियस्य भवन्ति । अभ्यासोऽध्याय-परिसमाप्त्यर्थः[5] ॥१५॥

इति कौशिकीये वैतानकल्पे सोमादित्यस्याऽऽक्षेपानुविधौ
सप्तमेऽध्याये तृतीया कण्डिका ॥
सप्तमोऽध्यायः समाप्तः ॥

---

१. तु. वैता ३७, ८-९; रितुपसमागसंव° भा[1] A; रितुपसुमाससंव° भा[2]. २. आर° मूको. ३. नास्ति G. ४. तु. बौश्री १,११; २४,११. ५-५. नास्ति भा[1].

अथ अष्टमोऽध्यायः

[३९]

अथ स्तोत्रियविकाराः[1] ॥१॥

स्तोत्रियाश्च [2]ते विकाराश्च[2] स्तोत्रियविकाराः[3] । त [4]एकाहाऽहीनसत्रविकृतिषु विधीयन्ते[4] । ज्योतिष्टोमप्रकृतयः प्रतिष्ठितावहाः । चतुर्विंशातिजिद्वायया क्रतवः[5] प्रकृतयः । तेन तेषु इतःस्तोत्रियाऽऽरम्भणीयापर्यासवर्जं गवामयनिकं भवति । अनुक्तस्तत्र[6] प्राकृतः[7] । अहीनसत्राणि तु गवामयनप्रकृतीनि अहर्गणत्वात् । एवम्[8] एकाहाऽहीनसत्रविकृतिषु स्वतन्त्रासु परतन्त्रमध्यपतितासु च स्तोत्रिय-विकारा[9] विधीयन्ते ॥१॥

एकाहेषु तं ते मदं गृणीमसि (अ २०,६१,१-३) इति ॥२॥

सर्वेषु उक्थ्यसंस्थितेषु एष उक्थस्तोत्रियो[10] भवति । स्तोत्रियनियमश्छन्दसा (वैता ४२,१०) इति परिभाषणात् ॥२॥

बृहस्पतिसवे तद्वो गाय सुते सचा (अ २०, ७८), वयमेनमिदा ह्यः (अ २०,९७) इति ॥क॥

एतावाज्यपृष्ठस्तोत्रियौ यथाक्रमं भवतः ॥क॥

सवनयोरुक्थमुखीयतृचपर्यासौ ॥ख॥

प्रातःसवनमाध्यन्दिनयोः सवनयोः उक्थमुखीयतृचः पर्यासश्च एतावेव भवतः परिसंख्यासूत्रत्वात् । एवं च प्रातःसवने अयमु त्वा विचर्षणे

---

१. स्तोत्रियाधिका° भा[1,2] A पू. २-२. तेधिका° मूको. ३. स्तोत्रियाधिका° मूको. ४-४. °सत्र (°त्रा भा[1]) विकृतिधी° मूको. ५. कृतव भा[2]; कृतयः भा[1] A. ६. अनुत्तयस्त्र मूको. ७. प्राकृतयः भा[1] A. ८. नाम् भा[1,2]; माम् A. ९. स्तोत्रियाधि° मूको. १०. उक्तः स्तो° भा[2]; उक्तस्तो° भा[1] A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अ २०,५,१-३) इत्युक्थमुखीयस्तृचः[१]। उद्वेदभि श्रुतामघम् (अ २०, ७, १-३) इति पर्यासश्च[१]। माध्यन्दिने इन्द्रः पूर्भिदातिरद् दासमर्कैः (अ २०, ११, १-३) इत्युक्थमुखीयस्तृच[२]ः। उदु ब्रह्माण्यैरत श्रवस्या (अ २०,१२) इति [३]पर्यासश्च। तस्य[३] द्वितीयस्तृचः अनन्तरसूत्रे आद्यतृचस्य पर्युदासात् ॥ख॥

माध्यन्दिने पर्यासाऽऽद्यतृचवर्जम् ॥ग॥ ॥३॥[४]

पूर्वसूत्रेण माध्यन्दिनेऽपि सर्वस्य पर्यासस्य प्राप्तत्वाद् आद्यस्तृचः पर्युदस्यते। तेन [५]आपश्चित् पिप्यु स्तर्यो[५] न गावः (अ २०, १२, ४-६) इति। एवं तृचत्रयं शस्यम्। [६]तस्मात् सप्तदशस्तोम एष[६] क्रतुर्भवतीति[७] भगवान् वाचस्पतिर्मन्यते स्म ॥ग॥३॥

गोसवाऽभिषेचनीययोः युञ्जन्ति ब्रध्नम् अरुषम् (अ २०, २६, ४-६) इति ॥४॥

एतयोरेकाहयोरेष आज्यस्तोत्रियो भवति ॥४॥

श्येनसंदंशाऽजिरवज्रेषु सुरूपकृत्नुमूतये (अ २०,५७,१-३), उत्त्वा मन्दन्तु स्तोमाः (अ २०,९३,१-३), त्वाम् इद्धि हवामहे (अ २०,९८) इति ॥५॥[८]

एषु वज्रपर्यन्तेषु[९] एकाहेष्वाद्यावाज्यस्तोत्रियौ विकल्पितौ भवतः। तृतीयः पृष्ठस्तोत्रियो भवति ॥५॥

अपूर्वे आभ[१०] त्वा पूर्वपीतये (अ २०,९९) इति ॥६॥

अपूर्वाख्य एकाह एष[११] पृष्ठस्तोत्रियो भवति ॥६॥

व्रात्यस्तोमेषु आ त्वेता नि षीदत (अ २०,६८,११;१२;६९,१), अधा हीन्द्र गिर्वणः (अ २०,१००) इति ॥७॥

व्रात्यस्तोमाख्येष्वेकाहेष्वेतावाज्यपृष्ठस्तोत्रियौ यथाक्रमं भवतः ॥७॥

१-१. तु. वैता २१,२. २. तु. वैता २२, १२. ३-३. तु. वैता २२, १३; °सस्त भा[२] A; °सश्र (थ A)त भा[१] A. ४. तु. आश्रौ ९, ५, ५-६. ५-५. प्रायश्चित्तेऽपि उत्सूर्यो मूको. ६-६. ऋचान् सप्तदशस्तोमेषु मूको. ७. °वति मूको. ८. तु. शांश्रौ १४, २२,४; आश्रौ ९, ७,१;८,१९. ९. पर्यन्तेषु मूको. १०. अनुपूर्वे वा. ११. एषु मूको.

अग्निष्टुत्सु ईळेन्यो नमस्यः (अ २०, १०२), अग्निं दूतं वृणीमहे (अ २०, १०१), अग्निमीलिष्वावसे (अ २०, १०३, १-२), अग्न आ याह्यग्निभिः (अ २०, १०३,२-३) इति ॥८॥

अग्निष्टुत्स्वेकाहेष्वाद्यावाज्यस्तोत्रियौ विकल्पितौ भवतः। उत्तरौ पृष्ठ-स्तोत्रियौ विकल्पितावेतौ ॥८॥

तीव्रसुदुपशदोपहव्येषु[१] अयमु ते समतसि (अ २०, ४५), इमा उ त्वा पुरूवसो (अ २०, १०४) इति ॥क॥

एतेषु त्रिषु एकाहेषु एतावाज्यपृष्ठस्तोत्रियौ यथाक्रमं भवतः ॥क॥

व्युष्टिद्व्यहे च ॥ख॥ ॥९॥

एतस्मिन् द्व्यहे अयमु ते समतसि, इमा उ त्वा पुरूवसो इत्याज्यपृष्ठस्तोत्रियौ भवतः। स्तोत्रियप्रसङ्गाद् एकाहप्रकरणे विधिः ॥ख॥९॥

गोसवविवधवैश्यस्तोमेषु[२] इन्द्रं वो विश्वतस्परि (अ २०,३९,१; ३), आ नो विश्वासु [३]हव्य इन्द्रः[३] (अ २०, १०४, ३-४) इति ॥१०॥[४]

एतेषु त्रिषु एकाहेषु एतावाज्यपृष्ठस्तोत्रियौ भवतः। इन्द्रं वो [५]विश्वतस्परि इति उद्गाः इत्यृचौ[५] उभे (अ २०, ३९,१;३), पूर्वस्मिन् ग्रहणे हि द्वितीयया[६] व्यन्तरिक्षमतिरत् (अ २०,३९,२) इति तृचोत्तरारम्भात् ॥१०॥

प्रतीचीनस्तोमे त्वमिन्द्र प्रतूर्तिषु (अ २०, १०५, १-२) इति ॥११॥[७]

प्रतीचीनस्तोमे एकविंशः प्रातःसवने सप्तदशो माध्यन्दिने पञ्चदशः तृतीय-सवने। एतस्मिन् प्रतीचीनस्तोमे एकाहे एष आज्यस्तोत्रियो भवति ॥११॥

राजि यो राजा चर्षणीनाम् (अ २०, १०५,४-५) इति ॥१२॥[८]

---

१. °व्रसुदुदुपह° भा[१]; °व्रसुदुद्रुपश° भा[२]. २. °विवेधवै° भा[१२] A. ३-३. नास्ति G; °व्यमिद्र भा[१२]; °व्य इद् वा; °व्या इद् पू. ४. तु. आश्रौ ९, ८,१२. ५-५. °तः परीर्तिदगादि तृचे भा[१] A; °तः परीत्यतिदिष्टरिगादिर-त्रिचपरि भा[२]. ६. द्वितीयस्य मूको. ७. तु. बौश्रौ २६, २. ८. तु. काश्रौ २२,१०,७-९; आश्रौ ९,८,२१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतस्मिन् एकाहे एष पृष्ठस्तोत्रियो भवति ॥१२॥

उद्भिद्बलभिदोः यज्ञ इन्द्रमवर्धयत् (अ २०, २७,५;६;२८,१;२) इति ॥१३॥[१]

एतयोरेकाहयोरेष[२] पृष्ठस्तोत्रियो भवति ॥१३॥

इन्द्रस्तोमे इन्द्र क्रतुं न आ भर (अ २०, ७९), तव त्यदिन्द्रियं बृहत् (अ २०,१०६) इति ॥१४॥

एतस्मिन्नेकाह एतौ पृष्ठोक्थस्तोत्रियौ भवतः ॥१४॥

विघने समस्य मन्यवे विशः (अ २०,१०७,१-३), तदिदास भुवनेषु ज्येष्ठम् (अ २०,१०७,४-६) इति ॥१५॥

[३]विघनः एकाहः[३] अग्निष्टोमसंस्थ इति भाष्यकारः । तस्मिन्[४] एतावाज्यपृष्ठस्तोत्रियौ भवतः ॥१५॥

सूर्यस्तुति उदु त्यं जातवेदसम् (अ २०,४७,१३-१५), चित्रं देवानां केतुरनीकम्[५] (अ २०, १०७,१३-१५) इति ॥१६॥

एतस्मिन्नेकाह एतावाज्यपृष्ठस्तोत्रियौ भवतः । चित्रं देवानाम् इति स्तोत्रियाय[६] पठितो गृह्यते देवताभिधानसाम्यात् । तेन सूर्यो देवीमुषसं रोचमानाम् (अ २०,१०७,१५) इति तृतीया ॥१६॥

वज्रे पुनःस्तोमे त्वं न इन्द्रा भर (अ २०,१०८) इति ॥१७॥

एतयोरेकाहयोरेष उक्थस्तोत्रियो भवति ॥१७॥

सर्वजित्यृषभे मरुत्स्तोमे साहस्राऽन्त्ये तद्वो गाय सुते सचा (अ २०,७८), वयमेनमिदा ह्यः (अ २०,९७,१-२) इति ॥१८॥

एतेषु चतुर्ष्वेकाहेष्वेतावाज्यपृष्ठस्तोत्रियौ भवतः ॥१८॥

१. तु. काश्रौ २२. १०,२१-२७; आश्रौ ९,८, १७; शांश्रौ १४, ११, १०.
२. °योः मूको. ३-३. विघने एकाहे मूको. ४. एतस्मिन् भा[१]. ५. उदगादनीकम् भा[१२] A. ६. शास्त्राय यः मूको.

साहस्राद्ययोः[१] स्वादोरित्या विषूवतः (अ २०, १०९, १-२) इति ॥१९॥

साहस्राख्याः[२] चत्वार एकाहा ब्राह्मणपठिताः । तेषां प्रथमद्वितीययोरेष पृष्ठस्तोत्रियो भवति ॥१९॥

इति वैतानकल्पेऽष्टमेऽध्याये प्रथमा कण्डिका ॥

[४०]

विराजि भूमिस्तोमे वनस्पतिसवे त्विष्यपचित्योरिन्द्राग्न्योःस्तोम इन्द्राग्न्योःकुलाये इन्द्राय मद्वने सुतम् (अ २०, ११०), यत्सोममिन्द्र विष्णवि (अ २०, १११) इति ॥१॥[३]

एतेषु सप्तस्वेकाहेष्वेतावाज्योक्थस्तोत्रियौ भवतः ॥१॥

विराजेऽग्नेःस्तोमेऽग्नेःकुलाये अग्निं दूतं वृणीमहे (अ २०,१०१), अग्निमीळिष्वावसे (अ २०,१०३,१-३) इति ॥२॥

एतेषु त्रिष्वेकाहेष्वेतावाज्यपृष्ठस्तोत्रियौ भवतः ॥२॥

विनुत्त्यभिभूत्यो[४] राशिमरायययोः शदोपशदयोः[५] सम्राट्स्वराजोः यदद्य कच्च वृत्रहन् (अ २०,११२), उभयं शृणवच्च नः (अ २०,११३) इति ॥३॥[६]

एतेष्वष्टसु इन्द्रैकाहेष्वेतावाज्यपृष्ठस्तोत्रियौ भवतः ॥३॥

राजसूयेषु यत्सोममिन्द्र विष्णवि (अ २०, १११), अधा हीन्द्र गिर्वणः (अ २०, १००), अभ्रातृव्यो अना त्वम् (अ २०,११४), त्वं न इन्द्रा भर (अ २०,१०८) इति च ॥क॥

१. साहस्रान्त्ययोः वा पू भा[१२] A. २. °हास्रा° मूको. ३. तु. काश्रौ २२, १०, २८; ११, १२; आश्रौ ९,८,२१. ४. विनोत्य° वा पू; विनुत्य° भा[११] A. ५. संदोपसदोः वा पू भा[१२] A. ६. तु. आश्रौ ९, ८, १९; २२;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पवित्रादिषु राजसूयैकाहेषु यथासंभवम् एत उक्थस्तोत्रिया भवन्ति । चकाराद् यदद्य कच्च वृत्रहन् (अ २०,११२), उभयं[1] शृणवच्च नः (अ २०,११३) इत्याज्यपृष्ठस्तोत्रियौ च ॥क॥

चतुरहपञ्चाहाहीनदशाहच्छन्दोमदशाहेषु च ॥ख॥ ॥४॥

एतेषु चतुर्ष्वहीनेषु यत्सोममिन्द्र विष्णवि (अ २०, १११) इत्यादयश्चत्वार उक्थस्तोत्रिया यथासंभवं भवन्ति, न [2]पूर्व्यौ चाऽनुकृष्टत्वात्[2] ॥ख॥४॥

तीव्रसुच्चतुःपर्याययोः साहस्रान्त्ययोर्दशपेये विश्वंशयज्ञे श्रायन्त इव सूर्यम् (अ २०, ५८,१-३) इति ॥५॥

एतेषु षट्स्वेकाहेष्वेष पृष्ठस्तोत्रियो भवति ॥५॥

साद्यःक्रेषु श्येनवर्जम् अहमिद्धि पितुष्परि (अ २०, ११५) इति च ॥६॥

साद्यःक्राऽभिधानेष्वेकाहेषु श्येनवर्जितेषु अहमित् इत्याज्यस्तोत्रियो भवति । चकारस्यान्वाचयार्थत्वात् श्रायन्त इव सूर्यम् (अ २०, ५८, १-३) इत्याज्यस्तोत्रियो भवति ॥६॥

अतिरात्राणां सर्वस्तोमयोः मा भूम निष्ट्या इव (अ २०, ११६), विधुं दद्राणं सलिलस्य पृष्ठे (अ ९,१५[१०],९-११) इति ॥७॥

अतिरात्रैकाहानां मध्ये[1] सर्वस्तोमाख्ययोरेतौ शाखाम्नायपठितौ पृष्ठस्तोत्रियौ यथाक्रमं भवतः ॥७॥

त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशनवसप्तदशेषु उभयं शृणवच्च नः (अ २०, ११३), वयमेनमिदा ह्यः (अ २०, ९७), पिबा सोममिन्द्र [3]मन्दतु त्वा[3] (अ २०,११७) इति ॥८॥

एतेषु सप्तसु अतिरात्रैकाहेष्वेते[4] त्रयः पृष्ठस्तोत्रिया [5]यथासंभवं भवन्ति[5] ॥८॥

अभिजिति[6] अभि प्र गोपतिं गिरा (अ २०,२२,४-६) इति च ॥९॥

---

१. नास्ति मूको. २-२. पूर्व्यौ वानु° मूको. ३. षष्ठे मूको. ४-४. नास्ति वा. ५. त्रिरात्रैका° मूको; सा. ६-६. यथाक्रमं संभ° मूको. ७. नास्ति पु.

[1]अभिजित्यतिरात्रैकाह एष[1] आज्यस्तोत्रियो भवति । चकारात् उभयं शृणवच्च नः (अ २०, ११३) इत्यादयश्च त्रयः पृष्ठस्तोत्रिया विकल्पिता[2] भवन्ति ॥९॥

अनतिरात्रे अभि त्वा वृषभा सुते (अ २०, २२,१-३) इति ॥१०॥

अतिरात्रवर्जितेऽभिजित्येकाहीभूत एष आज्यस्तोत्रियो भवति ॥१०॥

चतुर्विंशे इन्द्रा याहि चित्रभानो (अ २०,८४), मा चिदन्यद्वि शंसत (अ २०,८५,१-२) इति ॥११॥

[3]चतुर्विंशे सांवत्सरिक[3] एकाहीभूते एतावाज्यपृष्ठस्तोत्रियौ भवतः ॥११॥

विश्वजिति य एक इद् विदयते (अ २०, ६३,४-६) इति ॥१२॥

विश्वजित्येकाहीभूत एष उक्थस्तोत्रियो भवति ॥१२॥

विषुवति इन्द्र क्रतुं न आ भर (अ २०,७९) इति ॥१३॥

विषुवत्येकाहीभूत एष पृष्ठस्तोत्रियो भवति । विकल्पे प्राप्ते नियमार्थं सूत्रम् ॥१३॥

स्वरसामाभिप्लवगवायुषि शेषेषु[4] ॥क॥

इन्द्र क्रतुं न आ भर (अ २०, ७९) इति पृष्ठस्तोत्रियो भवति । अत्रापि गोआयुषोरौत्तरपाक्षिकत्वान्नियमार्थत्वम् । स्तोत्रियप्रसङ्गाच्चैकाहप्रक्रमे विधिः ॥क॥

पृष्ठ्यस्य[5] एकविंशे इन्द्रो दधीचो अस्थभिः (अ २०,४१), विश्वाः[6] पृतना अभिभूतरं नरम् (अ २०,५४), एवा ह्यसि वीरयुः (अ २०,६०) इति ॥ख॥ ॥१४॥

पृष्ठ्यषडहस्य एकविंशस्तोमके चतुर्थेऽहन्येकाहीभूत एत आज्यपृष्ठोक्थस्तोत्रिया भवन्ति ॥ख॥१४॥

इति वैतानकल्पेऽष्टमेऽध्याये द्वितीया कण्डिका ॥

१-१. °काहेषु मूको. २. कल्पिता मूको. ३-३. °विंशसांव° मूको. ४. असंगत इव पाठ इति C. ५. पृष्ठ° वा पृ भा[1][1] A G. ६. नास्ति मूको.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[४१]

व्युष्ट्याङ्गिरसकापिवनचैत्ररथद्व्यहानां तं ते मदं गृणीमसि (अ २०, ६१) इति ॥क॥

एतेषां चतुर्णां व्युष्ट्यादीनां[1] प्रथमेऽहनि यथासंभवम्[2] एष उक्थस्तोत्रियो भवति। अनन्तरं द्वितीयेऽहनि विधानात् ॥क॥

द्वितीयेषु विश्वाः पृतना अभिभूतरं नरम् (अ २०, ५४) इति ॥ख॥ ॥१॥

व्युष्ट्यादीनां[3] द्वितीयेष्वहःस्वेव स्तोत्रियो भवति ॥ख॥१॥

चातुर्मास्यवैश्वदेवगर्गवैदच्छन्दोमवत्पराकान्तर्वस्वश्वमेधत्र्यहाणां शग्ध्यूषु शचीपते (अ २०,११८,१-२) इति ॥२॥

एतेषां सप्तानां त्र्यहाणां प्रथमेष्वहःस्वेष पृष्ठस्तोत्रियो भवति, द्वितीयादिषु वक्ष्यमाणत्वात् । चातुर्मास्यशब्दो [3]वैश्वदेवत्र्यहस्य विशेषणम्[3] ॥२॥

साकमेधस्य इन्द्रमिद् देवतातये (अ २०,११८,३-४) इति ॥३॥

चातुर्मास्यसोमस्य साकमेधत्र्यहस्य [4]प्रथमेऽहन्येव[4] पृष्ठस्तोत्रियः प्रगाथो भवति ॥३॥

वैदस्वरसाम्नोः[5] त्वं न इन्द्रा भर (अ २०,१०८) इति ॥४॥

एतयोस्त्र्यहयोः प्रथमयोरह्नोरेष उक्थस्तोत्रियो भवति ॥४॥

द्वितीयेषु तमिन्द्रं वाजयामसि (अ २०, ४७, १-३), अस्तावि मन्म पूर्व्यम् (अ २०, ११९), तं ते मदं गृणीमसि (अ २०, ६१, १-३) इति ॥५॥

वैश्वदेवादीनां त्र्यहाणां द्वितीयेष्वहःसु यथासंभवम् एत आज्यपृष्ठोक्थस्तोत्रिया भवन्ति ॥५॥

---

१. व्युष्टयानां मूको. २. प्रथमसं॰ मूको. ३-३. ॰त्र्यहवि॰ भा[1] A. ४-४. प्रथमेष्व॰ भा[1], प्रथमेऽह्नि भा[1] A. ५. वैदस्व॰ ...

अश्वमेधस्य वाचमष्टापदीमहम् (अ २०,४२), स्वादोरित्था विषूवतः (अ २०,१०९) इति ॥६॥

अश्वमेधस्य त्र्यहस्य द्वितीयेऽहनि एतावाज्यपृष्ठस्तोत्रियौ भवतः। पृष्ठ्य-चतुर्थाहनिर्दिष्टयोः[1] स्तोत्रिययोः प्रत्याम्नायकावेतौ ॥६॥

पृष्ठ्यत्र्यहस्य एवा ह्यसि वीरयुः (अ २०,६०,१-३) इत्युक्थे ॥७॥

वैकृतपृष्ठ्यत्र्यहस्य द्वितीयेऽहन्येष उक्थस्तोत्रियो भवति। उक्थग्रहणं गायत्रच्छन्दस्त्वात् ॥७॥

